वेद ४२४

वेद

सो हि वि[illegible] परमं तप उच्यते।
[illegible]ो हि विप्राणा[illegible] तप उच्यते।
[illegible]वेदाध्ययनमवश्य[illegible] कर्तव्यम्।

(१२-३-२६)

[illegible]व: वेद [illegible]ध्यायी [illegible]ाशिव।
प्रयत्नेन वेद-मेव [illegible]यापठेत॥
प्रेम [illegible] तिमिलैना
Premaisen[illegible]

वेद ४५४

कात्यायन श्रौतसूत्रम्

दर्ताे नं. २०४५२



वेद ४५४

श्रीगणेशाय नमः

सरलवृत्तिसहितम्

कात्यायन-श्रौतसूत्रम्

जगदम्बावलम्बाय, निरालम्बाय शूलिने ।
जगत्त्रयकुटुम्बाय, नमः साम्बाय शम्भवे ॥ १ ॥
जनकं ज्ञानदं नत्वा प्रभुदत्ताग्निहोत्रिणम् ।
तद्दर्शितपथीं कुर्वे वृत्तिं शिशुविबोधिनीम् ॥ २ ॥
श्रीमत्कात्यायनप्रोक्त-श्रौतसूत्रं यथामति ।
व्याख्यातुमेष यत्नस्तत् प्रीयतां परमः पिता ॥ ३ ॥

[अधिकारनिरूपणप्रतिज्ञा]

अथातोऽधिकारः ॥ १ ॥

अथ वेदाध्ययनानन्तरम्, अतः वेदाध्ययनस्य वृत्तत्वाद्धेतोः अधिकारः कर्तृव्यापारः फलभोक्तृत्वसमानाधिकरणो व्याख्यास्यते इति शेषः। वेदाध्ययने वृत्ते तदनन्तरं तादृशवेदप्रतिपादितेषु कर्मसु अधिकारः अनुष्ठानरूपो व्यापारः कस्य इति विचार्यते इति भावः ॥ १ ॥

[कर्मणां फलवत्त्वम्]

नन्विदमयुक्तम्। फलवत्स्वेव कर्मसु प्रेक्षावतां प्रवृत्तिदर्शनात्, वेदविहितेषु कर्मसु तादृशफलस्य कस्याप्यश्रवणात्। न च 'दर्शपूर्णमासाभ्यां यजेत स्वर्गकामः' (आप० श्रौ० ३।१४।८). इत्यादि—वाक्यगतैः स्वर्गकामादिपदैः फलमेव प्रतिपाद्यत इति वाच्यम्। तेषां पुरुषविशेषणत्वेन फलप्रतिपादकत्वाभावात् इत्याशङ्क्याह—

फलयुक्तानि कर्माणि ॥ २ ॥

सर्वाण्यपि कर्माणि वेदोक्तानि फलजनकान्येवेत्यर्थः। एवं च स्वर्गकामादिपदं पुरुषविशेषणं सदपि विशेषणीभूतस्वर्गादिबोधकमर्थाद् भवति। अन्यथा अफले कर्मणि पुरुषस्य प्रवृत्यनुदयाद् वेदवाक्यस्य प्रवर्त्तकत्वमेव भज्येत। अतश्च यत्रापि फलं न श्रूयते तत्रापि फलं कल्पनीयमेवेति भावः ॥ २ ॥

[मनुष्याणामेव कर्मस्वधिकारः]

एवं कर्मणां फलजनकत्वे साधिते तेषु केषामधिकार इति संशये पूर्वपक्षयति—

सर्वेषामविशेषात् ॥ ३ ॥

देव-मनुष्य-रक्षः-पिशाच-तिर्यगादीनां सर्वेषामेवाधिकारः, फलार्थित्वाविशेषात्। सर्वे हि फलमभिलषन्ति ॥ ३ ॥

एवं प्राप्ते सिद्धान्तयति—

मनुष्याणां वाऽऽरम्भसामर्थ्यात् ॥ ४ ॥

वाशब्दः पूर्वपक्षव्यावर्त्तक, एवकारार्थो वा। मनुष्याणामेव कर्मस्वधिकारः। तेषामेव हि अनुष्ठानसामर्थ्यमस्ति। देवादीनां तु देवतान्तराद्यभावात्, तिर्यगादीनां कर्मानुष्ठानाशक्तेश्च न तेषामधिकारः ॥ ४ ॥

[शूद्राणामङ्गहीनादीनां च नाधिकारः]

एवं सर्वेषां मनुष्याणामधिकारे सिद्धे तदपवादमाह—

अङ्गहीनाऽश्रोत्रियषण्ढशूद्रवर्जम् ॥ ५ ॥

पूर्वसूत्रात् 'आरम्भसामर्थ्यात्' इत्यनुवर्त्तते। अङ्गहीना अन्ध-पङ्गु-बधिरादयः, अश्रोत्रियोऽनधीतवेदः, षण्ढो नपुंसकः, शूद्रः प्रसिद्धः, एतद्वर्जितानामेव मनुष्याणामधिकारः। अन्धस्य आज्यावेक्षणादि-कर्मानुष्ठानासम्भवात्, पङ्गोर्विष्णुक्रमादावसम्भवात्, बधिरस्य मन्त्रश्रवणादावशक्तेः, मूकस्य मन्त्रोच्चारणाद्यावसमर्थत्वात्, षण्ढस्याशुचित्वाच्च नाधिकारः ॥५॥

ननु शूद्रस्य त्रैवर्णिकत्वात् फलार्थित्वाऽविशेषात् द्रव्यवत्त्वात् समर्थत्वाच्च कुतो नाधिकार इत्यत आह—

ब्राह्मण-राजन्य-वैश्यानाꣳ श्रुतेः ॥ ६ ॥

ब्राह्मणादीनां त्रयाणामेव वर्णानामधिकारः। कुतः ? श्रुतेः। तेषामेवाध्ययनश्रवणात्, आधानश्रवणाच्च। न शूद्रस्य, तस्याधानाभावादध्ययनाभावाच्च। अयं भावः—'वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यो, वर्षासु वैश्यः'(शत० २-१-३-५)'वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यम्' (आप० धर्म० १-१-१-१९) इति त्रैवर्णिकानामेव उपनयनम् आधानं च विधीयते। उपनीतस्यैव 'तमध्यापयीत' इति अध्ययने विनियोगः। अधीतवेदस्यैव च यागादावधिकार इति शूद्रस्य आधानाभावेन न तत्राधिकारः। एवमाधानाग्निसिद्धाग्निमत एव उत्तरक्रतुष्वधिकार इति शूद्रस्य तदभावान्नाधिकारः ॥६॥

[पुंसा सहैव स्त्रिया अधिकारनिरूपणम्]

आधानवाक्ये पुंस्त्वश्रवणात् स्त्रिया वेदाध्ययननिषेधाच्च तस्या अध्यनधिकारे प्राप्त आह—

स्त्री चाऽविशेषात् ॥ ७ ॥

स्त्री चाधिक्रियते। कुतः ? अविशेषात्, श्रूयमाणस्य पुंस्त्वरूपलिङ्गस्य विशेषकत्वाभावात्, व्यावर्त्तकत्वाभावादित्यर्थः। अत्र श्रूयमाणमपि लिङ्गमुद्देश्यविशेषणत्वाद् ग्रहैकत्ववदविवक्षितमिति भावः ॥७॥

---

१ ज्योतिष्टोमे वाक्यान्तरेण श्रूयते "दशापवित्रेण ग्रहं सम्मार्ष्टि" (श० ४।२।२।११) इति। सोमरसाधारभूताः पात्रविशेषा ग्रहा इत्युच्यन्ते। तानि पात्राणि वासःखण्डेन सम्मृजेदित्यर्थः। तत्र यावन्तो ग्रहाः सन्ति तेषां सर्वेषां सम्मार्गः ? उत एकस्यैव ? इति सन्देहे ग्रहस्य उद्देश्यत्वेन प्राधान्यात् तद्विशेषणीभूतस्य एकत्वस्यापि विवक्षायां कृतायामनेकोद्देश्यत्वकृतो वाक्यभेदो दुष्परिहर इति कृत्वा ग्रहत्वमेव विवक्षितम्, एकत्वं तु अविवक्षितमिति निर्णीतं पूर्वमीमांसायाम्। (३।१ ७) तद्वदत्रापि स्वर्गकामस्य पुरुषोद्देश्यत्वेन प्राधान्यात् तद्विशेषणीभूतस्य पुंस्त्वस्यापि विवक्षायामनेकोद्देश्यत्वकृतो वाक्यभेदो दुष्परिहर इति कृत्वा स्वर्गकामविशेषणीभूतं पुंस्त्वमप्यविवक्षितम्। स्त्री वा पुरुषो वा स्वर्गकामनानधिकारीति।

…पीठ-पुस्तकालय
20842

दर्शनाच्च ॥ ८ ॥

'मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीम्' (तै० सं० ६।१।३) "आज्यमुद्रास्य पत्नीमवेक्षयति" (का० श्रौ० २।७।४) इत्यादिना तस्या अप्यधिकारदर्शनादित्यर्थः । अयं चाधिकारः स्त्रिया भर्त्रा सहैव, न स्वातन्त्र्येण । सहत्वं सर्वकर्मसु—

"नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् ।
शुश्रूषयति भर्त्तारं तेन स्वर्गे महीयते"—(मनुः ५.५५)

इत्यादिना साहित्यश्रवणात्, पृथक्त्वनिषेधाच्च ॥ ८ ॥

[रथकारस्याधानमात्रे एवाधिकारः]

एवं त्रयाणां वर्णानामङ्गहीनादिवर्जं स्त्रिया सह अधिकारे सिद्धे अन्यत्रापि क्वचित्तत्प्राप्त्यर्थं सूत्रमारभते—

रथकारस्याधाने ॥ ९ ॥

रथकारस्य माहिष्येण करण्यामुत्पादितस्य त्रैवर्णिकात्किञ्चित् न्यूनस्य अनुलोमसङ्कर जातिविशेषस्य आधाने अधिकारोऽस्तीति शेषः । क्षत्रियाद्वैश्यायां जातो माहिष्यः । वैश्येन शूद्रायां जाता करणी । माहिष्येण करण्यां जातो रथकारः । "माहिष्येण करण्यान्तु रथकारः प्रजायते" इति याज्ञ० (१।९२) स्मृतेः ॥ ९ ॥

ननु रथकारशब्दो न जातिविशेषवाची—किन्तु रथं करोतीति व्युत्पत्त्या त्रैवर्णिकवाची। एवं च सति 'वर्षासु रथकार आदधीत' (आप० श्रौ० ५।३।१८) इति वाक्ये कालमात्रविधानाद्वाक्यभेददोषोऽपि परिहृतो भवति । अन्यथा जात्यन्तरवाचित्वे तस्याधानसम्बन्ध ऋतुसम्बन्धश्च इत्युभयमपि विधातव्यं भवतीति वाक्यभेददोषो दुष्परिहरः स्यात् इत्याशङ्क्याह—

नियतं च ॥ १० ॥

चशब्दो वा-शब्दार्थे पक्षव्यावृत्तौ । नियतं = रूढं, रथकारपदं जातिविशेषे रूढम् । रूढिश्च योगाद्बलीयसी । अतो जातिविशेष एव रथकारो न त्रैवर्णिकः । यदुक्तं वाक्यभेद इति, तत् कालविशिष्टाधानविधाने न दोषः ॥ १० ॥

एवमपि विशिष्टविधाने गौरवमस्त्येव । तदपेक्षया । ऋतुमात्रविधाने लाघवात् इत्याशङ्क्याह—

नाभावादिति वात्स्यः ॥ ११ ॥

न त्रैवर्णिको रथकारः । कुतः ? यौगिकशब्दस्य रूढिबाधने सामर्थ्याभावात् । वात्स्यग्रहणं स्वमतदृढीकरणार्थम् ॥ ११ ॥

[स्थपतिनिषादस्य गावेधुकेष्टावधिकारः]

निषादस्थपतिर्गावेधुकेऽधिकृतः ॥ १२ ॥

निषादश्चासौ स्थपतिश्चेति निषादस्थपतिः । निषाद-जातिरूपोऽधिपतिश्च यो भवति स गावेधुके—"यस्य रुद्रः पशून् शमयेत् स गावेधुकं चरुं निर्वपेत्" (मैत्रा० २.४.२)—इति विहिते यागेऽधिकृतो भवति । अत्र निषादानां स्थपतिरिति षष्ठीतत्पुरुषाङ्गीकारे यद्यपि त्रैवर्णिक एव कश्चिदधिकारी भवति, तथापि तत्पुरुषाङ्गीकारे पूर्वपदे लक्षणा-रूपदोषापत्त्या तां लक्षणानापादकः कर्मधारय एवाङ्गीकृतः ॥ १२ ॥

[ब्रह्मचारिणः स्त्रीसङ्गे गर्दभेज्या आज्याहुती वा प्रायश्चित्तम्]

वाऽवकीर्णिनो गर्दभेज्या ॥१३॥

ब्रह्मचारी सन् यः स्त्रियमुपैति सोऽवकीर्णी। तस्य गर्दभयागो नैमित्तिक इति शे अत्र वा-शब्दो विकल्पवाची, पारस्करगृह्ये (का० ३। कं० १२) आहुत्योर्विधानात्। ता सह गर्दभयागस्य विकल्प इत्यर्थः ॥१३॥

[स्थपतीष्टौ अवकीर्णिपशौ च लौकिकाग्न्यादीनामङ्गत्वम्]

अनन्तरोक्तयोः स्थपत्यवकीर्णिनोराधानाभावेन अग्न्यभावात् कुत्र ताभ्यां यागः क इति शङ्कायां वैदिकत्वाऽविशेषात् दर्शपूर्णमासतोऽङ्गग्रहणाच्च तद्वदाधानसंस्कृते एव अ कर्तव्यः, तदर्थं चाधानमपि ताभ्यां कर्त्तव्यमेवेति प्राप्ते आह—

लौकिके ॥१४॥

एतदुभयमपि लौकिकेऽग्नौ स्यात न त्वाधानसिद्धे आहवनीयादौ। अयं भावः—सत दर्शपूर्णमासत एवाङ्गग्रहणं, तथापि दर्शपूर्णमासयोर्यान्यङ्गानि तान्येवात्रातिदिश्यन्ते, त्वाधानमपि। तस्य अनारभ्याधीतस्वतन्त्रविहितत्वेन दर्शपूर्णमासानङ्गत्वात्। अनेन न्याये व्रात्यस्तोमा अपि लौकिकाग्नावेव भवन्तीति बोध्यम् ॥१४॥

गर्दभेज्याङ्गभूतपशुपुरोडाशश्रपणस्य दर्शपूर्णमासविकृतित्वात् ततः कपालो पुरोडाशश्रपणे प्राप्ते तद्बाधित्वा श्रपणस्य स्थानान्तरं विधत्ते—

भूमौ पशुपुरोडाशश्रपणम् ॥१५॥

'यद्देवत्यः पशुस्तद्देवत्यः पुरोडाशः' (शत० ३-८-३-१) इति विधानात् गर्दभपशुसं न्धिनः पुरोडाशस्य श्रपणं भूमौ अङ्गारेषु कार्यम्, न कपालेषु इत्यर्थः ॥१५॥

अप्स्ववदानहोमः ॥१६॥

अवदानानां हृदय-जिह्वादीनां होमो जले कार्यो नाग्नौ। आघाराज्यभागहोमादिकं अग्नावेव कार्यम्, अवदानग्रहणात् ॥१६॥

शिश्नात्प्राशित्रावदानम् ॥१७॥

गर्दभस्य शिश्नात् प्राशित्रस्य ब्रह्मभागस्यावदानं कुर्यात् न हृदयादिभ्यः ॥१७॥

[स्मार्त्तानां कर्मणामौपासनाग्नौ कर्त्तव्यता नाहवनीयादिषु]

एवं कर्त्रधिकारं निरूप्य अग्न्यधिकारं निरूपयितुमारभमाणस्तत्र पूर्वपक्षयति—

वैतानिकेषु सर्वं सर्वार्थत्वात् ॥१८॥

वैतानिका वितानार्हा आधानसंस्कृता गार्हपत्याऽऽहवनीयदक्षिणाग्नयः, तेषु सर्वं श्रौ स्मार्त्तं च कर्म कार्यम्। कुतः? सर्वार्थत्वात्। सर्वकर्मार्थत्वावगमात्। कुत इति चेत्? य द्रव्यं येन संयुक्तं सद् विधिना बोध्यते, तस्यैव तदर्थत्वं निर्णेतुं शक्यते। अग्नयस्तु न केना विशिष्टाः श्रुताः। किन्तु स्वतन्त्रविधिविधेयाः। अतश्च विशेषाऽदर्शनात् अग्निसाध्येषु स ष्वपि कर्मसु श्रौतानामेवाग्नीनां प्रवर्तनम् इति ॥१८॥

अत्र लिङ्गदर्शनमप्यस्तीत्याह—

दर्शनाच्च ॥१९॥

वैतानिके दक्षिणाग्नौ मांसपाकनिषेधरूपस्य लिङ्गस्य दर्शनादित्यर्थः। अयं भावः—श्रुतौ दक्षिणाग्निं प्रकृत्य "मांसं न पचेयुः" इति निषेधः श्रूयते। प्रतिषेधश्च प्राप्तिसापेक्षः, न चात्र वैदिकस्य मांसपाकस्य प्राप्तिरस्ति, सर्वोऽपि श्रौतो मांसपाकः शामित्रेऽग्नौ[1] विहितः। अतश्च स्मार्त्तस्यैव मांसपाकस्य प्रसक्तिरस्ति तस्यैव प्रतिषेध इति वक्तव्यम्। एवं च अनेन लिङ्गेन स्मार्त्तान्यपि कर्माणि अत्र क्रियन्त इत्यवगम्यते ॥ १९ ॥

एवं प्राप्ते सिद्धान्तयति—

नौपासनश्रुतेः ॥२०॥

न स्मार्त्तमपि वैतानिकेऽग्नौ कर्त्तव्यम्। कुतः? औपासनश्रुतेः। आहिताग्नेरपि औपासन—(गृह्याग्नि) श्रवणात्। पितृमेधे "अद्वारेणौपासनं निरस्यति" (का० श्रौ० २१·४·२९) इति वक्ष्यति। राजसूयेऽपि "यः कामयेत राष्ट्रमस्यै प्रजायै स्यादिति तस्यौपासने प्रजुहुयात्" इति। यदि स्मार्त्तान्यपि कर्माणि वैतानिकेष्वेव क्रियेरन्, तर्ह्यौपासनस्य क्वचिदपि प्रयोजनाभावात् तस्य दर्शनं नोपपद्येत इति ॥२०॥

तर्हि किमर्थो मांसप्रतिषेध इत्यत आह—

अधिश्रयणीये मांसप्रतिषेधः ॥२१॥

यो मांसपाकप्रतिषेधः सोऽधिश्रयणीयाहर्विषयः—यस्मिन्दिने दक्षिणाग्नावधिश्रयणं विहितं तद्विषय इत्यर्थः। अयं भावः—आहवनीय-दक्षिणाग्न्योः सायं प्रातः प्रतिहोमं गार्हपत्यादाहरणं कार्यमित्येकः पक्षः। अथवा नवगृहे यदा वासः (प्रवेशः) क्रियते, तदा तस्मिन्नेवाहनि तत्र दक्षिणाग्नेराहरणं कार्यं नाहवनीयवत्प्रतिहोममिति वैकल्पिको द्वितीयः पक्षः। तदा च तस्मिन्नवगृहाहृते दक्षिणाग्नौ पाको विहितः। "नवावसिते वैनमाहरेयुस्तस्मिन्पचेयुस्तद्ब्राह्मणा अश्नीयुः" (शत० २-३-२-८) इति। पाक्यद्रव्यं चाविशेषान्मांसमपि भवतीति तस्यापि पाकप्रसक्तौ तस्यैव प्रतिषेधः। अतश्च स्मार्त्तस्य अप्रसक्तत्वात् केवलं श्रौतान्येव कर्माणि वैतानिकेऽग्नौ कर्त्तव्यानि। स्मार्तानि त्वावसथ्याग्नावेवेति ॥२१॥

इति कातीयश्रौतसूत्रवृत्तौ प्रथमाध्याये अधिकारनिरूपणी प्रथमा कण्डिका ॥१॥

———

एवं कर्मणां फलवत्त्वं तत्राधिकारिणं च निरूप्य इदानीं तस्यैव साङ्गस्य निरूपणं कर्त्तुमारभते—

[यागस्वरूपनिरूपणप्रतिज्ञा]

यज्ञं व्याख्यास्यामः ॥१॥

यज्ञस्वरूपं साङ्गं निरूपयाम इत्यर्थः ॥ १ ॥

[यागस्वरूपनिरूपणम्]

किं तद्यज्ञस्वरूपमत आह—

द्रव्यं देवता त्यागः ॥२॥

द्रव्यं = दधि-सोम व्रीहि-यवादि। देवता = अग्नीन्द्रादिः। त्यागः = तदुद्देशेन क्रियमाणः

---

[1] शामित्रः पशुश्रपणोऽग्निरुच्यते। तथा चापस्तंबः। '—अभिपर्यग्निकृते देश उल्मुकं निदधाति स शामित्रः' (७।१६।२-३)

स्वत्वनिवृत्त्यनुकूलो व्यापारः। इदमेव यागस्वरूपम्। देवतोद्देशेन द्रव्यत्यागरूपस्य यागपदार्थस्य पूर्वाचार्यैर्निरूपणात् ॥ २ ॥

[अफलयुक्तानामयागहोमरूपाणां यागाङ्गत्वनिरूपणम्]

तदङ्गमितरत् समभिव्याहार-प्रकरणाभ्याम् ॥३॥

यत् फलरहितत्वेन श्रुतं यागहोमादिभिन्नं तत्सर्वं तस्यैव फलवतः प्रधानस्य अङ्गम्। केन प्रमाणेन ? समभिव्याहारात् = वाक्यात्, प्रकरणाच्च। एकस्मिन्वाक्ये शेष-शेषिणोः सहोच्चारणं वाक्यम्। यथा "यस्य पर्णमयी जुहूर्भवति" (तै० ३-५-७) इत्यत्र पर्णताजुह्वोः सहोच्चारणात् पर्णताया जुह्वङ्गत्वम्।

उभयाकाङ्क्षा प्रकरणम्। यथा दर्शपूर्णमासयोरङ्गाकाङ्क्षा। तत्प्रकरणपठितानां च प्रयाजाद्यङ्गानां प्रयोजनाकाङ्क्षा। एवमाकाङ्क्षाद्वयेन अङ्गप्रधानयोः परस्परं संबन्धो भवतीत्यर्थः।

इदं च स्वस्वपूर्वप्रमाणकल्पनेनैव विनियोजकं भवति, तद्यथा—उभयाकाङ्क्षया अङ्गप्रधानयोः संबन्धोऽस्तीत्यवगम्यते। तत्प्रतिपादनार्थं च वाक्यं समभिव्याहाररूपं कल्पनीयम्, दर्शपूर्णमासौ प्रयाजाश्च परस्परं संबद्धा इति। अनन्तरम् असमर्थस्य अभिधानायोगात् सामर्थ्यरूपं लिङ्गं कल्पनीयम् इदमत्र समर्थम् इति। अनन्तरं च विनियोक्त्री श्रुतिः—प्रयाजादिभिर्दर्शपूर्णमासावुपकर्त्तव्यौ इति। एवं सर्वत्रापि उत्तरोत्तरप्रमाणेन पूर्वपूर्वप्रमाणकल्पनद्वारा विनियोजकत्वमवगन्तव्यम् इति। तत्र श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यारूपाणि षट् प्रमाणानि अङ्गाङ्गिभाव बोधकानि उक्तानि जैमिनिना। तेषु द्वयोरेवात्रोपादानं कृतं सूत्रकारेण, इतराणि तु तत्र तत्र सूत्रान्तरे उपादास्यति। अत इतरेषां परित्यागशङ्का न कार्या ॥ ३ ॥

[यागहोमरूपाणामपि अफलयुक्तानां यागाङ्गत्वम्]

एवं याग-होमातिरिक्तानामङ्गत्वं प्रतिपाद्य इदानीं यागहोमयोरपि तत्प्रतिपादयति—

यजतयश्चाऽफल—युक्तास्तदङ्गम् ॥४॥

यजतयो यागाः, चकाराद्धोमाश्च गृह्यन्ते। ये यागा होमा वा फलसंयुक्तत्वेन अश्रुताः ते सर्वेऽपि तदङ्गं फलसंयुक्त-प्रधानाङ्गमित्यर्थः ॥४॥

पूर्वसूत्रे याग-होमयोः प्रस्तुतत्वात् तयोर्भेदं सन्दिहानः पृच्छति—

यजति-जुहोतीनां को विशेषः ? ॥५॥

॥५॥ समाधत्ते—

तिष्ठद्धोमा वषट्कारप्रदाना याज्या-पुरोऽनुवाक्यावन्तो यजतयः ॥६॥

तिष्ठता होमो येषु ते, वषट्कारेण प्रदानं येषु ते, तथा याज्यावन्तः पुरोऽनुवाक्यावन्तश्च ये, ते यागा इत्युच्यन्ते ॥६॥

होमलक्षणमाह—

उपविष्टहोमाः स्वाहाकारप्रदाना जुहोतयः ॥७॥

उपविष्टेन होमो येषु, स्वाहाकारेण च प्रदानं येषु, ते जुहोतय इत्युच्यन्ते ॥७॥

एवमङ्गत्वस्य लक्षणमुक्त्वा तत्र "शेषमितरे यथाख्यम्" (का० श्रौ० १।७।२२) इत्यन्यत्र ऋत्विक्कर्तृकत्वे निरूपिते, ते ऋत्विजस्त्रैवर्णिका भवेयुः, उत ब्राह्मणा एव इति सन्देहे त्रैवर्णिकानां समर्थत्वात् विद्यावत्वाच्च ते भवेयुरिति पूर्वपक्षे प्राप्ते सिद्धान्तयति—

[ब्राह्मणानामेवार्त्विज्येऽधिकारः]

ब्राह्मणा ऋत्विजो भक्षप्रतिषेधादितरयोः ॥८॥

ब्राह्मणा एव ऋत्विजो भवेयुः । कुतः ? क्षत्रियवैश्ययोर्भक्षप्रतिषेधात् । अग्निहोत्र-हविःशेषे "तद्वै नाऽब्राह्मणः पिबेत्" (श० २-३-१-३९) इति भक्षणस्य निषेधादित्यर्थः । एवं च भक्षणव्यावृत्त्या कर्तृत्वमपि व्यावर्त्यत इति भावः ॥८॥

दर्शनाच्च ॥९॥

"द्वया वै देवा" इति श्रुतौ "आहुतिभिरेव देवान्प्रीणाति दक्षिणाभिर्मनुष्य-देवान्" (श० २-२-२-१६) इति मनुष्यदेवपदवाच्यानां ब्राह्मणानामेव दक्षिणासंबन्धदर्शनादित्यर्थः ।

'क्षत्रियो याजको यस्य चण्डालस्य विशेषतः ।
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः ।' इति (रामा० बा० का० ५९-१४)
'राजयाजकयाज्यस्य विनश्यति तथा हविः' इति
स्मृतिश्चात्र प्रमाणम् ॥९॥

[फलयुक्तकर्मानुष्ठाने याथाकाम्यम्]

एतावता कर्मणां स्वरूपं, तेषां फलवत्त्वं, तत्राधिकारिणं, ऋत्विजं च निरूप्य इदानीं कर्मणामनुष्ठानविषयश्चिन्त्यते । तत्र फलयुक्तानां कर्मणामनुष्ठानमवश्यं कर्त्तव्यम् ? उत इच्छाधीनम् ? इति सन्देहे पूर्वपक्षयति—

फलयुक्तानामारम्भे याथाकामी फलार्थित्वात् ॥१०॥

फलविशिष्टतया श्रुतानां काम्यानां कर्मणामनुष्ठाने याथाकामी भवेत् । सत्यामिच्छाया-मनुतिष्ठेत, अन्यथा नेत्यर्थः । कुतः ? फलार्थित्वात् । फलाभिलाषिणं प्रत्येव विहितत्त्वात् ॥१०॥

[नियमादिषु न याथाकाम्यम्]

एवं सर्वकर्मसु इच्छयाऽनुष्ठानप्राप्तावाह—

न नियम-निमित्ताग्निहोत्र-दर्शपूर्णमास-दाक्षायणाग्रयण-पशुषु प्रवृत्तेः ॥११॥

'सत्यवादी स्यात्' 'अधःशायी स्यात्' (श० १-१-६) इत्यादिषु नियमेषु न याथाकाम्यम् । कुतः ? तदुद्देशेनैव शास्त्रस्य प्रवृत्तेः । यदि नियमेनानुष्ठानं न स्यात्, तर्हि विधेर्वैयर्थ्यमापद्येत । एवमेव "यस्याहिताग्नेरग्निर्गृहान् दहेत् सोऽग्नये क्षामवतेऽष्टाकपालं पुरोडाशं कुर्यात्" (तै० २-२-३) इत्यादिनिमित्तसत्त्वे "यावज्जीवमग्निहोत्रं जुहोति" आप० श्रौ० ३।१४।११) इत्यग्निहोत्रहोमे, "यावज्जीवं दर्शपूर्णमासाभ्यां यजेत" (आप० श्रौ० ३।१४।११) इति दर्शपूर्ण-मासयोः, दाक्षायणयज्ञे, आग्रयणेष्टौ, निरूढपशुबन्धे च न याथाकाम्यम् । अग्निहोत्र-दर्शपूर्ण-मासयोर्यावज्जीवश्रुतिचोदनात्, आग्रयणादिष्वकरणे प्रत्यवायश्रवणात्, प्रायश्चित्तविधानाच्च न याथाकाम्यमिति ध्येयम् । यद्यपि "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यादिना फलार्थ-तयाऽपि श्रवणमस्ति, तथापि स पृथक् काम्यः प्रयोगः । अयं ततो भिन्न इति वेदितव्यम् । तत्र काम्येऽपि क्रियमाणे नित्यस्य तेनैव गतार्थतेत्यपि बोध्यम् ॥११॥

सोमे चैके ॥ १२ ॥

सोमेऽपि याथाकाम्यं नेति केचिन्मन्यन्ते । तत्रापि 'वसन्ते वसन्ते ज्योतिषा यजेत' (आप० श्रौ० १०.२५) इत्यभ्यासश्रवणादिति भावः ॥ १२ ॥

चातुर्मास्येषु चर्त्तुमुखश्रुतेः ॥ १३ ॥

चातुर्मास्येष्वपि न याथाकाम्यम्। कुतः ? "ऋतुमुखे ऋतुमुखे चातुर्मास्यैर्यजेत" इति शाखान्तरेऽभ्यासश्रवणात् ॥ १३ ॥

नियतसहपाठात् ॥ १४ ॥

नियतैर्दर्शपूर्णमासादिभिः सह पठितत्वाच्च। एवं च प्रायपाठादपि चातुर्मास्यानां नित्यत्वमिति भावः ॥ १४ ॥

दर्शनाच्च ॥ १५ ॥

गवामयनप्रकरणे-"कथमेषां सोमोऽनन्तरितो भवति ?" इति प्रश्नं कृत्वा "पयस्ययेति ब्रूयात्" (श० १२-३-५-८) इति तत्र समाधानकरणेन नित्यत्वदर्शनादित्यर्थः। अयं भावः— गवामयनं संवत्सरसत्रं, तस्य फाल्गुन्यां दीक्षारम्भे कृते ततः प्रभृति संवत्सरपर्यन्तं साङ्गस्यैव तस्य गवामयनस्यानुष्ठेयतया मध्ये अन्यस्य कस्यचिदनुष्ठाने "वि वा एतस्य यज्ञश्छिद्यते यदन्यस्य तन्त्रे अन्यस्य तन्त्रं प्रतायते" (आप० श्रौ० ६।४।४) इति "दीक्षितो न जुहोति न ददाति" (का० सं० श्रौ० ३।६।५) (आप० श्रौ० १०।१४।३) इति श्रुत्या च मध्ये अन्यस्य करणे दोषापत्त्या चातुर्मास्यानामकरणापत्तौ नित्यस्याकरणे प्रत्यवायापत्त्या कथमेषां स्वरूपसम्पत्तिः कर्तुं शक्यत इति प्रश्नस्याभिप्रायः। गवामयनमध्ये पयस्यायागस्याप्यभिधानात्तेनैव चातुर्मास्यस्वरूपस्य सिद्धत्वान्न पृथगननुष्ठानेऽपि दोष इति समाधानार्थः। एवं च नित्यत्वे सत्येव तेषामनुष्ठाने प्राप्ते प्रकारान्तरेणानुग्रहोक्तिर्युक्तेति भावः ॥१५॥

एवं सिद्धान्तिते पुनः पूर्वपक्षी प्रत्यवतिष्ठते—

नोत्सर्गयोगात् ॥ १६ ॥

न चातुर्मास्यानि नित्यानि भवितुमर्हन्ति। कुतः? उत्सर्गयोगात्। "इति नूत्सृजमानस्य" (श० २-६-३-१२) इति उत्सर्गविधानात्। नित्यत्वे यावज्जीवकर्त्तव्यतया मध्ये उत्सर्गविधानमनुपपन्नं स्यादित्यर्थः ॥ १६ ॥

समाधत्ते—

स्यात् त्रिंशद्वत् ॥ १७ ॥

नित्यत्वे सत्यपि उत्सर्गो भवत्येव। कथम् ? त्रिंशद्वत्। नित्ययोरपि दर्शपूर्णमासयोः "त्रिंशतमेव वर्षाणि यजेत" (श० ११-१-२-१३) इति त्रिंशद्वर्षानन्तरं यथा उत्सर्गो विहितस्तद्वदित्यर्थः ॥ १७ ॥

[नित्यं कर्म यथाशक्ति साङ्गं कर्त्तव्यम्]

एवं नित्येषु कर्मसु याथाकाम्याभावे निरूपिते तानि साङ्गानि कर्त्तव्यानि ? उत निरङ्गानि ? इति संशये गुणाम्नानबलात् साङ्गान्येव कर्त्तव्यानीति पूर्वपक्षे प्राप्ते सिद्धान्तयति—

विगुणे फलनिर्वृत्तिरङ्गप्रधानभेदात् ॥१८॥

नित्ये कर्मणि विगुणेऽपि फलोत्पत्तिर्भवत्येव। कुतः ? अङ्गप्रधानभेदात्। "यावज्जीवं दर्शपूर्णमासाभ्यां यजेत" (आप० श्रौ० ३।१४।११) इति वाक्येन हि प्रधानयोरेव यावज्जीवरूपनिमित्तसंबन्धः श्रूयते, न त्वङ्गानाम्। अतः प्रधानमात्रकरणे समर्थोऽपि नित्येऽधिकारीति। तर्हि किमर्थमङ्गाम्नानमिति चेत्, काम्यप्रयोगार्थमित्यदोषः ॥१८॥

प्रायश्चित्तविधानाच्च ॥१९॥

प्रायश्चित्तविधानादपि नित्यस्य विगुणस्य फलजनकत्वमस्तीत्यवगम्यते । अग्निहोत्र-होमप्रकरणे स्थालीभेदने हविषि स्कन्ने च "भिन्ने जुहोति" "स्कन्ने जुहोति" (का० श्रौ० २५-२-५) इति भेदनादिजन्यदोषनिर्घातार्थत्वेन प्रायश्चित्तं विहितम् । यदि विगुणस्य नित्यस्य फलजनकत्वं न स्यात्, तर्हि अनुष्ठितेऽपि प्रायश्चित्ते वैगुण्यसमाधानाभावेन प्रायश्चित्त-विधानमेव नोपपद्येत इति ॥१९॥

तथा च दृष्टम् ॥२०॥

विगुणमपि कर्म यथा कथंचित्परिश्रुताङ्गत्यागेनापि परिसमापनीयतया दृष्टमेव । 'यत्पयो न स्यात्केन जुहुया' (श० ११-३-१-३) इत्यारभ्य श्रुतद्रव्याभावे येन केनापि यज्ञिय द्रव्येण अनिषिद्धेन होमस्यावश्यकर्त्तव्यतया प्रतिपादनादिति भावः ।

अस्यान्यापि व्याख्या—विगुणेऽपि नित्ये फलनिष्पत्तिर्दृष्टैव । यदि दैवान्मानुषाद्वा कस्माच्चिदपराधान्न सर्वाङ्गानुष्ठानं संभवति, तदा यावन्ति कर्तुं शक्यन्ते तावतां करणेऽपि फलनिष्पत्तिर्भवत्येव । अतो नित्येऽप्यङ्गसंबन्धो भवत्येव ॥२०॥

[काम्यं कर्म साङ्गमेवानुष्ठेयम्]

एवं नित्ये कर्मणि यथाशक्त्युपबन्धे निरूपिते तेनैव न्यायेन विगुणस्य काम्यस्यापि अङ्गप्रधानरूपेण भिन्नत्वात्, प्रायश्चित्तदर्शनात् विगुणादपि वृष्टिकामनया (बौ० श्रौ० १३।२६-४०) विहितस्य कारीर्यादेः फलदर्शनाच्च तस्यापि विगुणस्य फलजनकत्वमस्त्येवेति पूर्वपक्षे प्राप्ते आह—

न श्रुतिलक्षणत्वात् ॥२१॥

विगुणेऽपि काम्ये फलं निष्पद्यत इति न । कुतः ? श्रुतिलक्षणत्वात् । श्रुतौ हि "चित्रया यजेत पशुकाम" (तै० २-४-६) इत्यादौ तृतीयानिर्देशात् धात्वर्थरूपस्य यागस्य फलं प्रति करणत्वमवगम्यते । तच्च करणत्वं स्वसर्वाङ्गविशिष्टस्य एकप्रधानस्य भवितुमर्हति, केवलेन प्रधानेन फलोत्पत्त्यङ्गीकारे अङ्गविधीनां वैयर्थ्यप्रसङ्गात् । अतश्च साङ्गमेव कर्म फलसाधनमित्य-वगम्यते । तत्र नित्ये कर्मणि यावज्जीवश्रुतिचोदितत्वात् यावज्जीवं केनापि पुरुषेण साङ्गं कर्मा-नुष्ठातुं न शक्यत इति तत्र यथाशक्त्युपबन्धकल्पनेऽपि काम्ये तथा उपकल्पने प्रमाणा-भावेन तत्र साङ्गस्य फलजनकत्वमिति ॥ २१ ॥

प्रायश्चित्तविधानं तर्हि किमर्थमित्यत आह—

प्रायश्चित्तं तत्कालम् ॥२२॥

काम्यारम्भोत्तरं फलप्राप्तावपि तस्यावश्यं परिसमाप्तिः कर्त्तव्या । अन्यथा शिष्टविग-र्हणापत्त्या तत्सूचितदोषपरिहारार्थं प्रायश्चित्तविधानमर्थवदित्यर्थः । ॥२२॥

दृष्टे तत्परिमाणम् ॥२३॥

यद् विगुणात् कर्मणः फलं दृष्टं, न तत् कर्मफलम्, किन्तु स्वाभाविकम् । अतो यावत् कर्मणः परिमाणं तावदनुष्ठेयमेवेत्यर्थः ॥२३॥

इति कातीयश्रौतसूत्रवृत्तौ प्रथमे परिभाषाध्याये साङ्गयज्ञस्वरूपादिनिरूपणी द्वितीया कण्डिका ॥२॥

[मन्त्रलक्षणम्]

मन्त्राणामिदानीं लिङ्गाद्विनियोगं वदन् तेषां स्वरूपनिर्णये अध्येतृप्रसिद्धिं विना अन्यत्प्रमाणं किमपि अव्यभिचरितमपश्यन् अध्येतृप्रसिद्धिमेव शरणीकुर्वाणस्तत्प्रसिद्धानेव मन्त्राननुवदति—

ऋचो यजूंषि सामानि निगदा मन्त्राः ॥ १ ॥

पादैश्छन्दोभिश्च बद्धा ऋचः। अनियताक्षराण्यपादबद्धानि च यजूंषि। प्रगीता मन्त्राः सामानि। 'ऋच्यध्यूढं साम गीयते' (छा० १-६-३) इत्यनेन ऋगक्षराणामुपरि सामानि गीयन्ते। तत्र गीत्यंशानामेव सामशब्दवाच्यत्वम्, न ऋगक्षराणामपि। गीतेस्तत्र विशेषणत्वात्। आकृत्यधिकरणे (पू० मी० १-२-१४) विशेषणे एव शक्तेः स्थापितत्वात्। अतएव रथन्तरादिशब्दानां गीतिमात्रवाचित्वम्, नतु तद्विशिष्टऋगक्षराभिधायित्वम्। 'अग्नीदग्नीन्विहर' (श० ४-२-५-११) इत्यादयः प्रैषा निगदशब्देनोच्यन्ते। इमे एव मन्त्रा इत्यर्थः ॥१॥

[यजुषां लक्षणम्]

ऋक्सामयोर्वाक्यरूपत्वादेव तत्र कियदवधि वाक्यमित्याशङ्काया अभावात्, यजुषां तथात्वाभावेन तत्र वाक्यव्यवस्थासंशये वाक्यलक्षणमाह—

तेषां वाक्यं निराकाङ्क्षम् ॥ २ ॥

तेषां यजुषां यावति पदसमूहे उच्चारिते पदान्तराकाङ्क्षा न उदेति तावत्पर्यन्तमेकं वाक्यम्। यथा 'देवस्यत्वेत्यादि अग्नये जुष्टं गृह्णामि' (शु० य० १. १०) इत्येतत्पर्यन्तम्। तत्र हि एकस्यापि पदस्य परित्यागे साकाङ्क्षमेव भवत्यन्यत्पदजातम्। उक्ते तु तस्मिन् निराकाङ्क्षं भवति ॥ २ ॥

[अध्याहारो मन्त्रेषु कार्यः]

मिथः संबद्धम् ॥ ३ ॥

यत्र श्रूयमाणैः पदैराकाङ्क्षाशान्तिर्न भवति तत्र तच्छामकं तैः संबद्धुं योग्यं पदमध्याहर्त्तव्यमित्यर्थः ॥ ३ ॥

[अर्थानुसारेण मन्त्रविनियोगः]

एवं मन्त्रस्वरूपे उक्ते तेषां कुत्र विनियोग इत्याकाङ्क्षायामाह—

तेषामारम्भेऽर्थतो व्यवस्था तद्वचनत्वात् ॥४॥

तेषां मन्त्राणां तत्तत्प्रकरणाम्नातानामारम्भे विनियोगे अर्थतः तत्तन्मन्त्रप्रतिपाद्याऽर्थानुरोधेन व्यवस्था कर्त्तव्या। कुतः? तद्वचनत्वात्। तादृशार्थप्रतिपादकत्वात् ॥ ४ ॥

[मन्त्रान्ते कर्म कर्त्तव्यम्]

मन्त्रान्तैः कर्मादिः सन्निपात्योऽभिधानात् ॥५॥

अनुष्ठेयार्थस्मरणार्थत्वेन विनियुक्तानां मन्त्राणामनुष्ठानकाले प्रयुज्यमानानामन्तैः सह कर्मणामादिः संबन्धनीयः। मन्त्रमुच्चार्य तत्समाप्तिक्षणे एव यागादिक्रियाऽनुष्ठेयेत्यर्थः। कुतः? अभिधानात्, समग्रमुच्चरितस्यैव मन्त्रस्य अर्थाभिधाने सामर्थ्यादित्यर्थः ॥ ५ ॥

अनियमं वात्स्यः ॥६॥

वात्स्य आचार्योऽस्मिन्विषये अनियमं मनुते। आदौ मन्त्रमुच्चार्य वा कर्मानुष्ठीयताम्, कर्म कृत्वा वा मन्त्र उच्चार्यताम्। नात्र नियमः कश्चिदित्यर्थः ॥६॥

आदिं त्वाचार्याः ॥७॥

आचार्याः मन्त्रान्ते एव कर्मणामादिं संबन्धनीयं युक्तं मन्वते । तदानीमेव मन्त्रेण स्मृत्वा कर्त्तव्यं कर्म सङ्गतं भवति । अन्यथा मन्त्रस्यादृष्टार्थताऽऽपद्येतेत्यर्थः ॥७॥

[सूत्रे मन्त्रस्यादिमात्रोपादाने सर्वो मन्त्रः प्रयोज्यः]

त आयुक्ताः ॥८॥

ते मन्त्राः सूत्रमध्ये आदिमात्रेण प्रतीकेनोक्ताः सन्तः प्रयोगकाले सकलाः प्रयोज्याः । न तु सूत्रमध्ये यावानवयव उपात्तस्तावानेव इति ॥८॥

[उत्तरमन्त्रस्यादिना पूर्वमन्त्रसमाप्तिः]

परादिना पूर्वान्तः ॥९॥

परस्य मन्त्रस्य सूत्रोपात्तेन आदिना चिन्हभूतेन पूर्वस्य मन्त्रस्यान्तो ज्ञेयः ॥ ९ ॥

[ऋक्साममन्त्राणामुच्चैः पाठः याजुर्वैदिकानामुपांशु]

उपांशु प्रयोगः श्रुतेः ॥१०॥

यजुर्वेदमन्त्राणामग्निहोत्रादौ प्रयुज्यमानानामुपांशु उच्चारणं कार्यम् । कुतः । श्रुतेः, 'उच्चै र्ऋचा क्रियते उच्चैः साम्ना उपांशु यजुषा' (सत्या० सू० १-१-१) (का० सं० ३।६।५) इति श्रवणादित्यर्थः । इष्टि-पशु-सोमेषु विशेषस्य वक्ष्यमाणत्वात्र तेष्वस्य सूत्रस्य प्रवृत्तिः ॥१०॥

[प्रैषाणामुच्चैः पाठः]

न सम्प्रैषाः ॥११॥

'प्रोक्षणीरासादय' (शु० य० १-२८) इत्यादिका याजुर्वैदिका अपि प्रैषा उपांशु नोच्चार्याः ॥११॥

[बर्हिःशब्दो जातिनिमित्तो न संस्कारनिमित्तः]

यत्र वेदे बर्हिःशब्दः श्रुतो 'बर्हिस्तृणाति' (श० १-३-६-७) इत्यादौ, तत्र बर्हिः शब्दो लवनादिसंस्कारसंस्कृतार्थवाची ? उत दर्भत्वजातिमात्रवाची ? इति सन्देहे याज्ञिकैः संस्कृतेष्वेव तृणेषु बर्हिः शब्दप्रयोगात् तस्य संस्कारवाचित्वमेव । यद्यपि 'बर्हिरादाय गावोगता' इति जातिमात्रे ऽपि क्वचित्प्रयोगो दृश्यते, तथापि तत्र तादृशदर्भसादृश्यात् प्रयोग इति पूर्वपक्षे प्राप्ते सिद्धान्तयति—

कौशं बर्हिः ॥१२॥

कुशा एव कौशम् । स्वार्थेऽण् । कुशा एव बर्हिः शब्देनोच्यन्ते न संस्काराः । संस्काररहितेषु केवलेष्वपि बर्हिःशब्दप्रयोगात् । जातिमपहाय केवलसंस्कारेषु क्वापि प्रयोगाऽदर्शनात् । एवं चिन्तायाः प्रयोजनं, पशुयागे "बर्हींषि प्राचीनाग्राणि चोदीचीनाग्राणि चावस्तृणाति" (श० ३-७-१-७) इति श्रुतं यूपावटस्तरणं केवलैरेव दर्भैः कर्त्तव्यं न संस्कृतैरिति १२॥

[परिमाणानुक्तौ सामर्थ्यानुसारेण तत्कल्प्यम्]

अर्थात्परिमाणम् ॥१३॥

यत्र बर्हिर्हविर्द्रव्य-वेदि-स्रुगादीनां किमपि परिमाणं नोक्तं तत्र यावता परिमाणेन प्रयोजनं सिद्ध्यत् तावत्परिमाणं कल्पनीयम्। यथा—वसोर्द्धाराहोमे स्रुक्परिमाणस्य अनुक्तत्वात् तत्र शुष्केष्टिवत् प्रयोगाद्बहिरेव "वाजश्चम इत्यत आरभ्य वेट् स्वाहा" (शु० य० १८, १—२९) इत्यन्तं पठता कस्मिंश्चित्पात्रे सन्ततं घृतं पातनीयम्, तस्याज्यस्य तोलनाद्युपायेन परिमाणं निश्चित्य तावदाज्यपरिमाणा स्रुक्कार्येति भावः ॥१३॥

यूननिर्माणप्रकारमाह—

अयुग्धातूनि यूनानि ॥१४॥

यूञ् बन्धने। यूनं सन्नहनम्, यज्ञियकाष्ठानां बर्हिषां च बन्धनार्था कुशनिर्मिता रज्जुरिति यावत्। सा च रज्जुर्विषमसङ्ख्याकतृणमुष्टिभिर्निर्मातव्या। यागे वेद्यामास्तरणीयस्य बर्हिषो बाहुल्यात् तद्बन्धनार्था रज्जुरपि बहुभिः कुशमुष्टिभिरयुग्मसङ्ख्याकैर्निर्मातव्येति भावः। अयुञ्जि धातूनि तृणमुष्टिप्रक्षेपा येषु तानीति। साम्प्रतं तु याज्ञिकैर्नवभिः कुशैर्यूनं निष्पाद्यते ॥१४॥

बर्हिषो बन्धनप्रकारमाह—

प्रागग्रे यून उदगग्रं बर्हिराचिनोति ॥१५॥

प्रागग्रां रज्जुं प्रसार्य तत्र उदगग्रं बर्हिर्निधाय बन्धनीयम् ॥१५॥

इध्मबन्धनप्रकारमाह—

उदगग्रे प्रागग्रमिध्मम् ॥१६॥

हस्तमिताः पलाशादि-वृक्षीयाः अष्टादश समिधः इध्मशब्देनोच्यन्ते। उदगग्रं यूनं प्रसार्य तत्र प्रागग्रमिध्मं निधाय बध्नीयात् ॥१६॥

प्रत्यग्ग्रन्थीनवगूहति ॥१७॥

इध्मं बर्हिश्च यूनेन गाढं बद्ध्वा यूनस्याग्रमूले एकीकृत्य एकीकृते अग्रमूले इध्मबर्हिषोः पश्चाद् (मूल) भागेन रज्वा अधः प्रोतयित्वा प्रेरयेत् ॥१७॥

इध्मलक्षणमाह—

अष्टादशेध्मं परिधिवृक्षाणाम् ॥१८॥

परिधिवृक्षाणां वक्ष्यमाणानाम् (का० श्रौ० २. ८. १) सम्बन्धीनि हस्तमितान्यष्टादश काष्ठानि इध्मः प्रत्येतव्यः ॥१८॥

एकविंशतिं वा ॥१९॥

अथवा एकविंशतिसङ्ख्यकाष्ठक इध्मः कर्त्तव्यः ॥१९॥

ततः परिधीनेके ॥२०॥

एके आचार्या एकविंशतिसङ्ख्यकाष्ठकादिध्मात् त्रीणि काष्ठानि परिधित्वेनेच्छन्ति। पारिशेष्यादष्टादश काष्ठानि इध्मः। अन्येतु एकविंशति काष्ठानि इध्मः। परिधयस्तु पृथग् बाहुमात्रा इति ॥२०॥

अपरिमितं प्रणयनीयं त्रियूनम् ॥२१॥

गार्हपत्यैकदेशस्य आहवनीयं प्रति नयनं प्रणयनम्, तच्च प्रणनयनं चातुर्मास्यादौ इध्मेनाग्निं गृहीत्वा कर्त्तव्यं न कर्परादिनेति वक्ष्यति (का०५।४।२)। प्रणयनार्थमिध्मं प्रागुक्तेध्मकाष्ठसङ्ख्यापेक्षया अधिकतरकाष्ठवन्तं, तिसृभिः सन्नहनरज्जुभिर्बद्धं च कुर्यात् ॥२१॥

[वेदबन्धनकालः]

निरुप्याज्यं वेदोऽसीति यजमानो वेदं करोति ॥२२॥

दर्शपूर्णमासादौ आज्यनिर्वापानन्तरं वेदबन्धनं कार्यम् ॥२२॥

वेदबन्धनप्रकारमाह—

कुशमुष्टिꣳ सव्यावृत्तं वत्सजानु, त्रिवृतं, मूतकार्यं वा ॥२३॥

एकपञ्चाशत्कुशपत्राणां मुष्टिं गृहीत्वा वामपाणौ कृत्वा दक्षिणपाणिना प्रदक्षिणावृत्तं कृत्वा मध्यभागे मोटनद्वयकरणेन अपविद्धवत्सजानुसदृशं सम्पाद्य बध्नीयादित्येकः पक्षः। अथवा तं कुशमुष्टिं वेण्याकारेण बध्नीयादिति द्वितीयःपक्षः। अथवा स कुशमुष्टिः मूताकारः कार्यः। धान्यावापपात्रं तृणवर्त्यादिनिर्मितं मूतः तद्वत् क्रियत इति मूतकार्यस्तम् इति ॥२३॥

पशु-ब्रह्मवर्चसान्नाद्यकामा यथासङ्ख्यम् ॥२४॥

सव्यावृत्तं वत्सजानुसदृशं वेदं पशुकामः, त्रिवृतं ब्रह्मवर्चसकामः, मूताकारमन्नाद्यकामः कुर्यादित्यर्थः ॥२४॥

[अवश्यार्थकस्याङोऽभिविध्यर्थकत्वम्]

आमुष्मादिति कर्मसु तच्च ॥२५॥

पश्वादिकर्मसु यत्र यत्र "आप्रयाजेभ्यः" (का० ६. ४. १) इत्यादि सूत्रमध्ये प्रयोदयते तत्र तत्र आङ्संयुक्तं प्रयाजादिकमपि कर्म कर्त्तव्यं, अवधित्वेन न परित्याज्यमित्यर्थः। सर्वत्राङ् अभिविध्यर्थो न मर्यादार्थ इतिभावः ॥२५॥

[अन्तशब्दनिर्देशोऽपि अभिविध्यर्थः]

अन्तवचने च ॥२६॥

"शंय्वन्तं भवति" (का० श्रौ० ३.७१.३) "इडान्तं भवति" (का० श्रौ० ५.६.२५) इत्यादौ अन्तशब्दप्रयोगेऽपि अन्तशब्दसंयुक्तं शंय्विडादिकमपि कर्त्तव्यं न परित्याज्यम् ॥२६॥

[प्रतिकर्माहवनीयोद्धरणम्]

प्रतिकर्मोद्धरणमप्रसङ्गे ॥२७॥

सर्वेषु कर्मसु पृथक् आहवनीय-दक्षिणाग्न्योरुद्धरणं कर्त्तव्यम्। यदि अन्यार्थमुद्धृतेन अनपवृक्तेन = असमाप्तकर्मणा अग्निना प्रसङ्गात्सिद्धिर्न स्यात्। यथा प्रतिपदि पौर्णमासेष्ट्या यक्ष्यमाणस्य यजमानस्य पौर्णमास्यां प्रातरन्वाधानार्थमुद्धृतेऽग्नौ सायं प्रातर्होमस्य प्रसङ्गात्सिद्धिः ॥२७॥

अपवृत्तकर्मा लौकिकोऽर्थसंयोगात् ॥२८॥

अपवृत्तं समाप्तं कर्म यस्मिन् सोऽपवृत्तकर्मा। यदर्थमुपात्तोऽग्निस्तस्मिन्कर्मणि समाप्ते लौकिकः प्रत्येतव्यः वैदिकमाहवनीयत्वं ततोऽपयातीत्यर्थः। कुतः ? अर्थसंयोगात्। तेनैव प्रयोजनेन संयोगात्। अतश्च प्रतीष्टि पृथगेवोद्धरणमिति ॥२८॥

[अनारभ्याधीतानां प्रकृतिगामित्वम्]

सन्ति कानि चिदङ्गानि किंचित्प्रकरणमनारभ्य पठितानि, तेषां प्रकृतिमात्रार्थत्वम् ? उत प्रकृतिविकृत्युभयार्थत्वमिति संशये पूर्वपक्षयति—

अप्रकरणोत्पत्तिरनारभ्यवाद आश्रयित्वात्सर्वगुणः ॥२९॥

प्रकरणे उत्पत्तिर्यस्य स प्रकरणोत्पत्तिः तथा न भवतीत्यप्रकरणोत्पत्तिः कस्य चित्फ लवतः प्रधानस्य प्रकरणे अपठित इत्यर्थः। अत एव अनारभ्यवादः, स सर्वाङ्गः प्रकृति-विकृत्युभयार्थः स्यात्। कुतः ? आश्रयित्वात्, "पर्णमयी जुहूर्भवति" (तै० सं० का०३ प्र०५ अ०७) 'खादिरः स्रुवः' (का०श्रौ०१३-३२) इत्यादौ जुह्वादिकमाश्रित्यैव पर्णतादीनां प्रवृत्तत्वात्। जुह्वादीनां प्रकृतिविकृत्युभयसाधारण्यादिति भावः। एवं चानारभ्याधीतं सर्वं प्रकृतिविकृत्युभयगामीति फलितम् ॥२९॥

एवं पूर्वपक्षे प्राप्ते सिद्धान्तयति—

प्रकरणे चाविशेषात् ॥३०॥

च-शब्दः पूर्वपक्षव्यावृत्तौ। प्रकृतावेवानारभ्याधीतानां निवेशः। कुतः ? अविशेषात्— अविशेषेण जुह्वादिसाधारण्येन पर्णतादीनामपि अतिदेशेनैव विकृतावपि प्राप्तिसंभवात्। विकृतौ पुनर्विधाने पौनरुक्त्यापत्तेरिति भावः ॥३०॥

दर्शनाच्च ॥३१॥

अनारभ्याधीतानां प्रकृतिगामित्वे एव विकृतौ प्रयाजादिदर्शनमुपपद्यते। "तस्यै प्रयाजेषु तायमानेषु ब्राह्मणो वीणागाथी दक्षिणत" इत्युपक्रम्य तिस्रो गाथा गायति" (श० १३-४-२-८) इति श्रुतिः। एवं च यदि प्रकृतित एव धर्मा आगच्छेयुः तदानीमत्र प्रयाजदर्शनमुपपन्नं स्यात्। अन्यथा अनारभ्यविधिसापेक्षत्वे प्रयाजादीनां प्राप्तिरेव तत्र न स्यादिति प्रयाजदर्शनमनुपपन्नं भवेत्।

विचारस्य प्रयोजनं, काम्यानां सामिधेनीकल्पानां (प्रकाराणां) उपदेशेन विकृतावपि प्राप्तत्वात् विकृतावप्यनुष्ठानं पूर्वपक्षे। सिद्धान्ते तु काम्यगुणस्य विकृतावतिदेशाऽभावात्, उपदेशेन च प्राप्त्यभावान्नानुष्ठानम् ॥३१॥

[स्रुवादिभिन्नानां होमसम्बन्धिपात्राणां वैकङ्कतत्वम्]

वैकङ्कतानि पात्राणि ॥३२॥

सर्वाणि यज्ञपात्राणि विकङ्कत-वृक्षकाष्ठघटितानि कर्त्तव्यानि इति उत्सर्गः ॥३२॥

[स्रुवादीनां खादिरत्वादिकम्]

अस्यापवादमाह—

खादिरः स्रुवः ॥३३॥ स्फ्यश्च ॥३४॥

च शब्दात् खादिर एव भवति ॥३३॥ ॥३४॥

पालाशी जूहूः ॥३५॥

हूयते अनया सा जुहूर्होमसाधनभूता स्रुक् पलाशवृत्तकाष्ठनिर्मिता कार्या ॥३५॥

आश्वत्थ्युपभृत् ॥३६॥

उपभृन्नाम्नी स्रुक् अश्वत्थकाष्ठेन निर्मातव्या ॥३६॥

[अहोमसंबन्धिनां पात्राणां वारणकाष्ठत्वम्]

वारणान्यहोमसंयुक्तानि ॥३७॥

यैः पात्रैर्होमो न क्रियते तानि पात्राणि वारणवृत्तकाष्ठघटितानि स्युः ॥३७॥

[स्रुगादीनां लक्षणानि]

बाहुमात्र्यः स्रुचः पाणिमात्रपुष्करास्त्वग्बिला हंसमुखप्रसेका मूलदण्डा भवन्ति ॥३८॥

सर्वा अपि स्रुचो जुहूपभृद्ध्रुवाप्रचरण्यग्निहोत्रहवण्याद्याः बाहुप्रमाणाः, पाणिप्रमाणमुखाः, त्वक्प्रदेशे बिलवत्यः, हंसमुखसदृशैकप्रणालिकाः, मूलदण्डा (अर्थादग्रमुखाः) कर्त्तव्याः ॥३८॥

अरत्निमात्रः स्रुवोऽङ्गुष्ठपर्ववृत्तपुष्करः ॥ ३९ ॥

अङ्गुष्ठपर्वप्रमाणेन वृत्तमुखः स्रुवः कार्यः ॥३९॥

स्फ्योऽस्याकृति,रादर्शाकृति प्राशित्रहरणं चमसाकृति वा ॥ ४० ॥

खड्गसदृशो वज्रः कार्यः । प्राशित्रं ब्रह्मणोभागः, तद् ह्रियते ऽनेनेति प्राशित्रहरणं, तत् दर्पणसदृशं वृत्तं भवति । तत्रावदान-विधानात् किञ्चित्खातवच्च भवति । अथवा चमसवत् चतुरस्रं भवतीति ॥ ४० ॥

[ऋत्विजां गमनागमनमार्गः सोत्तरवेदिकयागेषु]

चात्वालोत्करावन्तरेण सञ्चरः ॥ ४१ ॥

वरुणप्रघास-महाहविः—पशु-सोमादौ चात्वालोत्करयोरन्तरालेन सर्वेषां विहितकार्यार्थं गमनागमनमार्गो भवति ॥ ४१ ॥

[ऋत्विजामिष्टिषु गमनागमनमार्गः]

प्रणीतोत्कराविष्टिषु ॥ ४२ ॥

दर्शपूर्णमासादिषु प्रणीतोत्करयोरन्तरालेन सर्वैर्गन्तव्यम् ॥४२॥

इति कातीयश्रौतसूत्रवृत्तौ तृतीया कण्डिका ॥३॥

[काम्ये प्रतिनिधिर्नास्ति]

काम्ये कर्मणि विहितद्रव्यस्य अभावे तत्सदृशेन द्रव्यान्तरेण यागः कर्त्तव्यः ? उत तदलाभे अननुष्ठानम् ? इति संशये पूर्वपक्षयति—

चोदिताभावेऽनारम्भस्तत्सिद्धित्वात्तस्य ॥ १ ॥

विहितस्य द्रव्यस्याभावे काम्यकर्मणो ऽनारम्भः, कुतः? तस्य विहितस्य कर्मणस्तेनैव द्रव्येण सम्पत्तुं युक्तत्वात्। द्रव्यदेवतयोरेव कर्मस्वरूपत्वात्, अन्यतराभावे तस्यानिष्पत्तेरिति भावः ॥ १ ॥

[नित्ये कर्मणि प्रतिनिधिः]

अनेनैव न्यायेन नित्येऽपि कर्मणि विहितद्रव्यालाभे अननुष्ठाने प्राप्ते तदपवादार्थमाह—

नियते सामान्यतः प्रतिनिधिः स्यात् ॥ २ ॥

नित्ये कर्मणि विहितद्रव्याभावे तत्स्थाने तत्सदृशद्रव्यान्तरस्य ग्रहणं स्यादेव। कुतः? सामान्यतः सादृश्यादित्यर्थः ॥ २ ॥

[आरब्धे काम्ये प्रतिनिधिः]

विहितद्रव्यलाभेन प्रथमतः काम्ये कर्मण्यारब्धे अनन्तरं च तस्यापचारे जाते तत्कर्म प्रतिनिधिना समापनीयम्? उत न? इति संशये सिद्धान्तमाह—

आरम्भान्नियमः ॥ ३ ॥

काम्यस्य कर्मण आरब्धत्वात् नियमः, प्रतिनिधिनापि समाप्तिरवश्यं कर्त्तव्येत्यर्थः। ततश्च अवश्यसमापनान्यथानुपपत्त्या प्रतिनिधिरपि भवतीत्यभिप्रायः ॥ ३ ॥

किंच—

दोषश्चासमाप्तौ स्यात्सामान्यात् ॥ ४ ॥

आरब्धस्य काम्यस्य कर्मणो ऽसमाप्तौ दोषो ऽपि भवतीति गम्यते। कुतः? सामान्यात्, शिष्टविगर्हणसामान्यादित्यर्थः। यथैव नित्याननुष्ठाने शिष्टा विगर्हन्ते एवमारब्धस्यापि काम्यस्य अपरिसमापने शिष्टा निन्दन्ति। नहि दोषाभावे शिष्टविगर्हणं भवितुमर्हति ॥ ४ ॥

दर्शनाच्च ॥५॥

दर्शनमप्यत्रास्ति। "यदि सोमं न विन्देत्पूतीकानभिषुणुयात्" (ता० ब्रा० ९-५-३) इति। सोमाभावे पूतीकेन समाप्त्यभिधानमप्यत्र लिङ्गम् ॥५॥

दर्शनमाक्षिपति—

अन्यार्थं दर्शनं, न पुनर्ग्रहणात् ॥६॥

यद्दर्शनं तदन्यार्थं भवति इदं तु न तथा। कुतः? पुनर्ग्रहणात्, द्रव्यान्तरस्य पूतीकस्य पुनर्विधानादित्यर्थः। यथा ब्रह्मवर्चसकामनया विहिते सौर्ययागे होमार्थं प्रवृत्ते वाक्ये प्रयाजदर्शनं "प्रयाजे प्रयाजे कृष्णलं[1] जुहोति" (तै० सं० २।३।२) इति। एवं पूतीकविधानार्थमेव प्रवृत्तमिदं वाक्यं कथं दर्शनं भवितुमर्हति, कथं वा इदमवलम्ब्य असमाप्तौ दोष उद्भावयितुं शक्यत इति भावः ॥६॥

१ कृष्णलशब्देन मापपरिमित-सुवर्णस्य पञ्चमांश उच्यते (याज्ञ० स्मृ० आचा० ३९३)।

एवमाशङ्किते समाधत्ते—

अन्यार्थं पुनर्ग्रहणम् ॥७॥

इदं पूतीकस्य[1] पुनर्ग्रहणं पुनर्विधानमन्यार्थमेव भवितुमर्हति । अयं भावः—यजेतेत्यनेन देवतोद्देश्यकद्रव्यत्यागरूपस्य यागस्य विधानात् यागस्यावश्यकर्त्तव्यता प्राप्ता । तत्र विहितस्य सोमस्याभावे प्रतिनिधिशास्त्रेण सुसदृशानां विसदृशानां च द्रव्याणां प्राप्तिर्भवति । सोमाभाव इति पूर्वोक्तवाक्येन तत्र द्रव्यविशेषो नियम्यते । एवं च यथा कथंचित् समाप्तेः कर्त्तव्यतायां प्राप्तायां तत्र विसदृशस्यापि द्रव्यस्य पूतीकस्य नियमः क्रियते इति कृत्वा इदमपि समाप्तौ दर्शनमेव ॥७॥

[पयोव्रतादावपि प्रतिनिधिरस्ति]

सोमयागे—"पयो व्रतं ब्राह्मणस्य, यवागू[2] राजन्यस्य, आमिक्षा[3] वैश्यस्य" (तै० आ० प्र० २ अनु० ८) इति श्रुतेर्ब्राह्मणादीनां पयोयवाग्वामिक्षा आहाराः उक्ताः, तत्र व्रत्यालाभे व्रतकरणाऽशक्तौ च प्रतिनिधिरस्ति न वा ? इति संशये उच्यते—

व्रते प्रसङ्गो न नियमशब्दात् ॥८॥

सूत्रमिदं पूर्वपक्ष-परतया सिद्धान्तपरतया च आवृत्त्या योजनीयम् । तत्र पूर्वपक्षे प्रसङ्गशब्देन नञ् अन्वेति । सिद्धान्ते च नियमशब्देन सह नञोऽन्वयः । तथा चायमर्थः—पूर्वपक्षे व्रते पयोव्रतादौ प्रतिनिधेः प्रसङ्गः प्राप्तिर्न भवति । कुतः ? नियमशब्दात् "व्रतꣳ ह्येवास्यातोऽशनं भवति" (श० ३-१-२-१) इति एवकारश्रवणादित्यर्थः । एवं च एवकारेण द्रव्यान्तरव्युदासात् प्रतिनिधिमन्तरा अन्यस्य कस्यचिदविहितत्वेन निषेधायोगात् प्रतिनिधिरेव एवकारेण व्युदस्यते इति । एवं प्राप्ते सूत्रावृत्त्या सिद्धान्तयति—व्रते प्रसङ्गो न नियमशब्दात् । व्रते प्रतिनिधेः प्राप्तिर्भवति । कुतः ? न नियमशब्दात् नियमशब्दाभावादित्यर्थः । व्रतं ह्येवेत्यत्र एवकारो नियमबोधकः अर्थान्तरव्युदासको न, किन्तु पूर्वोक्तस्य "पुरा केशश्मश्रोर्वपनाद्यत्कामयेत तदश्नीयात्" (श० ३-१-२-१) इति इष्टाशनस्य स्तावकः । अतः प्रतिनिधिरस्त्येवेति भावः ॥८॥

[प्रतिनिहितद्रव्यस्य श्रुतद्रव्यशब्देनैवाभिधानम्]

विहितस्य छागादेरभावे तत्सदृशद्रव्यान्तरे मेषे प्रतिनिहिते "छागस्य वपाया मेदसो जुषेताꣳ हविर्होतर्यज" (य० २१-४१) इत्यादिषु मन्त्रेषु किं छागशब्द उच्चारणीयः ? उत मेषशब्द उच्चारणीय ? इति संशये प्रतिनिधिबोधकशब्दो मेष एवोच्चारणीय इति पूर्वपक्षः । मन्त्राणां प्रयोगसमवेतार्थस्मारकत्वं प्रयोजनमुक्तं, तत्त्वं च शक्त्या स्मरणीयार्थप्रतिपादकत्वमिति निर्णीतं नवमे । शक्त्या प्रतिपादनं च न श्रुतशब्देन भवितुमर्हति । अतश्च शक्त्या प्रतिपादनसिद्ध्यर्थं श्रुतद्रव्यशब्दं परित्यज्य प्रतिनिधिबोधकशब्देनैव प्रतिनिधिर्विधेय इति उत्सूत्रे[4] पूर्वपक्षे प्राप्ते सिद्धान्तमाह—

---

१ दिविष्ठस्य सोमस्य गायत्र्या भूलोकं प्रति समाह्रियमाणस्य यः खण्डो भूमौ पतितः स पूतीको नाम लताविशेष इत्युक्तं ताण्ड्ये—"तस्य ये ह्रियमाणस्यांशवः परापतंस्ते पूतीकाः समभवन्" (८।४।५।३) इति ।

२ 'तण्डुलैः शिथिलपक्वा यवागूः, इति कर्कः ।

३ पयस्तप्तं कृत्वा तापविशिष्टे एव तस्मिन् पयसि दधनि प्रक्षिप्ते सति तत्पयो द्विधा जायते घनीभूतं द्रवीभूतं च । तत्र यो घनीभूतोऽशः सा आमिक्षा । द्रवीभूतं तु वाजिनम् ।

४ उत्क्रान्तः सूत्रमुत्सूत्रः । यः पूर्वपक्षः सूत्रकारेण नोक्तः स उत्सूत्र इत्युच्यते ।

शब्देऽविप्रतिपत्तिः ॥९॥

मन्त्रगतद्रव्यबोधकशब्दे अविपरिणामः ऊहो न कार्यः। श्रुतद्रव्यशब्दस्यैवोच्चारणं कार्यमिति भावः। अयमाशयः—यत्र श्रुतद्रव्याभावे तत्स्थाने द्रव्यान्तरं विहितं तत्रैव द्रव्यान्तर-बुद्धिरुदेति, प्रतिनिधिस्थाने तु न तथोदेति। प्रतिनिधिमुपाददानाः पुरुषाः तत्र यत्स्थाने प्रति-निधिरुपात्तस्तद्बुद्धिमेव कुर्वते। यथा गुरुपुत्रे गुरुप्रतिनिधौ गुरुबुद्धिं कुर्वन्ति। एवं प्रकृते ऽपि श्रुतद्रव्यबुद्ध्यैव प्रतिनिधेरुपादानात् श्रुतद्रव्यशब्देनैव प्रतिनिध्युच्चारणम् ॥९॥

[पूतीकानां सोमशब्देनैवाभिधानम्]

नन्वेवमस्तु यत्र द्रव्यान्तरबुद्धिर्नास्ति तत्र श्रुतशब्देनैवोपलक्षणम्, यत्र तु विधिनैव द्रव्यान्तरमुपात्तं यथा "सोमाभावे पूतीकानभिषुणुयात्" (ता०९.५.३) इत्यादौ, तत्र तु विशे-षवचनात् प्रतिनिधिशब्देनैव विधानमस्तु इत्याशङ्कायामाह—

सोमेन, जात्यभावात् ॥१०॥

तत्रापि सोमशब्देनैवोच्चारणम्। कुतः ? जात्यभावात्, तत्र विहितद्रव्यपरित्यागेन जात्यन्तरस्य विध्यभावात्। द्रव्यान्तरबुद्ध्या पूतीकस्य नात्र विधानं, किन्तु यागविधिशास्त्रे-णैव सर्वेषां द्रव्याणां प्राप्तौ पूतीकानां नियमनमात्रम्। अतः पूतीकानामपि सोमबुद्ध्यैव विधिना उपादानात् सोमशब्देनैवोच्चारणम् ॥१०॥

[पृषदाज्यस्याज्यशब्देनैवाभिधानम्]

यद्येवं यत्र द्रव्यान्तरस्यैव वचनाद्विधानं यथा पृषदाज्ये, (दधिमिश्रितमाज्यं पृषदा-ज्यमुच्यते) तत्र तद्बोधकेषु "देवाँ आज्यपाँ आवह" (का. हौ. प. १२) इत्यादिषु मन्त्रेषु देवान् आज्यपृषदाज्यपान् इत्येवोच्चारणं भवतु, युक्तं हि तत्र आज्यदध्नोः संमिश्रणाद् द्रव्या-न्तरत्वम्। श्रूयते च—"द्वयं वा इदं सर्पिश्चैव दधि च" (श० ३.८.४.७) इति। एवं प्राप्ते आह—

आज्ये चादर्शनात् ॥११॥

आज्ये च विपरिणामो न कार्यः। कुतः ? तत्रापि द्रव्यान्तरस्यादर्शनात्। न पृषदाज्यं नाम द्रव्यान्तरम्, किन्तु आज्ये दधिपृषत्तारूपो गुणो विधीयते। द्वयं वेत्यादि अपि गुणभूतस्य दध्नः प्रशंसापरमेव। अतश्च न शब्दान्तरस्यात्रापि प्रक्षेपः ॥११॥

अत्र लिङ्गमप्यस्तीत्याह —

पशौ मन्त्रवर्णात् ॥१२॥

पृषदाज्यसाधनके पशुयागेऽपि 'स्वाहा देवा आज्यपान् (शु० म० २१.४०) इत्येव मन्त्रः पठ्यते, नतु स्वाहा देवा आज्य-पृषदाज्यपानिति। अतो मन्त्रवर्णादपि न शब्दान्तरस्य प्रक्षेपः ॥१२॥

श्रुतेश्च ॥१३॥

"अथ पृषदाज्यं गृह्णाति" (श० ३.८.४.७) इति एकवचनश्रवणादपि अयमर्थो गम्यते। यद्यत्र दध्नोऽपि प्राधान्यं स्यात्तदा द्विवचनं श्रूयेत, न च श्रूयते ॥१३॥

[वैकल्पिकोपात्तद्रव्यापचारे प्रतिनिधेरेवोपादानम्]

अथ यत्र कर्मणि विकल्पेन व्रीहियवादीनां विधानं तत्र एकं द्रव्यमुपादाय कर्मणि प्रवृत्ते कर्ममध्ये च तस्मिन्द्रव्ये नष्टे अनन्तरं वैकल्पिकस्य द्रव्यान्तरस्य उपादानं भवितु मर्हति ? अथवा श्रुतद्रव्यसदृशस्यैव उपादानम् ? इति संशये 'अश्रुतौ ह्यनुमानं स्यात्' इति

न्यायेन वैकल्पिकस्यापि श्रुतद्रव्यस्य अलाभे सत्येव प्रतिनिध्युपादानं युक्तम्, ? न तु श्रुतद्रव्यस्य वैकल्पिकस्य सत्वे इति प्राप्ते आह—

विकल्पे प्रवृत्तां, कर्मान्तरत्वात् ॥ १४ ॥

विकल्पस्थले यद् द्रव्यमुपादाय पूर्वं कर्म प्रवृत्तं तस्यैव प्रतिनिधिरुपादेयः । कुतः ? द्रव्यान्तरोपादाने द्रव्यान्तरबुद्ध्या कर्मान्तरबुद्ध्यापत्तेः ।

"रूपं[1] कालोऽनुनिर्वापः श्रपणं देवता तथा । आदौ ये विधृताः पञ्चास्त इमे सर्वदा स्मृताः" (त्रिका० मं० का० २९)

इति न्यायेन वैकल्पिकस्थले प्रथमं यद् द्रव्यमुपादत्ते यजमानस्तदेव यावज्जीवं तस्य द्रव्यं भवति । तद्बुद्ध्या वैकल्पिकं द्रव्यमेव नास्ति । तत्तु द्रव्यान्तरमेव । अतश्च तद्ग्रहणे कर्मान्यत्वमेवापद्येत ॥ १४ ॥

[प्रतिनिधिनाशे श्रुतसदृशस्योपादानं न प्रतिनिधिसदृशस्य]

यदि कंचित्प्रतिनिधिमुपादाय कर्मण्यारब्धे मध्ये च तस्य नाशे अनन्तरं प्रतिनिधिसदृशमेव द्रव्यान्तरमुपादेयम् ? उत श्रुतद्रव्यमेवोपादेयम् ? इति संशये पूर्वन्यायेन प्रतिनिधिसदृशस्यैव द्रव्यस्योपादाने प्राप्ते आह—

प्रतिनिधौ, तत्कालात् ॥ १५ ॥

प्रतिनिहिते द्रव्ये नष्टे न तत्सदृशमुपादेयम् । कुतः ? तत्कालात् । श्रुतद्रव्याभावे सत्येव हि तस्य प्रतिनिधिः प्रवर्त्तते । तत्सत्वे तु श्रुतमेव द्रव्यमुपादेयम् ॥ १५ ॥

[कार्यासमर्थश्रुतद्रव्यसत्वेऽपि तत्समर्थप्रतिनिधेरेवोपादानम्]

यत्र 'खादिरः स्रुवः' (का० श्रौ० १।३।३३। 'खादिरो यूपः'[2] (आप० श्रौ० ७।१।१६) इत्यादिना विहितं खदिरादि मुख्यं द्रव्यं होमादिकार्यासमर्थमनुपलब्धं वा वर्त्तते, प्रतिनिधिद्रव्यमुदुम्बरादि च होमादिकार्यसमर्थमस्ति, तदा किं मुख्यं द्रव्यं ग्राह्यम् ? उत प्रतिनिधिद्रव्यम् ? इति संशये 'मुख्यामुख्ययोर्मुख्ये संप्रत्यय' इति न्यायेन मुख्यस्यैव ग्रहणे प्राप्ते आह—

अर्थ-द्रव्यविरोधेऽर्थसामान्यं तत्परत्वात् ॥ १६ ॥

कार्य-मुख्यद्रव्ययोर्विरोधे कार्यसिद्धिसमर्थं प्रतिनिधिद्रव्यं ग्राह्यम् न मुख्यम् । कुतः ? तत्परत्वात्—द्रव्यस्य प्रयोजनार्थत्वात् । अतः कार्यासमर्थं मुख्यमपि द्रव्यं न ग्राह्यम् ॥१६॥

[विहितगुणकेऽपि प्रतिनिधौ अविहितगुणकस्यापि श्रुतस्यैवोपादानम्]

राजसूये नैर्ऋतयागे "कृष्णव्रीहीणां नखनिर्भिन्नानां दर्विहोमः" (का० श्रौ० १५।३।) १४। इति कृष्णानां व्रीहीणां होमो विहितः, तत्र मुख्यस्य विहितव्रीहिद्रव्यस्याकृष्णत्वं, प्रतिनिधिभूतस्य नीवार[3]द्रव्यस्य च कृष्णत्वम्, तत्र किं व्रीहयो ग्राह्या ? उत नीवारा ? इति संशये गुणानुरोधेन नीवाराणामुपादाने प्राप्ते आह—

---

१ रूपं कर्मस्वरूपं दाक्षायण-पौर्णमासेष्ट्यादिकम् । कालः उदितानुदितादिः । अनुनिर्वापः वैमृधादित्यौ । श्रपणं हविषः गार्हपत्ये वा ऽऽहवनीये वा । देवता ऐन्द्रं भवति माहेन्द्रं वेति । एते पञ्चादिविकल्पाः । अन्ये सर्वे इच्छाविकल्पाः ।

२ छेदन-तक्षणादिभिर्दृष्टसंस्कारैः प्रोक्षणादिभिरदृष्टसंस्कारैश्च साध्यः पशुबन्धनार्थः काष्ठविशेषो यूपः।

३ व्रीहिसदृशो धान्यविशेषो नीवारः । यः खलु ऋषिपञ्चमीव्रतादौ भक्ष्यते । 'तिन्नी' इति भाषायां प्रसिद्धः ।

गुण-द्रव्ययोर्द्रव्यं प्रधानयोगात् ॥ १७ ॥

गुण-मुख्यद्रव्ययोर्विरोधे गुणमनादृत्य मुख्यद्रव्यमेव ग्राह्यम् । कुतः ? प्रधानयागेन सह द्रव्यस्य संबन्धात् । अतः सन्निकृष्टं यागस्य द्रव्यं, विप्रकृष्टो गुणः ॥ १७ ॥

एवं प्राप्ते आह—

न समत्वात् ॥ १८ ॥

न द्रव्यमेव प्रधानयोगि, किन्तु गुणोऽपि । कुतः ? सदृशत्वात् । यथा श्रुतत्वाद् द्रव्यं प्रधानयोगि, तथैव श्रुतत्वाद् गुणोऽपीति । अन्तरा पूर्वपक्षोऽयम् ॥ १८ ॥

एवं प्राप्ते उक्तमेव सिद्धान्तं स्थापयति—

गुणानुग्रहात् ॥ १९ ॥

गुणविशिष्टं द्रव्यमेव प्रधानयोगि । गुणस्तु तत्र विशेषणमिति ॥ १९ ॥

इति कातीयश्रौतसूत्रे वृत्तौ-प्रथमाध्याये चतुर्थी कण्डिका ॥ ४ ॥

[श्रुत्यर्थपाठैः क्रमनियमः]

यत्र एकप्रधानोद्देशेन अनेकान्यङ्गानि विहितानि, तत्र अङ्गानुष्ठाने कश्चित् क्रमविशेष आस्थेयः ? अथवा अनियमेन कर्त्तव्यान्यङ्गानि ? इति संशये पूर्वपक्षयति—

कर्मणामानुपूर्व्यं न, युगपद्भावात् ॥१॥

अङ्गकर्मणामनुष्ठाने क्रमो नास्ति । कुतः ? युगपद्भावात्—युगपदेव प्रधानेन संबन्धादित्यर्थः। अयं भावः । प्रधानं फलोद्देशेन विहितम् अङ्गानुपकृतं सत् फलजनने सामर्थ्यमनुपलभमानं स्वोपकारकाण्यङ्गान्यपेक्षते । अङ्गान्यपि तत्प्रकरणे पठितानि प्रयोजनमाकाङ्क्षन्ति । तत्र नष्टाश्व[1]दग्धरथन्यायेन अ[2]ङ्गप्रधा[3]नयोः संबन्धो भवति । तत्रापि कस्याङ्गस्य प्रधानेन सह प्रथमं संबन्धः, कस्य चानन्तरमित्यपेक्षायाम्, एकप्रकरणपठितानां क्रमकल्पने प्रमाणाभावात् एकस्मिन्नेव क्षणे प्रधानेन सह संबन्धस्यापेक्षणाच्च यद्यपि युगपदेव संबन्धो भवति, तथापि अनुष्ठानसमये परिमितैः कर्तृभिस्तावतां बहूनामङ्गानां युगपदनुष्ठानाशक्तेः अवश्यं कस्मिंश्चित् क्रमे आश्रयणीये अनियमेन यः कश्चित् क्रम आश्रयणीयः ॥१॥

हेत्वन्तरमप्यस्तीत्याह—

अर्थनिर्वृत्तेश्च ॥२॥

येन केनचित् क्रमेण अङ्गानुष्ठाने क्रियमाणे अङ्गकलापनिष्पत्तिः सुखेन भवेत् । क्रम विशेषस्याश्रयणे तु विलम्बः स्यात् । तस्मादङ्गानुष्ठाने क्रमनियमो न ॥२॥

एवं प्राप्ते सिद्धान्तयति—

स्याद्वाऽऽनुपूर्व्यनियमः श्रुत्यर्थक्रमेभ्यः ॥३॥

---

१ द्वौ रथिनौ स्वं स्वं रथमारुह्य मृगयार्थं वनं गतौ । तत्र एकस्य अश्वा विनष्टाः, अपरस्य रथोऽग्निनादग्धः, तावुभावपि मिलित्वा तवाश्वा विनष्टाः मम रथो नष्टः उभावपि संयोक्ष्यावहे इति प्रतिज्ञाय एकस्य रथे अपरस्य अश्वान् संयोज्य गृहमागतौ । अयं नष्टाश्व-दग्धरथन्यायः ।

२ यत् प्रधानोपकारकं तदङ्गम् ।

३ फलोद्देशेन यद् विहितं तत्प्रधानम् ।

२ श्रुत्यादिक्रमनियम, सत्राधिकारविचार, तन्त्र विचार, मन्त्रस्वरविचार, हविर्निरूपणम् ।

वा शब्दः पक्षव्यावृत्तो । अङ्गकर्मणामनुष्ठाने श्रुत्युक्तः क्रम आश्रयणीयः । कुतः ? श्रुतेः, अर्थात्, क्रमाच्च । श्रुतेस्तावत्—"तेषां गृहपतिः प्रथमो दीक्षते, अथ ब्रह्माणं दीक्षयति, अथो-द्गातारम्" (श० १२·१·१·१·११) इत्यादि । द्वादशाहसत्रे—"ये यजमानास्त एवर्त्विजः सत्रेषु" (का० श्रौ० १२·१·८) इत्युक्तत्वात् सर्वेषां यजमानत्वात् सर्वेषां दीक्षा विधीयते, तत्र क्रमविधा-यिका इयं श्रुतिरिति ।

आदौ अवघातः (कण्डनादिः) ततः पेषणमिति क्रमोऽर्थाद्बोध्यः ।

क्रमो द्विविधः, श्रुति (ब्राह्मण) पाठक्रमो मन्त्र-पाठक्रमश्च । उभयविधोऽपि क्रमः क्रमनि-
यमे कारणमित्यर्थः । तस्माद् ब्राह्मण—पाठक्रमेण मन्त्र-पाठक्रमेण च कर्मानुष्ठानम् ॥३॥

अत्र हेत्वन्तरमप्यस्तीत्याह—

प्राकृतं च विकृतौ ॥४॥

[1]प्रकृतिवद्वि[2]कृतिः कर्त्तव्येति नियमेन विकृतौ सर्वे प्रकृतिधर्मा आगच्छन्ति । तेषां च प्राकृतानां पदार्थानां महापितृ-यज्ञादौ प्राकृतपाठक्रमेणैवानुवादो दृश्यते । यदि पाठक्रमेणानु-ष्ठानं न स्यात् तदा तेन क्रमेणानुवादो न स्यात् । अतो नियतक्रमेणैवाङ्गकर्मणामनुष्ठानम् ।४॥

[पाठक्रमादर्थक्रमस्य बलीयस्त्वम्]

पयोयागे विहितगोदोहनार्थम् आदौ पलाशशाखां छित्वा ततस्तया छिन्नशाखया वत्सानां निवारणमिति वत्सापाकरणाय शाखाच्छेदनं विहितम् । "स वै पर्णशाखया वत्सानपाकरोति नामाच्छिनत्ति" (श० १·६·४·१ इति वाक्येन तु वत्सापाकरणानन्तरं शाखाच्छेदनं प्राप्यते । तत्र किं पाठक्रमेणानुष्ठानम् ? उत अर्थक्रमेण ? इति संशये आह—

विरोधेऽर्थस्तत्परत्वात् ॥ ५ ॥

पाठक्रमार्थक्रमयोर्विरोधे अर्थक्रमो बलवान्, न पाठक्रमः । कुतः ? पाठस्यार्थपरत्वात् । अतः पूर्वं छेदनं पश्चाच्छिन्नया तया वत्सापाकरणम् ॥ ५ ॥

[श्रौतक्रमस्य सर्वापेक्षया बलवत्त्वम्]

सꣳस्थिते यज्ञे ब्राह्मणं तर्पयितवै ब्रूयात् (श० ६·७·३·२८) इति श्रुत्या यज्ञसमाप्त्यनन्तरं "ब्राह्मणं तर्पयितवै" इति प्रैषोऽध्वर्युणा देय इति प्राप्नोति । उक्तायाः श्रुतेः पाठस्तु स्विष्टकृ द्याग—प्राशित्रावदानयोर्मध्ये वर्त्तते । अतः पाठक्रमात् स्विष्टकृत्समनन्तरं प्रैषः प्राप्नोति । तत्र किं समाप्तौ प्रैषो देय ? उत स्विष्टकृदन्ते ? इति संशये आह—

श्रुतिः क्रमादानुमानिकत्वात् ॥ ६ ॥

श्रुतिपाठक्रमाच्छ्रुतेरेव बलीयस्त्वम् । कुतः ? पाठक्रमस्यानुमानिकत्वात् । यतोऽनेन क्रमेण पाठः, अतः अनेन क्रमेण पदार्था अनुष्ठेया इति पाठक्रमे अनुमानम्, तच्च संस्थिते यज्ञे इति प्रत्यक्षश्रुतितो दुर्बलम् ॥ ६ ॥

[चोदनापाठान्मन्त्रपाठो बलवान्]

'सोऽसावाज्यमधिश्रयति इषेत्वेति, तत्पुनरुद्वासयत्यूर्जेत्वेति' (श० १·२·६·६) इति श्रुति पाठेन आज्याधिश्रयणानन्तरमेव आज्योद्वासनं प्राप्नोति । मन्त्रपाठेन तु इषेत्वेति आज्याधि-

१ यत्र कृत्स्नाङ्गोपदेशः सा प्रकृतिः ।

२ यत्र विशेषाङ्गमात्रमुपदिश्यते अङ्गान्तराणि तु प्रकृतेरतिदिश्यन्ते सा विकृतिः ।

श्रयणमन्त्रानन्तरं घर्मोऽसीत्यादि (शु० य० १. २२) पत्नीसन्नहनान्तं मन्त्रजातमुक्त्वा ऊर्जेत्वा (शु० य०१. ३०) इति आज्योद्वासनमन्त्रस्य पाठात् पत्नीसन्नहनानन्तरम् आज्योद्वासनं प्राप्नोति इत्येवं ब्राह्मणपाठ—मन्त्रपाठयोर्विरोधे किं कर्त्तव्यम् ? इति संशये आह—

मन्त्रचोदनयोर्मन्त्रबलं प्रयोगित्वात् ॥ ७ ॥

मन्त्रपाठ—ब्राह्मणपाठयोर्विरोधे मन्त्रपाठो बलवान् न ब्राह्मणपाठः। कुतः ? मन्त्रपाठस्य प्रयोगे उच्चार्यमाणतया अन्तरङ्गत्वात् ॥ ७ ॥

एवं प्राप्ते अन्तरा पूर्वपक्षयति—

न समत्वात् ॥ ८ ॥

मन्त्रपाठो बलवानिति यदुक्तं तन्न। कुतः ? समत्वादुभयोः। कर्मणि करिष्यमाणकर्मणः स्मरणार्थं मन्त्रः प्रयुज्यते। विधिवाक्यं तु कर्मणो विधायकम्। अतो विधिवाक्येन पूर्वं पदार्थे विहिते सति पश्चात्तत्स्मरणार्थं मन्त्रः प्रयुज्यते। अतः सममेतत् ॥८॥

एवं प्राप्ते सिद्धान्तयति—

गुणानां तु भूयस्त्वात् ॥ ९ ॥

तुशब्दः पक्षनिरासाय। मन्त्रेषु श्रुतिपाठापेक्षया गुणानां बाहुल्यात् मन्त्रपाठ एव बलवान्। मन्त्राणां प्रयोगकाले उच्चारणविधानात् मन्त्रा उत्तरमुत्तरं पदार्थं झटिति स्मारयितुं शक्नुवन्ति। विधिपाठस्य तु मन्त्रवदुच्चारणाभावात्, अर्थवादादिना व्यवधानाच्च मन्त्रवत्स्मारयितुमशक्यत्वम्। अतो मन्त्रपाठे गुणभूयस्त्वम् ॥ ९ ॥

[पदार्थानुसमयः]

इदानीमिदं विचार्यते—यत्र बहूनि प्रधानानि एककाले अनुष्ठेयत्वेन विहितानि तत्र सर्वेषां प्रधानानां स्वैः स्वैरङ्गैः सह सम्बन्धस्य प्राप्त्या एकैकं प्रधानं प्रति तेषामेवाङ्गानामावृत्त्याऽनुष्ठाने प्राप्ते तत्र एक-प्रधानसंबन्धि सर्वमङ्गमनुष्ठाय ततः प्रधानान्तरसंबन्धि तदेव अङ्गजातमावर्त्तनीयम् इति काण्डानुसमयः कर्त्तव्यः ? अथवा एकमेकमङ्गं सर्वेष्वपि प्रधानेष्वनुष्ठाय पुनरङ्गान्तरं तेषु सर्वेष्वावर्त्तनीयम् इति पदार्थानुसमयः कर्तव्य ? इति संशयः। (एकं प्रधानमुद्दिश्य तत्तत्संबन्धिना यावत्पदार्थकाण्डेन अनुसमयः अनुष्ठानं काण्डानुसमयपदार्थः। अनेकप्रधानोद्देशेन एकैकेन पदार्थेन आवृत्तेन अनुसमयः अनुष्ठानं पदार्थानुसमयपदार्थः।) तत्र काण्डानुसमय एव कर्त्तव्यः न पदार्थानुसमयः। पदार्थानुसमये आश्रीयमाणे कस्मिंश्चिदङ्गिनि प्रथमक्षणे कंचित्पदार्थं प्रथममनुष्ठाय द्वितीयस्मिन्नङ्गिनि द्वितीयक्षणे स एव पदार्थोऽनुष्ठेयो भवति। एवं च सति अङ्गिनः स्वप्रथमपदार्थानुष्ठानानन्तरं द्वितीयपदार्थानुष्ठानं द्वितीय क्षणे यत्प्राप्तं तद्बाधितं भवति। तत्तु न युक्तम्। अतः तदबाधाय काण्डानुसमय एवाङ्गीकार्य इति पूर्वपक्षे प्राप्ते आह—

तुल्यसमवाये सामान्यपूर्वमानुपूर्व्ययोगात् ॥१०॥

तुल्यानां प्रधानानां सहानुष्ठाने कर्त्तव्ये यदङ्गं सर्वसाधारणं तत्पूर्वं कर्त्तव्यम्। एकं पदार्थं सर्वत्र प्रथममनुष्ठाय अनन्तरं द्वितीयः पदार्थस्तथैवानुष्ठेय इति पदार्थानुसमय एव कर्त्तव्य इत्यर्थः। कुतः ? आनुपूर्व्ययोगात्, तदानीमेव आनुपूर्व्येण पदार्थानां संबन्धो भवति।

अर्थात् उपाकरणा[1]नन्तर्यं विनियोज[2]नस्य, विनियोजनानन्तर्यं च पर्यग्निकर[3]णस्य भवतीत्यर्थः। अन्यथा सर्वं गुणकाण्डमेकत्रानुष्ठाय पुनः द्वितीयस्मिन् प्रधाने तस्यावृत्तौ क्रियमाणायाम् उत्तरपदार्थसमाप्त्यनन्तरं पूर्वपदार्थकरणपरया पौर्वापर्यं भज्येतेति भावः। यदुक्तं प्रधानस्य द्वितीयत्वे द्वितीयपदार्थेन सह संबन्धाभावः पदार्थानुसमये, इति। तन्न। तस्य सहत्वविधानेन बाधात्। एवं च तादृशद्वितीयत्वप्राप्तिः एकप्रधानविषया एव। यत्र प्रधानबाहुल्यं तत्र पदार्थानुसमय एव ॥१०॥

[चतुर्मुष्टिकनिर्वापस्य एकपदार्थत्वं न मुष्टेः]

यत्र आग्नेयाग्नीषोमीयादीनां पुरोडाशयागानां सहानुष्ठानं प्राप्तं, तत्र तत्तदङ्गभूत-निर्वापस्यापि युगपत्कर्त्तव्यतायां प्राप्तायां, प्रथमम् आग्नेययागसंबन्धिहविर्निर्वापं मुष्टिचतुष्टयपरिमितं कृत्वा अनन्तरम् अग्नीषोमीयस्यापि मुष्टिचतुष्टयस्य निर्वापः कार्यः ? अथवा आग्नेयसंबन्धिहविषां प्रथमां मुष्टिं निरूप्य अग्नीषोमीयस्यापि प्रथममुष्टिनिर्वापं कृत्वा पुनराग्नेयस्य द्वितीयमुष्टिनिर्वापः तत अग्नीषोमीयस्य द्वितीयमुष्टिनिर्वापः इत्येवं क्रमेण निर्वाप ? इति संशये पूर्वोक्तन्यायेन आग्नेयस्य प्रथमं मुष्टिं निरूप्य अग्नीषोमीयस्य प्रथमो मुष्टिर्निर्वप्तव्य इति एकैकेन मुष्टिना अनुसमयः (अनुष्ठानं) कार्य इति प्राप्ते आह—

नैककर्मणि, संबन्धात् ॥११॥

न एकैकेन मुष्टिना अनुसमयः कर्तव्यः। कुतः ? एककर्मणि चतुर्मुष्टिके एकपदार्थरूपे निर्वापे एकमुष्टिनिर्वापस्य अवयवरूपेणैव संबन्धादित्यर्थः। अयं भावः — नात्र एकैकमुष्टिनिर्वाप एकः पदार्थः, किन्तु चतुरो मुष्टीन्निर्वपतीति वाक्येन चतुर्मुष्टिनिर्वापस्यैव एकपदार्थत्वाभिधानात् स एव एकः पदार्थः, स एव कर्त्तव्यः। तत्र चैकपदार्थनिर्वापोऽवयवभूतः। न चावयवेन समयः कुत्राप्युक्तः। अतश्च चातुर्मुष्टिकैकपदार्थ-निर्वापमाग्नेयस्य कृत्वा अनन्तरं तथैव अग्नीषोमीयस्य कर्त्तव्यः।

न चानेनैव वाक्येन मुष्ट्युद्देशेन सङ्ख्याया अपि विहितत्वात् एकैकमुष्टिनाऽपि अनुसमयः कुतो न स्यादिति वाच्यम्। नात्र मुष्ट्युद्देशेन सङ्ख्याया विधानम्। तथात्वे सङ्ख्यां प्रति मुष्टीनामुद्देश्यत्वम्, निर्वापं प्रति च मुष्टीनां विधेयत्वम् इति एकदैव मुष्टिषु परस्परविरुद्धोद्देश्यत्व–विधेयत्वरूपधर्मसमावेशात्मकं वैरूप्यं प्रसज्येत। तत्तु न युक्तम्। अतश्च सङ्ख्याया मुष्टीनां च निर्वापोद्देशेनैव प्रथमतो विधाने कृते अनन्तरम् अत्र विहिता क्रमसङ्ख्या किं संबन्धिनी स्यात् इत्यपेक्षायां पश्चात्तद्वाक्योपात्त-मुष्टिभिः साकं संबन्ध इत्यवगम्यते। अत एव मुष्टीनां सङ्ख्यासंबन्धेऽपि चतुरो मुष्टीन्निर्वपतीति श्रुतस्य वाक्यस्य तत्र तात्पर्याभावेन न वाक्यभेदरूपो दोषो भवति ॥ ११ ॥

[ग्रहणावदानयोः क्रमेण सादन—प्रदानान्तत्वम्]

एवं सर्वत्र पदार्थानुसमये प्राप्ते क्वचिदपवादमाह—

ग्रहण-सादनावदानप्रदानेषु तु वचनात् ॥ १२ ॥

सोमरसस्य ग्रहपात्रे ग्रहणं कृत्वा तस्य खरे सादनं स्थापनं कार्यम्। अर्थात् एकं ग्रहं गृहीत्वा तं खरे स्थापयित्वा अनन्तरमेव द्वितीयं ग्रहं गृह्णीयात्, नतु ग्रहणानन्तरं वामहस्ते संस्थाप्य पुनर्दक्षिणहस्तेन ग्रहान्तरं ग्रहीतव्यम्। तथा सति तृतीय ग्रहग्रहणाय हस्ताभावः स्यात्।

---

१ तृणेन संस्पर्शनपूर्वकं देवतार्थत्वेन पशोः समर्पणमुपाकरणम्।

२ पशोर्यूपे बन्धनं नियोजनम्।

३ पशोः परितोऽङ्गारेण प्रदक्षिणं भ्रामणं पर्यग्निकरणम्।

एवं पुरोडाशपात्र्यादौ प्रतिष्ठापितात् पुरोडाशादेर्हविषः "द्विर्हविषोऽवद्यति (का० श्रौ० १।६।२) इत्यादिना विहितमवदानं[1] कृत्वा तद्देवतायै प्रदाय अनन्तरमेव हविरन्तरादवदानं कार्यम्, न त्वेकं हविरवदाय तस्य प्रदानादिकमकृत्वा हविरन्तरादवदानं कार्यम्। एवं च ग्रहणं सादनान्तम्, अवदानं प्रदानान्तम् इति काण्डानुसमय एवेति भावः ॥ १२ ॥

[अनेकाभिन्नदेवताक-दधिपयोयागादौ नावदानं प्रदानान्तम्]

अनेन न्यायेन सर्वत्र हविषि अवदानादिप्रदानान्तस्यैव अनुष्ठाने प्राप्ते तदपवादमाह—

न द्रव्यभेदे, गुणयोगादिति वात्स्यः ॥१३॥

यत्र द्रव्यं भिन्नं देवता त्वेकैव तत्र न पूर्वोक्तन्यायः। कुतः? गुणयोगात्। सर्वेषामङ्गानां प्रधानं प्रति गुणत्वेन संबन्धात्। तद्यदि एकैकमवदाय प्रदाय च पुनर्द्रव्यान्तरेऽवदानं क्रियेत, तर्हि यावद्द्रव्यं प्रधानस्यावृत्तिः कर्त्तव्या भवेत्। गुणानुरोधेन च प्रधानावृत्तिरन्याय्या। अतः सर्वेभ्यो हविर्भ्यः अवदायैव प्रदानं कर्त्तव्यम्। यथा—वाजपेये सप्तदशसु प्राजापत्यपशुषु (श० ५।१।३।७) एकदेवताकत्वात् सर्वेभ्यो हृदयादिभ्योऽवदायैव युगपत् प्रदानम्। एवमनेकहविष्के स्विष्टकृद्यागे च सर्वेभ्यो हविर्भ्य उत्तरार्द्धादवदाय युगपद्धोम इति ॥१३॥

[प्रकान्तेऽसमाप्तेऽपि नित्यस्य स्वकालेऽनुष्ठानम्]

इदमत्र विचार्यते। किंचित्कर्म प्रक्रान्तं दैवान्मानुषाद्वाऽपराधात् स्वकालेऽपरिसमापितम्, तावता च नित्यस्य कर्मणः काल आयातः तदानीं नित्यस्य कालं बाधित्वाऽपि प्रक्रान्तमेव कर्म परिसमाप्यैव अनन्तरं नित्यमनुष्ठेयम्? उत नित्यं कर्म स्वकाले अनुष्ठाय अनन्तरं प्रक्रान्तं परिसमापनीयम्? इति संशये कर्ममध्ये कर्मान्तरानुष्ठानस्य दोषाधायकत्वात् प्रक्रान्तं परिसमाप्यैव नित्यमनुष्ठेयं न तु मध्ये नित्यस्यानुष्ठानम् इति पूर्वपक्षे प्राप्ते आह—

प्रवृत्ते नियतं, दोषविशेषात् ॥ १४ ॥

कस्मिंश्चित्कर्मणि प्रवृत्ते सति नित्यस्य काले आयाते नित्यमेव कर्त्तव्यम्। कुतः? दोषविशेषात्, नित्यस्याकरणे प्रत्यवायश्रवणादित्यर्थः ॥ १४ ॥

[षोडशिस्तोत्रस्योक्थ्यविग्रहोत्तरमेवानुष्ठानं न स्वकाले]

ज्योतिष्टोमाख्ये सोमयागे सोमरसग्रहणार्थं सन्ति बहवो ग्रहाः। तन्मध्ये उक्थ्यषोडशिनावपि ग्रहविशेषौ। तत्र षोडशिनः कालनियमो विहितः "समयाध्युषिते सूर्ये षोडशिनः स्तोत्रं प्रारभते" (बौ० श्रौ० १७। ३) "तं वै पुराऽस्तमयादुपाकरोति" "तं पराश्चमुक्थ्येभ्यो विगृह्णाति षोडशिनम्" (श० ब्रा० ।४।५।३।११) इति उक्थ्यपरभावः षोडशिन आम्नातः। तत्र यदि केनचित्कारणेन उक्थ्याः (त्रयो ग्रहाः) स्वकाले न परिसमापिताः, षोडशिनश्च काल अर्द्धास्तमयरूप आगतः, तदानीमुक्थ्यग्रहाणामुत्कर्षं (स्वस्थानात्स्थानान्तरप्राप्तिं) कृत्वा स्वकालप्राप्तं षोडशिनमनुष्ठाय तत उक्थ्यानुष्ठानम्? अथवा उक्थ्यान् परिसमाप्यैव षोडशिनमनुतिष्ठेत्? इतिसंशये पूर्वाधिकरणन्यायेन षोडशिनोऽनुष्ठाने प्राप्ते आह—

षोडशिनि त्वानुपूर्व्यभूयस्त्वात् ॥ १५ ॥

षोडशिसंज्ञके ग्रहे न पूर्वन्यायः संभवति। कुतः? आनुपूर्व्ययोगात्। क्रमस्य आधिक्यात्। पूर्वत्र च पौर्वापर्यस्य कस्यचिदविहितत्वात् मध्ये नित्यस्यानुष्ठानेऽपि वैगुण्याभावात्। इह तु "तं पराश्चमुक्थ्येभ्यो विगृह्णाति" इति शास्त्रेण षोडशिनः उक्थ्यपरभावस्यापि विहितत्वेन तत्परित्यागे क्रमत्यागरूपदोषापत्तेरुक्थ्यपरिसमापनानन्तरमेव षोडश्यनुष्ठानम् ॥१५॥

1 हविषो होमार्थं स्रुवादिना ग्रहणमवदानम्।

[प्रधानकर्मसु क्रमोऽनियतः]

यानि अग्निहोत्र-दर्शपूर्णमास-चातुर्मास्यादीनि परस्परमङ्गाङ्गिभावमापन्नानि, तेषां तत्तत्पाठक्रममनुसृत्यैव अर्थात् यस्य कर्मणोऽनन्तरं यत्कर्म पठितं तस्य पूर्वमनुष्ठानं कृत्वैव अनन्तरोक्तं कर्मानुष्ठेयम् ? उत अनियमेन ? इति संशये आह—

अनियमः फलसंयुक्तेषु ॥१६॥

फलसंयुक्तेषु प्रधानकर्मसु इष्टि-पशु-सोमादिषु अनुष्ठाने पाठतः क्रमनियमो नास्ति॥१६॥

यद्येवमनियमः, तर्हि तत्र क्रमेण पाठः किमर्थं इत्याशङ्कायामाह—

क्रमो विद्ध्यर्थः, कर्मण्यसंभवात् ॥१७॥

तत्र क्रमो विधानार्थः। सर्वेषां कर्मणां विधेयत्वेन पाठे कस्यचित्कर्मणः किंचित्कर्मानन्तर्यं वर्जनीयमेव, न तत्र क्रमविवक्षा। कुतः? सर्वस्वाराख्ये कर्मणि असंभवात्—आनुपूर्व्यस्य सम्पादयितुमशक्यत्वात्। अस्ति सर्वस्वारो नाम यज्ञः। स च "मरणकामः सर्वस्वारेण यजेत" (आप० श्रौ० २२।८।२४) इत्यनेन मरणाभिलाषिणं प्रति विहितः। तत्र "औदुम्बर्यां वेष्टितायां ब्राह्मणाः समापयत मे यज्ञम्" इति प्रैषं कृत्वा "अग्निं प्रविशति" (आप० श्रौ० २२।७।२४) इति अग्निप्रवेशो विहितः। यदि कर्मणां क्रमेणैवानुष्ठानं, तर्हि सर्वस्वारे यजमानस्य मृतत्वेन तदनन्तरपठितानां सर्वेषां कर्मणां विधिरनर्थक एव स्यात् ॥१७॥

इति कातीयश्रौतसूत्रवृत्तौ पञ्चमी कण्डिका ॥ ५ ॥

———

[अवत्तस्य हविषो नाशे हविरन्तरमुत्पाद्यम्]

अवदानानन्तरम् अवत्तस्य होमार्थं जुह्वां गृहीतस्य हविषः केनचित् कारणेन नाशे सति पुनर्हविरन्तरमुत्पाद्यैव यागः, अवशिष्टस्य च हविषस्त्यागः कर्त्तव्यः ? उत हविरन्तरमनुत्पाद्यैव अवशिष्टादेव हविषः पुनरवदाय यागः क्रियताम् ? इति संशये सिद्धान्तेनोपक्रमते—

अवत्तनाशेऽन्यद्, गुणानुग्रहात् ॥ १ ॥

होमार्थं गृहीतस्य ह्यवदानमात्रस्य हविषो नाशे हविरन्तरमेवोत्पादनीयम्। कुतः? गुणानुग्रहात्, तदानीमेव गुणानामनुग्रहः कृतो भवति। अन्यथा गुणहीनेन यागः कृतः स्यात्। प्रोक्षण—वघातादयो ये संस्कारास्ते अवदानार्थमेव कृताः। अवदाने कृते तेनैव सह आगताः, तद्विनाशे च विनष्टा एव। अवशिष्टे च हविषि न कश्चित्संस्कारोऽस्तीति संस्कारहीनमेव तद्धविः। अतश्च न तेन यागः कार्यः। किन्तु हविरन्तरमुत्पाद्यैवेति भावः ॥ १ ॥

एवं प्राप्ते इमं सिद्धान्तमाक्षिपति पूर्वपक्षी—

न, पूर्वशेषात् ॥ २ ॥

न हविरन्तरमुत्पादनीयम्, किन्तु पूर्वशेषादेव यागः कार्यः। यदर्थं संस्कारा अनुष्ठितास्तन्निष्पत्तावेव संस्काराणामपवर्गो भवति नान्यथा। अतश्च यागार्थमनुष्ठिताः संस्कारा यागनिष्पत्तावेवापवृत्ता भवन्ति इति अवत्तनाशेऽपि यागानुष्ठानाभावेन संस्काराणामनपवर्गात् अवशिष्टेऽपि हविषि संस्कारसत्त्वात्तस्मादेव यागः कार्यः ॥ २ ॥

UNIVERSITY

युक्त्यन्तरमाह—

अचोदितत्वाच्च ॥ ३ ॥

अवत्तस्य हविषो नाशे हविरन्तरमुत्पादनीयम् इत्येवंविधस्य विधेरभावाच्च पूर्वशेषादेव हविषो यागः कार्यः ॥ ३ ॥

किंच—

स्विष्टकृद्वदानुपूर्व्ययोगात् ॥ ४ ॥

एवं कृते एव हविः स्विष्टकृद्विशिष्टं भवति । कुतः ? आनुपूर्व्ययोगात्, प्रधानयाग—स्विष्टकृद्यागयोः परस्परं सम्बन्धलाभादित्यर्थः । यस्माद्धविषः प्रधानयागार्थमवदानं कृतं, तत एव स्विष्टकृद्यागार्थमवदानं कार्यम् । स्विष्टकृ[1]द्यागस्योपयुक्त—हविःसंस्कारार्थत्वात् । अतश्च यदि अस्माद्धविषः प्रधानार्थं नावदानं क्रियेत, तर्हि स्विष्टकृदर्थमप्यवदानं नास्माद्भवितुमर्हतीति सर्वथा हविषो वैयर्थ्यमेव स्यादिति भावः ॥४॥

इममाक्षेपं परिहरति सिद्धान्ती—

गुणहानौ तु, शेषभावात् ॥५॥

तु शब्दः पूर्वपक्षं व्यावर्त्तयति । नेत्यध्याह्रियते । गुणहानौ सत्यां न पूर्वस्माद्धविषोऽवदानं कार्यम् । कुतः ? शेषभावात् । संस्काराणामवदानाङ्गत्वादेवेत्यर्थः । संस्काराणां हविष्प्रसम्पादनार्थत्वात्, अवदीयमानस्यैव हविष्ट्वाच्च तन्नाशे संस्काराणां नष्टत्वादेव न[2] पूर्वस्माद्धविषोऽवदानमिति भावः ॥५॥

[अग्नि—शब्द—देवता—क्रियाणां प्रतिनिधिर्नास्ति]

न देवता—ऽग्नि—शब्द—क्रियाः, परार्थत्वात् ॥६॥

देव[3]तानामिन्द्रादीनाम्, अग्नीनामाहवनीयादीनाम्, शब्दानां मन्त्राणा[4]मिषेत्वेत्यादीनाम्, क्रिया[5]णां प्रोक्षणा—ऽवघात—प्रयाजादीनां विस्मरणादौ प्रतिनिधिर्न भवति । कुतः ? परार्थत्वात्, अदृष्टार्थत्वा[6]दित्यर्थः[7] ॥६॥

कामं देवताम् ॥७॥

देवतादीनामप्रतिनिधेयत्वस्य दृढीकरणार्थमिदं सूत्रम् । प्रतिनिदध्यादिति शेषः । योऽग्न्यादीन्प्रतिनिधातुं यतते स तत्सामान्यात् देवतामपि प्रतिनिदध्यादेव । तत्तु न कदाऽपि

---

१ प्रधानयागं सुष्ठु इष्टं करोतीति स्विष्टकृत् यागः । इष्टमिति यजे रूपम् । कृतस्य प्रधानयागस्य पौष्कल्यापादक इति यावत् ।

२ एतच्च पूर्वमीमांसायां षष्ठेऽध्याये चतुर्थपादे प्रथमाधिकरणे विचारितम् ।

३ तत्तद्विधिबोधितत्वे सति त्यज्यमानद्रव्योद्देश्यत्वं देवतात्वम् ।

४ कर्माङ्गभूत—द्रव्यदेवतास्मारकत्वं मन्त्रत्वम् ।

५ क्रियन्ते इति क्रियाः । ताश्च द्विप्रकाराः, दृष्टार्था अदृष्टार्थाश्च । तत्र अवहनन—रेषणाद्या दृष्टार्थाः । प्रयाज—प्रोक्षणाद्या अदृष्टार्थाः ।

६ अयं भावः—यत्र दृष्टं प्रयोजनमुद्दिश्य द्रव्यादिकं विधीयते तत्र विहितद्रव्यालाभे द्रव्यान्तरेणापि तत्सदृशेन श्रुतद्रव्यनिष्पाद्यं प्रयोजनं सम्पाद्यते इति कृत्वा श्रुतद्रव्यस्थाने द्रव्यान्तरं प्रतिनिधातुं शक्यते । यानि तु अदृष्टार्थानि देवताग्न्यादीनि, तेषामदृष्टरूपप्रयोजनमुद्दिश्यैव विहितत्वात् तादृशं श्रुतद्रव्यजन्यमदृष्टरूपं प्रयोजनं प्रतिनिधेयेन द्रव्येण सम्पाद्यत इत्यत्र प्रमाणाभावात् न अदृष्टार्थानां प्रतिनिधिर्भवितुमर्हतीति ।

७ एतच्च पूर्वमीमांसायां षष्ठेऽध्याये तृतीयपादे पञ्चमाधिकरणे विचारितम् ।

युज्यते । यत्र त्यज्यमानद्रव्योद्देशेन अग्न्यादिः विधिना बोधितः, स एव तत्र देवता भवितुमर्हति । अन्यस्य अविहितत्वादेव न तत्र देवतात्वम् । अतश्च तदुद्देशेन त्यागे कृतेऽपि न देवतोद्देशेन त्यागः कृत इति यागस्वरूपमेव न निष्पन्नं स्यात् । अतः सर्वथा न देवतायाः प्रतिनिधिरस्ति । तद्वदहष्टार्थत्वाविशेषादग्नि-शब्दादीनामपि न प्रतिनिधिरिति भावः । एतच्च पूर्वमीमांसायां षष्ठेऽध्याये तृतीयपादे षष्ठाधिकरणे स्पष्टम् ॥७॥

[निषिद्धानां माषादीनां प्रतिनिधित्वं नास्ति]

श्रुतद्रव्यापचारे द्रव्यान्तरं प्रतिनिधेयमिति निरूपितं पुरस्तात्, तेनैव न्यायेन देवतादीनामपि अपचारे संवृत्ते तत्रापि प्रतिनिधिः स्यादिति प्राप्ते आह—

प्रतिषिद्धं, प्रत्यवायात् ॥८॥

प्रपूर्वस्मात्सूत्रात् नेत्यनुवर्त्तते । विहितस्य द्रव्यस्यालाभे निषिद्धो माषादिर्न प्रतिनिधेयः । कुतः? प्रत्यवायात् । "अयज्ञिया उ वै कोद्रव-वरटा अयज्ञिया वै माषाः" (कठसं० २०।८। मै० सं० ३।२।७) इत्यादिना निषिद्धानामाचरणे दोषादित्यर्थः । एतत् (६।३।६, जैमिनीये निर्णीतम् ॥८॥

[यजमानस्य प्रधानकार्ये प्रतिनिधिर्नास्ति]

स्वामी, फलयोगात् ॥९॥

नेति वर्त्तते । स्वामिनि मृते, प्रोषिते, कार्यान्तरव्यापृते वा तत्स्थाने अन्यः प्रतिनिधिर्न कार्यः । कुतः? फलयोगात् । पुरुषान्तरेण क्रियमाणानां ब्रह्मचर्य-द्रव्यत्यागादीनां मृते-प्रोषिते वा यजमाने फलसम्पादनायोगादित्यर्थः । एतदपि (६।३।७) जैमिनिना विचारितम् ॥९॥

[यजमानस्य गुणकार्ये प्रतिनिधिर्भवत्येव]

एवं सर्वत्र प्रतिनिध्यभावे प्राप्ते क्वचित्तदपवादमाह—

गुणेषु प्रतिनिधिः, परार्थत्वात् ॥१०॥

पात्रासादन-वेदबन्धनाऽऽज्यावेक्षणादिषु यज्ञाङ्गभूतेषु यजमानकर्त्तव्येषु पदार्थेषु यजमानस्य प्रतिनिधिर्भवति । कुतः ? परार्थत्वात् । पात्रासादनादीनां क्रत्वङ्गत्वात् । अन्येनापि कृते पदार्थस्वरूपनिष्पत्त्या वैगुण्यासंभवात् ॥१०॥

[सत्रेषु वचनात्स्वामी प्रतिनिधीयते]

सत्रेषु[1] तु, श्रुतेः ॥११॥

सत्रेषु तु श्रुतिबलात् यजमानस्य प्रतिनिधिर्भवति । एवं हि श्रूयते—"यदि दीक्षितानां कश्चित्प्रमीयेत तस्य यो नेदिष्ठी स्यात्तमुपदीक्ष्य तेन सह यजेरन्" (ता० ९।८।१) इति ॥११॥

[सत्रेषु प्रतिनिहितस्य नेदिष्ठिनो यजमानसंस्कारयोगः]

स तद्धर्मा, कर्मयोगात् ॥१२॥

सत्रे प्रतिनिहितो यो नेदिष्ठी तस्य यजमानसंस्कारा वपनादयो भवन्त्येव । कुतः ?

---

१ ब्राह्मणैकाधिकारिकाः चतुर्विंशतिपरमसप्तदशावरयजमानकर्तृकाः अदक्षिणाकाः "आसीरन्" (आप० श्रौ २३।१।१) "उपेयुः" (आप० श्रौ० २३।१।१७) इत्यादिचोदनाचोदिताः त्रयोदशरात्रप्रभृति सहस्रसंवत्सरपर्यन्ताः सोमयागाः सत्रपदाभिधेयाः । अत्र सर्वे यजमानाः । अत एव च नात्र दक्षिणा । यजमाना एव तत्तदृत्विक्कर्म कुर्युः ।

कर्मयोगात्, यजमानकर्मणा तस्य नेदिष्ठिनः संबन्धात्। एतच्च जैमिनिसूत्रे (६।३।१०) प्रतिपादितम् ॥१२॥

[सत्रेषु ब्राह्मणानामेवाधिकारः]

सत्रेषु ब्राह्मणानामेवाधिकारः ? उत त्रयाणामपि इति संशये विद्यावत्त्वात् त्रयाणामेवाधिकार इति प्राप्ते सिद्धान्तयति—

सत्राणि ब्राह्मणाना, मृत्विक्श्रुतेः ॥१३॥

सत्राणि ब्राह्मणानामेव, ब्राह्मणकर्त्तव्यान्येवेत्यर्थः। कुतः ? ऋत्विक्श्रुतेः। "ये ऋत्विजस्ते यजमानाः" इति श्रुतेरित्यर्थः। अयं भावः—ये ऋत्विजस्ते यजमाना इत्यत्र ऋत्विजां यजमानसंस्कारा विधातुं न शक्यन्ते। तथात्वे केवलादृष्टार्थत्वापत्तेः। अतः ऋत्विक्शब्देन ऋत्विक्कर्तृकाणि कार्याणि लक्षयित्वा तदुद्देशेन यजमानानां विधानमङ्गीकर्त्तव्यम्। एवं च ऋत्विक्कार्ये यजमानविधानात् ऋत्विक्कार्यस्य ब्राह्मणेनैव कर्त्तव्यत्वस्य पूर्वं स्थापितत्वात् ब्राह्मणानामेव सत्रेऽधिकारः। एतच्च (६।६।२) जैमिनीये विचारितम् ॥१३॥

[एककल्पानामेव सत्रेऽधिकारः]

एककल्पाना, मवैगुण्यात् ॥१४॥

एकस्तुल्यः कल्पः पक्षो येषां ते एककल्पाः। सत्रे एककल्पानामेवाधिकारः। कुतः ? अवैगुण्यात्, तदानीमेवावैगुण्यस्याभावादित्यर्थः। अयमाशयः—"वसिष्ठ-शुनकात्रिवध्र्यश्वकण्व-कश्यप-संकृति-राजन्य-वैश्य-प्रजा-पशुकामानां द्वितीयः प्रयाजः[1] स्तनूनपादन्येषाम्" (का० हौ० प० १४) इति वाक्येन राजन्य-वसिष्ठादीनां नराशंसाख्यो द्वितीयः प्रयाजो विहितः। तद्भिन्नगोत्राणां च तनूनपात्प्रयाजो द्वितीयः। येषां यो द्वितीयः प्रयाजो विहितस्तेषां तदनुष्ठाने एवावैगुण्यं भवति। यदि भिन्नभिन्नगोत्रा यजमाना भवेयुस्तदा तनूनपात्प्रयाजानुष्ठाने वसिष्ठादिगोत्राणां स्वप्रयाजानुष्ठानाभावेन वैगुण्यमापद्येत। एवं नराशंसानुष्ठाने वसिष्ठानां स्वप्रयाजाननुष्ठानजनितं वैगुण्यं भवेत्। तत्तु न युक्तम्। अतस्तत्परिहारार्थं सर्वे यजमानास्तनूनपात्कल्पा वा भवेयुः, अथवा सर्वे नराशंसकल्पा भवेयुः, न तु तनूनपान्नराशंसकल्पानां मिलितानामधिकारः। एतच्च पूर्वमीमांसायां षष्ठाध्याये षष्ठपादे चतुर्थाधिकरणे विचारितम् ॥१४॥

[अतुल्यप्रमाणानामपि सत्रेऽधिकारः]

उक्तन्यायेन "यजमानसम्मितौदुम्बरी[2] कार्या" (श० ३।६।१।६) इति वाक्येन औदुम्बरी शाखा यजमानप्रमाणा कार्येति विधीयते। सत्रे सर्वेषां यजमानत्वात् यजमानानां च तुल्यप्रमाणत्वाभावात् यस्यैव यजमानस्य सम्मिता औदुम्बरी न भवेत् तस्यैव वैगुण्यं स्यात्। अतस्तुल्यप्रमाणानामेव यजमानानां सत्रेऽधिकारः, न भिन्नप्रमाणानां दीर्घ-ह्रस्वानामित्याशङ्क्य सिद्धान्तयति—

न, परार्थत्वात् ॥१५॥

तुल्यप्रमाणानामेव यजमानानां सत्रे ऽधिकार इति यदुक्तं, तन्न। कुतः ? परार्थत्वात् = यजमानस्य स्वार्थसाधनत्वाभावात्। अतो येन केनचिद्यजमानेन सम्मिता औदुम्बरी कार्या। अतो भिन्नप्रमाणानामपि यजमानानां सत्रे ऽधिकारः ॥१५॥

---

१ समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहा यजति, (तै० सं०२।६।१) इति पञ्च प्रयाजयागा विहिताः सन्ति। तत्र केषां चित्तनूनपात्प्रयाजः, केषां चित् नराशंस इति विधीयते।

२ सोमयागे सदोनामकमण्डपमध्ये उद्गात्रादीनां सामगाने अवलम्बनार्थं निखात औदुम्बरकाष्ठविशेष औदुम्बरी शाखा।

[सत्रसम्बन्धि-गृहपतिकार्येऽपि क्षत्रियादीनामनधिकारः]

ऋत्विक्कार्ये यजमानानां विधानात्, तत्र राजन्यवैश्ययोरधिकाराभावेऽपि [1]गृहपति-कार्ये (इदमिन्द्राय न मम इति) द्रव्यत्यागादौ क्षत्रियवैश्ययोरधिकारो भवतु इत्याशङ्क्य निराकरोति—

वैश्य—राजन्ययोर्गार्हपते ॥१६॥

वैश्यराजन्ययोर्गृहपतिकार्येऽपि सत्रे नाधिकारः। कुतः? भिन्नकल्पत्वादेवेति भावः। द्वादशाहाख्यसत्रे ब्रह्मसामाख्ये स्तोत्रे ब्राह्मण-राजन्यादीनां सामविशेषः परस्परं भिन्नो विहितः। यथा—"बार्हद्[2]गिरं ब्राह्मणस्य, पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्य" (ता० १३।४।१८) इति। ब्राह्मणयजमानके कर्मणि बार्हद्गिरेण साम्ना ब्रह्मसामाख्यं स्तोत्रं सम्पादयेदिति तदर्थः। यदि क्षत्रियवैश्ययोरपि गृहपतित्वमङ्गीक्रियेत, तर्हि बार्हद्गिर—पार्थुरश्मयोः परस्परं विरोधादे-कस्यानुष्ठाने इतरस्य वैगुण्यं स्यात्। तत्परिहारार्थं गृहपतिकार्येऽपि ब्राह्मणानामेवाधिकारः॥१६॥

[संवत्सरशब्दस्य दिनपरत्वात्सहस्रसंवत्सरसत्रे मनुष्याणामेवाधिकारः]

अस्ति सहस्रसंवत्सरसाध्यः विश्वसृजामयनसंज्ञः सत्रविशेषः। स च "पञ्च[3] पञ्चा-शतस्त्रिवृतः सवत्सराः, पञ्च पञ्चाशतः पञ्चदशाः, पञ्च पञ्चाशतः सप्तदशाः, पञ्च पञ्चाशत एकविंशा विश्वसृजामयनꣳ सहस्रसंवत्सरम्" (ता० ब्रा० २५।१८।१) इत्यनेन विहितः। तत्र मनुष्याणामधिकारः कथंचिद् भवति न वा इति विचार्यते—

सहस्रसंवत्सरममनुष्याणा, मसम्भवात् ॥१७॥

सहस्रसंवत्सरसाध्ये विश्वसृड्नामके सत्रे मनुष्याणां नाधिकारः। कुतः? तेषां तावदायुष्ट्वस्यासम्भवात्। न हि सहस्रसंवत्सरायुषो मनुष्याः श्रुतपूर्वा दृष्टपूर्वा वा। देवानां स्वयमन्यदेवान्तराभावेन अवाप्तकामत्वाच्च न यागादौ तेषामधिकार इति नास्मिन्सत्रे केषाम-प्यधिकार इति भावः ॥१७॥

स्या, देहानित्यत्वात् ॥१८॥

अथवा मनुष्याणाम् अधिकारः सत्रेषु स्यादेव। कुतः? देहानित्यत्वात्, देहस्या युषः अनियतपरिमाणत्वात्। न हि नियमोऽस्ति मनुष्याणां शतमेवायुरस्ति। अपरिमितायुषां मनुष्याणां बहुतरं दर्शनात् ॥१८॥

---

१ सत्रे यजमानकार्यं त्यागादिकं यः करोति स गृहपतिरित्युच्यते।

२ "इन्द्रो मदाय" (ऋ० १।६।१) इत्यस्यामृचि (योनौ) गेयं साम पार्थुरश्मं बार्हद्गिरं चोच्यते। "स्वादोरित्था" (ऋ० १।६।६) इत्यस्यामृचि (योनौ) गेयं साम रायोवाजीयम्।

३ ज्योतिष्टोमे चत्वारः स्तोमा विहिताः (स्तोत्रगतसङ्ख्याविशेषः स्तोमः। सामसाध्यस्तुतिः स्तोत्रम्) त्रिवृत्, पञ्चदशः, सप्तदशः, एकविंश इति। ते च द्वादशाहद्वारा अस्मिन्नपि सत्रे आगताः। तेषां च चतुर्णामपि स्तोमानामेकैकस्मिन्नपि सुत्यादिने बहिष्पवमानादिषु स्तोत्रेषु अनुष्ठानप्रसक्तौ तद् बाधित्वा सार्द्धद्विशतसङ्ख्याकदिनसाध्यसोमयागसंबन्धिस्तोत्रेषु केवलं त्रिवृत्स्तोमा एव, ततस्तावत्सङ्ख्याकदिवस-साध्यस्तोत्रेषु पञ्चदश स्तोमाः, ततस्तावत्सु सप्तदश स्तोमाः, ततस्तावत्सु एकविंशतिः स्तोमाः। एवं सहस्रदि-नसाध्यं कर्म 'विश्वसृजामयनम्' इति नाम्ना व्यपदिश्यते। पञ्चगुणितानि पञ्चाशद्दिनानि पञ्च पञ्चाशतः। एवमग्रेऽप्यर्थो बोध्यः।

यावन्ति स्तोत्राणि सोमयागे विहितानि तावन्ति सर्वाण्यपि सदोनामकमण्डपमध्यस्थितैरुद्गा-त्रादिभिर्गेयानि। बहिष्पवमानस्तोत्रं तु सदसो बहिश्चात्वालदेशे गेयम्। अत एव सदसो बहिः क्रियमाणत्वात् पूतत्वसम्पादकत्वाच्च बहिष्पवमानमिति कथ्यते।

कथं तेषामपरिमितायुष्ट्वमित्यत आह—

तस्य च कार्यत्वात् ॥१९॥

तस्य आयुषः कार्यत्वात्, आयुःप्रापकेन कर्मणा यावदभिलाषं जन्यत्वात्। मित्रविन्दादिना रसायनादिना च कर्त्तुं शक्यत्वादिति भावः ॥१९॥

ना, संभवात् ॥२०॥

रसायनादिनाऽपि सहस्रायुष्ट्वं न संभवति। प्रायः शतायुषः पुरुषा दृश्यन्ते, न सहस्रायुषः ॥२०॥

शास्त्रसंभवादिति भारद्वाजः ॥२१॥

"मित्रविन्दया (इष्ट्या) आयुष्कामो यजेत" (का० श्रौ० ५।१३।१) इति शास्त्रेण कर्मविधानात् सहस्रायुष्ट्वस्य संभवादित्यर्थः। भारद्वाजग्रहणं पूजार्थम् ॥२१॥

नाऽदर्शनात् ॥२२॥

शास्त्रसंभवादिति यदुक्तं तन्न। कुतः? सहस्रायुष्काणां मनुष्याणामदर्शनात्। मित्रविन्दादीनि तु आयुःप्रापकाणि, रसायनादीनि च अपमृत्युनिरासार्थानि, नायुर्वर्द्धकानि ॥२२॥

कुलसत्रमिति कार्ष्णाजिनिः ॥२३॥

कुलस्य पितृ-पुत्र-पौत्र-तत्पुत्रादिरूपस्य वंशस्य सहस्रसंवत्सरं सत्रं भवति, नैकस्य कस्यचित्। आरब्धस्य अवश्यसमापनीयत्वात् समाप्तिश्चैकेन न शक्यते कर्त्तुम्। अतो बहवस्तत्कुलीनाः कुर्युः। तेन केनचिदारब्धं केचित्समापयिष्यन्तीति कुलसत्रम् इति कार्ष्णाजिनिर्मन्यते ॥२३॥

साम्युत्थानमिति लौगाक्षिः ॥२४॥

अन्येन आरब्धस्य अन्येन समापनरूपं कार्ष्णाजिनिमतं न युक्तम्। कुतः? अवयवात् क्वचिदपि फलोत्पत्यदर्शनात्। एवं च निष्फलस्य कर्मणोऽनुष्ठानापेक्षया सत्रस्य मध्ये अर्द्ध एवोत्थानं वरम् ॥२४॥

सिद्धान्तमाह—

अह्नां वाऽशक्यत्वात् ॥२५॥

वाऽवधारणे। अह्नामेतत्सहस्रमङ्गीकार्यं, न वत्सराणाम्। कुतः? अशक्यत्वात्, अन्यथा तावत्कालसाध्यस्य कर्मणो मनुष्यैरनुष्ठातुमशक्यत्वादित्यर्थः। न मनुष्यैरेतत्सत्रं कर्त्तुं शक्यते। अतो मुख्यार्थासम्भवे गौणी वृत्तिराश्रीयते। अतश्च अत्रत्यं संवत्सरपदम् अहःपरतया नेयम् ॥२५॥

संवत्सरशब्दस्य दिनवाचकत्वे किं प्रमाणमित्यत आह—

श्रुतिसामर्थ्यात् ॥२६॥

"अहर्वै संवत्सर" इति श्रुतावुक्तत्वात् संवत्सरशब्दो ऽहर्वाचकः ॥२६॥

प्रकृत्यनुग्रहाच्च ॥२७॥

सत्राणां प्रकृतिर्द्वादशाह[१]ः। तत्रान्ह्रामेव प्रतिपादनादिहापि अह्नां सहस्रमङ्गीकार्यम्। एवं च द्वादशाहरूपा प्रकृतिरनुगृहीता स्यात्। तस्मात्सहस्रदिनात्मकं विश्वसृजामयनसंज्ञकं

१ द्वादश दीक्षाः, द्वादशोपसदः, द्वादशसुत्याः इति षट्त्रिंशद्दिनसाध्यः सोमयागविशेषो द्वादशाहः। अत्र प्रधानभूतसुत्याया द्वादशत्वात् द्वादशाह इति संज्ञा।

सत्रं मनुष्याणामेव भवति । एतच्च पूर्वमीमांसायां षष्ठाध्याये सप्तमपादे त्रयोदशाधिकरणे विचारितम् ॥२७॥

इति कातीयश्रौतसूत्रवृत्तौ षष्ठी कण्डिका ॥६॥

[प्रधानकर्मणां सहप्रयोगे प्रयाजाद्यङ्गकर्मणां तन्त्रम्]

यत्र बहूनि प्रधानानि सहानुष्ठीयन्ते तत्र अङ्गानां यावत्प्रधानावृत्तिः करणीया ? उत तावत्प्रधानोद्देशेन सकृदेवानुष्ठानम् ? इति संशये एकैकस्य प्रधानस्य स्वस्वाङ्गेन सह पृथक् पृथगेव सम्बन्धात् तत्सिद्ध्यर्थं यावत्प्रधानं पृथगेवाङ्गान्युष्ठेयानि । एवं च दर्शे पौर्णमासे च सहानुष्ठीयमानेषु त्रिषु प्रधानेषु प्रयाजादीनां वारत्रयमावृत्तिः करणीयेति पूर्वपक्षे प्राप्ते सिद्धान्तयति—

कर्मणां युगपद्भावस्तन्त्रम् ॥१॥

प्रधानकर्मणां यत्र युगपद्भावः=सहानुष्ठानं, तत्र अङ्गानामपि सकृदेवानुष्ठानं भवति ॥१॥

तदेव हेतुभिः साधयति—

शक्य-पुरुषार्थकृतत्वै-कार्थसमवायश्रुतिभ्यः ॥२॥

शक्यत्वात्, पुरुषार्थकृतत्वात्, एकार्थसमवायश्रुतेरिति विभागः । अङ्गानां तन्त्रमिति यदुक्तं तद्युक्तमेव । सकृत्कृतेनापि अङ्गेन अदृष्टोपकारकेण अनेकेषां प्रधानानामदृष्टरूप उपकारः सम्पादयितुं शक्य एवेत्यर्थः ।

पुरुषार्थकृतत्वात्, प्रयोग[1]विधिना च अङ्गप्रधानयोः साहित्यं विहितम । तच्च पुरुषेण सम्पादनीयम् । अतो ऽङ्गप्रधानयोः संबन्धकरणं पुरु[2]षार्थः । स च सकृत्कृतैरेवाङ्गैः सम्पाद्यत एवेति भावः ।

एकार्थसमवायश्रुतेः, एकस्मिन् फले सम्पादनीये अङ्गानां प्रधानानां च सम्बन्धश्रवणादित्यर्थः । अर्थात् फलजनकीभूतैरनेकैः प्रधानैः सह अङ्गानां सकृदनुष्ठानस्यैव श्रवणात् । यथा—दर्शपूर्ण[3]मासयोः "ता एकविꣳशतिराहुतयो द्वावा[4]घारौ, पञ्च प्रया[5]जा, द्वावाज्य[6]भागौ, आग्नेयः पुरोडा[7]शस्तद्दश, अग्नीषोमीय उपाꣳशुया[8]जो,ऽग्नीषोमीयः पुरोडाशो,

---

१ पदार्थान्तराव्यवधानेन अविलम्बेन साङ्गप्रधानानुष्ठानबोधको विधिः प्रयोगविधिः ।

२ पुरुषाभिलषित-फलसाधनत्वेन विहितत्वं पुरुषार्थत्वम् ।

३ "दर्शश्च पूर्णमासश्च यागौ पक्षान्तयोः पृथक्" (अम० २।७।४८) इति कोशात् अमाया मग्न्यन्वाधानं कृत्वा यः प्रतिपदि यागः क्रियते स यागो दर्श इत्युच्यते । एवं पौर्णमास्यामन्वाधाय प्रतिपदि क्रियमाणो यागः पौर्णमास इत्युच्यते ।

४ वह्नेः कश्चिद्देशमारभ्य देशान्तरपर्यन्तं समन्त्रकमाज्यधाराया नयनमाहरणमाघारः ।

५ प्रधानयागात्पूर्वमिज्यते यैस्ते प्रयाजाः ।

६ आज्यं भागो ययोस्तौ आज्यभागौ अग्नीषोमदेवते । लक्षणया तद्देवतो होमोऽपि आज्यभाग शब्देनोच्यते ।

७ व्रीहिपिष्टैर्यवपिष्टैर्वा निर्मितः पक्वः पिण्डविशेषः पुरोडाशः ।

८ उपांशु इज्यते इति उपांशुयाजः । "जिह्वोष्ठौ चालयेत् किंचिद्देवतागतमानसः । निजश्रवणयोग्यः स्यादुपांशु स जपः स्मृतः" ॥ स्वयंग्रहणयोग्यः किंचिच्छब्दवानुपांशुरिति तदर्थः ।

ऽग्निः स्वि[1]ष्टकृ, दिडा[2], त्रयो ऽनुया[3]जाः, सूक्त[4]वाकश्च, शंयो[5]र्वाकश्चा, ऽथ यद्देवाद‍ः पत्नीसंया[6]जेषु सम्प्रगृह्णाति, समिष्ट[7]यजुश्च," (श० ११·२-६-१०) इत्यादिना सकृदनुष्ठितान्यङ्गानि सङ्ख्यायैत्र प्रधानैः सह एकविंशतिसङ्ख्यासम्पत्तिरुपवर्णिता । सा चाङ्गानां तन्त्रेणैवानुष्ठाने संभवतीति भावः ॥२॥

कथं कुत्र वा प्रधानानां सह प्रयोग इत्यपेक्षायामाह—

फल-कर्म-देश-काल-द्रव्य-देवता-गुणसामान्ये ॥३॥

सामान्यशब्दः एकत्ववाची प्रत्येकं संबध्यते । फलसामान्ये कर्मसामान्ये इत्याद्यर्थः । यत्र एकफलोद्देशेन अनेकेषां प्रधानानां विधानं, यथा—"वैश्वदेवेन प्रजाकामं याजयेत्" (श० २।५।१।२२) इत्यादौ, तत्र आग्नेया[8]दीनामष्टानां सह प्रयोगः । एवं कर्मसामान्ये अङ्गभूतानां कर्मणामपि यत्र सामान्यं पञ्चप्रयाजता त्र्यनुयाजतेत्येवमादि, तत्रापि सह प्रयोगः ।

यत्र देशस्यैक्यं यथा—"प्राचीनप्रवणे वैश्वदेवेन यजेत," "समे दर्शपूर्णमासाभ्यां यजेत" (आप० श्रौ० १।६।७) इत्यादौ, तत्रापि सह प्रयोगः ।

एवं कालसामान्येऽपि "पौर्णमास्यां पौर्णमास्या (आग्नेयादिप्रधानसमुदायेन) यजेत" (आप० श्रौ० १।६।७) इत्यादौ, तत्रापि सह प्रयोगः । एवं दक्षिणासामान्ये गुणसामान्ये ऽपि सह प्रयोगः ॥३॥

[श्री—राष्ट्रादिफलादिभेदे मित्रविन्दाग्नेयादीनां भेदः]

तद्भेदे भेदः ॥ ४ ॥

तेषां पूर्वोक्तानां फलादीनां भेदे प्रयोगस्यापि भेदो बोध्यः ॥ ४ ॥

[साङ्गवैश्वदेवादेरेव प्राचीनप्रवणादिदेशादिविधानान्नाङ्गकालविरोधः]

प्रधानानां सह प्रयोगे अङ्गानि तन्त्रेणानुष्ठेयानीत्युक्तं तन्न सङ्गच्छते । अङ्गप्रधानयोः क्वचिद्देशकालादौ परस्परविरोधात् । वैश्वदेवे हि पर्वणि प्रधानानां प्राचीनप्रवणो देशो विहितः । तदङ्गानां प्रयाजादीनां समो देशः प्रकृतितो ऽतिदेशेनागतः । एवं च अङ्गप्रधानयोर्देशविरोधात् कथं सहानुष्ठानम् । एवं काले ऽपि विकृतीनां सर्वासामपि "य इष्ट्या पशुना सोमेन यजेत स पौर्णमास्याममायां वा यजेत" (आप० श्रौ० १०।२।८) इति वाक्येन पौर्ण-

---

१ प्रधानयागानन्तरं प्रधानयागस्य पौष्कल्यापादकः स्विष्टकृदग्निदेवताको यागः स्विष्टकृत् ।

२ प्रधानयागसमनन्तरम् इडापात्र्यां विधिना गृहीतम् अवशिष्टं हविः इडा इत्युच्यते ।

३ अनु पश्चात् प्रधानयागानन्तरमिज्यते यैस्ते अनुयाजाः मन्त्राः, होमाः, देवाश्च ।

४ "इदं द्यावापृथिवी" (का० हौ० प० ११३) इत्यनुवाकप्रतिपाद्यो मन्त्रविशेषः सूक्तवाकः । आवाहन—प्रधानयागादौ या देवताः पूर्वमुक्ताः, ताः पुनरनेनापि मन्त्रसमुदायेन उच्यन्ते इति सूक्तवाकः ।

५ "तच्छंयोरावृणीमहे" (का० हौ० प० ११९) इति मन्त्रस्य शंयुनाम-बृहस्पतिपुत्रस्तुतिरूपत्वात् (शंयुपदघटितत्वात्) शंयुवाक इति नाम ।

६ देवपत्नीदेवताकाः पत्नीकर्तृका दर्शपूर्णमासाङ्गभूता यागविशेषाः पत्नीसंयाजाः ।

७ प्रधानयागादौ सम्यक् इष्टाः देवता इज्यन्ते अनेन स होमः समिष्टयजुः, मन्त्रश्च ।

८ वैश्वदेवयागे—आग्नेयोऽष्टाकपालः, सौम्यश्चरुः, सावित्रोऽष्टाकपालः, सारस्वतश्चरुः, पौष्णश्चरुः प्रपिष्टानाम्, मारुतः स्वतवसः सप्तकपालः, वैश्वदेवी पयस्या, द्यावापृथिवीय एककपाल इति अष्टौ प्रधानानि । अयमेव वैश्वदेवयागः वैश्वदेवपर्व इति चोच्यते । (का० श्रौ० ५।१।४-१५) ।

मासी अमा च कालो विहितः। अङ्गानां च प्रतिपत्कालोऽतिदेशेन प्राप्त इत्यङ्ग-प्रधानयोः कालविषयेऽपि विरोधः। अतः कथं सहानुष्ठानमिति प्राप्ते आह—

देशकालौ विरोधे न, कृत्स्नोपदेशात् ॥ ५ ॥

विरोधे न देशकालौ कारणे भवतः। कुतः ? कृत्स्नोपदेशात्। साङ्गाया एव विकृतेः प्राचीनप्रवणादिरूपे देशे विधानादित्यर्थः। एवं च प्राचीनप्रवणे इति वाक्येन वैश्वदेवप्रधानानामिव तदङ्गानामपि प्राचीनप्रवणरूपदेशविधानात् प्रकृतितः समदेशस्य प्राप्त्यभावेनैव विरोधाभावात्। एवं कालस्यापि विकृतौ साङ्गे एव कर्मणि विधानेन प्रकृतितः काले अप्राप्ते एव विरोधाभावादिति भाव[1]ः ॥५॥

[द्वादशाहादौ 'द्वादशाहे सुत्यामागच्छ' इत्येवं सकृदेव सुब्रह्मण्यानिगदे सुत्योपलक्षणम्]

ज्योतिष्टोमे सुब्रह्मण्यानिगदो विहितः। (इन्द्रा[2]गच्छ हरिव आगच्छेत्यादिर्मन्त्रः सुब्रह्मण्यानिगदः) स च सुब्रह्मण्यसंज्ञकेन ऋत्विजा पठनीयः। स च द्विविधः। एकः सुत्याकालिकः, अपर उपसत्कालिकः। उपसच्च द्वितीय-तृतीय-चतुर्थदिवसेषु अनुष्ठीयते। तत्र प्रथमोपसद्दिने त्र्यहे सुत्यामागच्छ इति पठ्यते। द्वितीयोपसद्दिने द्व्यहे, तृतीयोपसद्दिने श्वः, सुत्या[3]दिने अद्य सुत्यामागच्छेति। केषांचिन्मते चतुरहे सुत्यामागच्छेति प्रयोगः। स च निगदो द्वादशाहे अतिदेशेन प्राप्तः। तत्र च द्वादशोपसदः, द्वादश सुत्यादिनानि। तत्रायं संशयः। प्रथमोपसद्दिने निगदे पठनीये त्र्यहे इति स्थाने द्वादशाहपदं प्रक्षेप्तव्यम्। एवं च 'द्वादशाहे सुत्यामागच्छ' इति सकृदेव सुत्याशब्दोच्चारणम्, अथवा द्वादशे, त्रयोदशे, चतुर्दशे सुत्यामागच्छ इत्यादि यावन्ति सुत्यादिनानि, तावतां सुत्याशब्दानां पाठः कर्त्तव्य इति ?

अयं भावः। सुब्रह्मण्यानिगदविधौ "त्र्यहे सुत्यामागच्छ" इति वा "इत्यहे सुत्यामागच्छ" (श० ३।३४।१८) इति वा श्रुतम्। तत्र त्र्यहे इत्यस्य त्रिषु दिनेषु पूर्णेषु चतुर्थदिनार्थं हे इन्द्र त्वमागच्छ इति दिनपरत्वमङ्गीक्रियेत, तदा द्वादशाहे सुत्यानां बहुत्वात् तावद्दिनप्रकाशनार्थं तत्तद्दिनवाचकपदविशिष्टस्य सुत्याशब्दस्यावृत्तिः कर्त्तव्या भवेत्, यथा द्वादशाहे, त्रयोदशाहे, चतुर्दशाहे सुत्यामागच्छेत्यादि। यदि च नास्य मन्त्रस्य दिनप्रकाशकत्वं, किन्तु देवतारूपस्येन्द्रस्य प्रकाशनमेव अस्य मन्त्रस्य विवक्षितं भवेत्, तर्हि एतावत्सु दिनेष्वतीतेषु हे इन्द्र त्वं यागार्थमागच्छ इति सकृदेव सुत्याशब्दोच्चारणं भवेत्। यथा—द्वादशाहेऽतीते सुत्यामागच्छ इति। एवं संशये प्राप्ते पूर्वपक्षमाह—

अहर्गणे सुब्रह्मण्यायाः सर्वोपलक्षणं, प्रकृतिवत् ॥६॥

अहर्गणे सुत्यानां बहुत्वे उपसत्कालिके सुब्रह्मण्यानिगदे सर्वेषामह्नां भेदेनोपलक्षणम् = अभिधानं कर्त्तव्यम्। कुतः ? प्रकृतिवत्, तदानीमेव विकृतिरपि प्रकृतिवत् कृता भवेदित्यर्थः। प्रकृतौ हि सुत्यादिनमेकमासीत् इति तदेवोपलक्षितम्। विकृतावपि अह्नामेवोपलक्षणं कर्त्तव्यमिति तद्बहुत्वे तद्वाचकशब्दावृत्तिरवश्यं कर्त्तव्यैव। अन्यथा प्रकृतौ अहरुपलक्षितम्, विकृतौ च देवतोपलक्षितेति वैरूप्यमापद्येत ॥ ६ ॥

---

१ एतच्च पूर्वमीमांसायाम् ११।१।१ विचारितम्।

२ इन्द्रागच्छ हरिव आगच्छ मेधातिथिर्मेष वृषणस्यश्व मेने। गौराव स्कन्दिन्नहल्यायै जार कौशिक ब्राह्मण गौतम ब्रुवाण। त्र्यहे सुत्यामागच्छ मघवन्देवा ब्राह्मणा आगच्छत। (श० ३।३।४।१८) इति सुब्रह्मण्यानिगदः।

३ अभिषवादिसंस्कृतः सोमो यस्मिन् दिने हूयते तत् सुत्यादिनम्।

१ तन्त्रविचार

एवं प्राप्ते सिद्धान्तमाह—

तन्त्र काल कर्म, प्रत्यहमविधानात् ॥७॥

तन्त्रेति तृतीयार्थे, कालेति सप्तम्यर्थे लुप्तविभक्तिको निर्देशः। उपसत्कालिकं यत्सुब्रह्मण्या[1]ह्वानं तत्तन्त्रेण सकृत्कर्त्तव्यम्। कुतः? प्रत्यहमविधानात् प्रतिदिनमुच्चारणस्य कर्त्तव्यत्वेन विध्यभावादित्यर्थः। अयं भावः—प्रकृतौ न सुत्यादिनस्य प्रकाशनमभिलषितं, तथात्वे दिनप्रकाशनेनादृष्टार्थत्वापत्तेः। किन्तु यागीयदेवतास्मरणम्। तस्य च करिष्यमाणे यागे उपयोगित्वात् दृष्टार्थत्वं भवति। अत एव दृष्टे सत्यदृष्टकल्पनाया अन्याय्यत्वात् त्र्यहे सुत्यामागच्छ इत्यस्य हे इन्द्र त्वं त्र्यहे अतीते सति सुत्यां प्रत्यागच्छ इत्यर्थमङ्गीकृत्य देवतास्मरणार्थत्वमेवाङ्गीकृतम्। तद्वत् विकृतावपि तस्यैव देवतास्मरणस्य दृष्टस्य कर्त्तव्यतया सकृदुच्चरितेनैव सुत्याशब्देन तल्लाभात् त्र्यहे इति स्थाने द्वादशाहपदं प्रक्षिप्य हे इन्द्र द्वादशसु दिनेष्वतीतेषु सर्वसुत्यां प्रति आगच्छ इति सकृदेव सुत्याशब्दोच्चारणम्। एतच्च पूर्वमीमांसायाम् (११।३।१०-११) विचारितम् ॥७॥

[एकद्रव्ये कर्मावृत्तौ मन्त्रवचनं सकृत्]

"स्फ्येन पदं[2] त्रिः परिलिखत्यस्मे रमस्वेति" (का० श्रौ० ७।६।१७) इत्यादौ क्रियावृत्तौ सत्यां प्रतिक्रियं मन्त्रावृत्तिः? उत सर्वादौ सकृदेव मन्त्रोच्चारणम्? इति संशये क्रियायाः प्रधानत्वात्, मन्त्रस्य क्रियाङ्गत्वात् क्रियावृत्तौ सत्यां मन्त्रस्याप्यावृत्तिरिति पूर्वपक्षे प्राप्ते सिद्धान्तयति—

एकद्रव्ये कर्मावृत्तौ सकृन्मन्त्रवचनं, कृतत्वात् ॥८॥

'प्रतिप्रधानं गुण आवर्त्तनीय' इति न्यायेन यत्र एकोद्देशेन क्रियाया आवृत्तिर्विहिता, यथा-प्रकृते पदोदाहरणे एकं पदरूपं द्रव्यमुद्दिश्य वारत्रयं परिलेखनं विहितं, तत्र सकृदेव मन्त्रवचनम्। कुतः? कृतत्वात्। मन्त्रस्य हि कार्यमनुष्ठेयक्रियाप्रकाशनरूपम्, तच्च सकृन्मन्त्रोच्चारणेनापि कृतं भवति। अतश्च क्रियाभ्यावृत्तावपि न मन्त्रावृत्तिः ॥८॥

[हविर्ग्रहण-बर्हिस्तरणादौ मन्त्रावृत्तिः]

एवं पूर्वोक्तन्यायेन बर्हिर्ग्रहण-बर्हिर्लवनादावपि सकृन्मन्त्रवचने प्राप्ते तदपवादमाह—

न ग्रहण-लवन-स्तरणा-ऽऽज्यग्रहणेषु तु ॥९॥

हविर्ग्रहणे, बर्हिर्लवने, बर्हिस्तरणे, आज्यग्रहणे च न सकृन्मन्त्रोच्चारणम्, किन्तु हविर्ग्रहणे प्रतिग्रहणम्, बर्हिर्लवने बर्हिस्तरणे च प्रतिमुष्टि, आज्यग्रहणे प्रतिस्रुवं च मन्त्र आवर्त्तनीयः। एतच्च पूर्वमीमांसायां (१।४।१५) विचारितम् ॥९॥

[आज्यस्य द्वितीयग्रहणादौ वचनान्मन्त्रनिवृत्तिः]

तत्रापि विशेषमाह सूत्रद्वयेन—

वचनादाज्ये ॥१०॥

---

१ सुब्रह्मण्यसंज्ञकेन ऋत्विजा यदिन्द्रायात्राह्वनं क्रियते तत् सुब्रह्मण्याह्वानम्।

२ पदं सोमक्रयण्याः पदनिक्षेपस्थानम्। यज्ञशालायां हि सोमः क्रीयते। तच्च "अरुणयैकहायन्या गवा सोमं क्रीणाति" (श० ३।३।१।१३-१६) इति गवैव विहितम्। गौश्च यजमानगोष्ठे तिष्ठन्ती यदा क्रयणार्थं शालां प्रत्यानीयते तदा तस्याः सप्तमे पदे यदवस्थानं तत्पदं, तत् स्फ्येन परिलिख्य गृह्णीयात्। तस्य चोपयोगः सोमाधारशकटस्य अक्षाञ्जने भवति (का० श्रौ० ८।३।२८)

आज्यग्रहणे प्रथमग्रहणे एव मन्त्रपाठः। द्वितीयादिग्रहणेषु तु वचनान्मन्त्रनिवृत्तिः। "स एतेन यजुषा सकृज्जुह्वां गृह्णाति द्विस्तूष्णीम्, स एतेनैव यजुषा सकृदुपभृति गृह्णाति सप्तकृत्वस्तूष्णीम्" (श. १।३।५।१८) इत्यादिवचनात् ॥१०॥

[अन्त्यमुष्टिग्रहणे च वचनान्मन्त्रनिवृत्तिः]

मुष्टौ चोत्तमे ॥११॥

हविर्ग्रहणे उत्तमे = चतुर्थे मुष्टौ "चतुर्थं तूष्णीम्" (आप० श्रौ० १।१७।२) इति वचनात् मन्त्रनिवृत्तिः कार्या। ग्रहणत्रयं तु मन्त्रेण कार्यम् ॥११॥

[अनेकामनोज्ञस्वप्नदर्शनादौ सकृन्मन्त्रवचनम्]

ज्योतिष्टोमे दीक्षितस्य दुःस्वप्नदर्शने, नदीतरणे, गमनसमये आत्मन उपरि वृष्टिपाते, अनेकामेध्यदर्शने, चयनयागे वनीवाहनप्रयाणे च पृथक् पृथक् प्रायश्चित्तमाम्नातम्। तत्र युगपदनेकस्वप्नादिसन्निपाते सर्वोद्देशेन सकृदेव मन्त्रपाठरूपं प्रायश्चित्तम्? उत प्रतिनिमित्तं मन्त्रावृत्तिरिति संशये पूर्वन्यायेन आवृत्तौ प्राप्तायामाह—

स्वप्न-नदीतरणा-ववर्षणा-मेध्यदर्शन-प्रयाणेषु तु सकृत्, काल-द्रव्यै-कार्थत्वात् ॥१२॥

अत्र त्रयो हेतवः—कालैकत्वात्, द्रव्यैकत्वात्, अर्थैकत्वाच्चेति। तत्र युगपदनेकदुःस्वप्रदर्शने, (का० श्रौ० २५।११।२०) युगपदनेकामेध्यदर्शने, (का० श्रौ० २५।११।२४) युगपदनेकवृष्टिधारावर्षणे (का० श्रौ० २५-११-२३) च कालैकत्वात्सकृन्मन्त्रपाठः। नदीतरणे (का० श्रौ०२५। ११।२२।) अनेकस्रोतसां भेदे = अनेकप्रवाहतरणे द्रव्यैकत्वात्; वनी[1]वाहने विश्रम्य विश्रम्य प्रयाणेऽपि (का० श्रौ १८।६।१८) आसमीहितदेशप्राप्तेरेकं गमनमिति कृत्वा एकार्थत्वात् सकृदेव 'प्रेदग्न' (शु० य० १२।३२) इति मन्त्रपाठो न भेदेन ॥१२॥

[कालभेदेन निमित्तप्राप्तौ मन्त्रावृत्तिः]

यत्र तु कालभेदेन पुनस्तस्यैव निमित्तस्य प्राप्तिस्तत्रापि पूर्वन्यायेन सकृन्मन्त्रवचने प्राप्ते आह—

न, निमित्तभेदात् ॥१३॥

यत्र कालभेदेन पुनस्तानि निमित्तानि समापतेयुस्तदा पुनर्मन्त्रः पठनीयः। कुतः? निमित्तभेदात्। तद्भेदाच्च नैमित्तिकस्य मन्त्रस्याप्यावृत्तिः। प्रतिनिमित्तं नैमित्तिकावृत्तिरिति [2]न्यायात् ॥१३॥

[आधानादिसंस्कारस्य प्रतिकर्म नावृत्तिः]

अप्रधानकालऽऽ० सकृद, सन्निपातात् ॥१४॥

प्रधानानुष्ठानकाले एव यस्यानुष्ठानं न विहितं, किन्तु स्वातन्त्र्येणान्यः कालो यस्य विहि-

१ चयने उखायामग्निं भृत्वा तस्य "एष संवत्सरभृतो भवति" (शत० ब्रा० ६।७।१।१९) इत्यादिना संवत्सरादिकालेषु धारणं विहितम्। धारणानन्तरम् उख्यमग्निमनसि कृत्वा तदनः अनडुद्भ्यां स्ववसतिपर्यन्तं वाहयति। तत्कर्म वनीवाहनशब्देनोच्यते। (का० श्रौ १६।६।१४–२१) तत्र न प्रतिप्रयाणं मन्त्रपाठः, किन्तु गमनादौ सकृदेव।

२ एतच्च पूर्वमीमांसायां एकादशेऽध्याये पञ्चमे पादे सप्तदशाष्टादशाधिकरणयोर्विचारितम्।

तत्तदङ्गमप्रधानकालम् ; यथा—आधा[1]नम् । तस्य हि दर्शपूर्णमासाग्निजनकत्वेऽपि न तत्काले तस्य विधानं, किन्तु "वसन्ते ब्राह्मणो ऽग्नीनादधीत" (श० २।१।३।४) इत्यादिना स्वतन्त्र एव कश्चित्कालो विहितः । तादृशमाधानादिकं सकृदेवानुष्ठेयं, न तु प्रयाजादिवत् प्रतिदर्शपूर्णमासम् दीक्ष[2]णीयादिवद्वा प्रतिसोमं तस्यावृत्तिः । कुतः ? असन्निपातात्, केन चित्कर्मणा सह असंबन्धादि[3]त्यर्थः ॥१४॥

[पश्वनेकत्वे ऽपि यूपैक्यम्].

यूपः ॥१५॥

यथा ऽग्न्याधेयं, तद्वद्यूपो ऽपि सकृदेव स्थापनीयः । कुतः ? अप्रधानकालत्वात् । अयं भावः—ज्योतिष्टोमे सन्ति त्रयः पशुयागाः । अग्नीषोमीयः, सवनीय, आनुबन्ध्यश्च । तत्राग्नीषोमीय औपव[4]सथ्येऽहनि अनुष्ठीयते, सवनीयः सुत्यादिने, आनुबन्ध्यश्चान्ते । अत्र च अपेक्षितो यूपः सकृदेव सम्पाद्यः । यूपो हि न पशुप्रयोगमध्ये विहितः । तस्य च "दीक्षासु[5] यूपं छिनत्ति" (आप० श्रौ० १०।५।१४) इति वाक्येन दीक्षाकाले एव विधिः । स च न प्रधान भूतस्य पशोः कस्य चित्कालः । अतः अप्रधानकालो यूपो ऽपि दीक्षाकाले सम्पादितः सर्वेषां पशूनामुपकरोति । पूर्वन्यायेनैव गतार्थो ऽप्ययं "पशवे वै यूपमुच्छ्रयन्ति" (श० ३।७।२।४) इति वाक्येन प्रतिपशु यूपप्राप्ताशङ्काया निरासार्थो वेदि[6]तव्यः ॥१५॥

[यूपस्येव स्वरोरैक्यम्]

स्व[7]रुश्च, स[ं]स्थावचनात् ॥१६॥

यूपार्थं काष्ठस्य छेदने क्रियमाणे प्रथमच्छेदनेन यः शकलः परापतति स स्वरुः। (श० ३।६।४।११) सोऽपि स्वरुर्यूपवत् त्रयाणां पशूनां साधारणः । कुतः ? संस्थावचनात्। "स्वरुहोमेन हि यूपः संस्थाप्यत" इति वचनेन स्वरुहोमादेव यूपस्यापि अपवृक्तिः श्रूयते । यदि प्रथमपशावेव स्वरुर्हूयेत तदानीमेव यूपस्यापि अपवृक्त्या = लौकिकत्वेन पशुत्रयसाधारण्यं यूपस्य न स्यात् । अतः स्वरुहोमस्त्रयाणामन्त एव कार्य इति स्वरुरपि त्रितयार्थः । अपवृक्तिः समाप्तिः ॥१६॥

तन्निर्वृत्तेश्च ॥१७॥

तत एव यूपात्स्वरोर्निष्पद्यमानत्वादेकत्वसङ्ख्याविशिष्टाद्यूपादेकस्यैव स्वरोर्निष्पत्तिर्युक्तरूपा । अतोऽप्येक एव स्वरुः कार्यः । एतच्च पूर्वमीमांसायां (११।३।५) विचारितम् ॥ १७ ॥

---

१ गार्हपत्या—ऽऽहवनीय-दक्षिणाग्नीनां तत्तदायतनेषु सूत्रोक्तविधिना स्थापनमाधानम्, अग्न्याधानमिति चोच्यते । गार्हपत्यादि—नामव्यपदेशस्तु भाविसंज्ञामादायेति बोध्यम् ।

२ दीक्षणीया नाम सोमयागे प्रथमेष्टिः । दीक्षणीया दीक्षाप्रयोजनेष्टिः इति नारायणी वृत्तिः (आश्व० श्रौ० ४।१)

३ एतच्च पूर्वमीमांसायां (११।३।१०—११) विचारितम् ।

४ सुत्यादिवसात्पूर्वमहः औपवसथ्यम् ।

५ सोमयागाङ्गभूतयमनियमपरिग्रहो दीक्षा ।

६ एतच्च जैमिनीये (११।३।३) विचारितम् ।

७ यूपतक्षणकाले पतितं शकलं यूपे रशनायां गुह्यमानं स्वरुपदवाच्यम् ।

[दक्षिणाऽऽम्नानात् ऋत्विजां गुणकर्मत्वम्]

दर्शपूर्णमासादिकर्मणां फलार्थिनो विधानात् तानि कर्माणि साङ्गानि स्वयं यजमानेनैवानुष्ठेयानि इति प्राप्ते आह—

कर्माणि पुरुषाणाम् ॥ १८ ॥

दर्शपूर्णमासादौ होत्रध्वर्य्वादीनां कर्तृत्वं संभवति। कुतः ? दक्षिणाऽऽम्नानात् इति शेषः। दर्शपूर्णमासादिषु हि "अन्वाहार्यो दक्षिणा" (श० ११।१।२।७) "गौर्दक्षिणा" (श० २।४।३।१३) इत्यादिना दक्षिणा विधीयते। सा च कर्मकरेभ्य एव दीयते भृतित्वेन। यदि यजमान एव सर्वं कार्यं कुर्यात्तर्हि स्वस्य स्वयं भृतिदानासंभवात्तदाम्नानमनर्थकमेव स्यादिति भावः ॥१८॥

[स्वामिनो द्रव्यपरिग्रहादि—प्रधानकर्मकर्तृत्वम्]

एवं सर्वत्र प्राप्ताविदमुच्यते—

प्रधानꣳ स्वामी, फलयोगात् ॥१९॥

यत्प्रधानं द्रव्यत्यागादिरूपहविस्त्याग-दक्षिणादानादि, तद्यजमान एव कुर्यात्। कुतः ? फलयोगात्। प्रधानस्यैव फलेन संबन्धात्। तस्य स्वेनैव करणे स्वस्य फलभोक्तृत्वसंभवात् ॥१९॥

[आशीःप्रार्थनमन्त्रजप—मुण्डनसंस्कारादिकं यजमानकर्तृकम्]

एवम् आत्मगामिन आशीर्वचनरूपा मन्त्रा, वपन-पावनादयः फलिसंस्काराश्च यजमानेनैव कर्त्तव्या इत्याह—

पुरुषयोगिमन्त्र-संस्कारयोस्त्यागे, सामर्थ्यात् ॥२०॥

पुरुषसंम्बन्धी यो मन्त्रः "तनूपा अग्ने ऽसि तन्वं मे पाहि" (शु० य० ३।१७) इत्यादिः आत्मगामिफलप्रार्थनारूपः, यश्च संस्कारो वपनादिः, तावुभावपि त्यागे[1] यजमाने भवतः। (त्यागशब्देनात्र यजमानो लक्ष्यते) कुतः ? सामर्थ्यात्। यजमान एव हि स्वीयमाशीःप्रार्थनं स्वयमेव कर्त्तुं समर्थः। संस्कारो ऽपि यजमाने एव फलभोक्तरि कृतः तत्रैव फलभोक्तृत्वरूपां योग्यतामाधातुं समर्थः। एतच्च जैमिनिना (३।८।७) निर्णीतम् ॥२०॥

[वाचनिकं शुक्रग्रहान्वारम्भादिकं च यजमानकर्त्तृकम्]

वचनादन्यत् ॥२१॥

उक्तव्यतिरिक्तेष्वपि कर्मसु वचनाद्यजमानस्य कर्त्तृत्वं भवति। यथा "यजमान उखां करोति" (का० श्रौ० १६।३।२३) "यजमानो वेदं करोति" (का० श्रौ० १।३।२२) इति ॥२१॥

[ऋत्विजां समाख्यानुरोधेन कर्मकरणम्]

शेषमितरे यथाख्यम् ॥२२॥

यजमानकर्त्तव्यावशिष्टं सकलमङ्गजातम् इतरे ब्रह्मादयो यथाख्यं स्वस्वसमाख्यानुसारेण कुर्युः। आख्यामनतिक्रम्येति यथाख्यम्। यथा—होता हौत्रं, ब्रह्मा ब्रह्मत्वम्, अध्वर्युराध्वर्यवम् इत्यादि ॥२२॥

---

१ चतुर्थ्यन्तं देवतानाम उद्दिश्य न मम इति यजमानः पठति स त्यागः।

[धृतब्रह्मसूत्राः कर्म कुर्युः]

[1]उपवीतिनः ॥२३॥

ये कर्मकरास्ते उपवीतं धृत्वैव कर्म कुर्युः ॥२३॥

[प्राक्संस्थान्युदक्संस्थानि वा कर्माणि कार्याणि]

प्राञ्च्युदञ्चि वा ॥२४॥

सर्वाणि कर्माणि पात्रासादनादीनि पश्चादारभ्य प्राक्संस्थानि, दक्षिणत आरभ्य उदक्संस्थानि वा कार्याणि । परिस्त[2]रण—पर्यग्नि[3]करण—[4]पर्युक्षणादिकमप्युत्तरतः समापनीयम् ॥२४॥

[परिभ्रमण—परिस्तरणादीनि च प्रदक्षिणं कार्याणि]

आवृत्ति-सामन्तेषु प्रदक्षिणम् ॥२५॥

"सूर्यस्येत्यावर्त्तते" (का० श्रौ० ३।८।१७) 'आवृत्य वेदिम्" (का० श्रौ० २।८।५) इत्यादौ यत्र आवर्त्तनं = भ्रमणं विहितं, तत्र प्रदक्षिणमावर्तनं कर्त्तव्यम् । एवं समन्ताद्भवेषु पर्यग्निकरण—परिस्तरण-पर्युक्षणादिषु च कर्मसु परिस्तरणादिकं पूर्वत आरभ्य उदक्संस्थं प्रदक्षिणं कर्त्तव्यम् ॥२५॥

[पित्र्याणि कर्माणि दैवकर्म-विपरीतक्रमेण, सकृत, दक्षिणसंस्थानि चानुष्ठेयानि]

विपर्यस्य पित्र्येषु तु, सकृ, दक्षिणा च ॥२६॥

पैतृकेषु कर्मसु विपर्यासेन प्रा[5]चीनावीतिना अप्रदक्षिणं सर्वं कर्तव्यम् । दैवे कर्मणि यदुल्लेखनादिकं कर्त्तव्यतया स्मर्यते, तत् पित्र्ये कर्मणि सकृदेव कार्यम् । पित्र्ये कर्मणि दक्षिणैव च दिग् भवति । अतश्च सर्वं कर्म दक्षिणसंस्थं दक्षिणामुखेन च कार्यम् ॥२६॥

[क्रियार्थप्रधानद्रव्यनाशे साङ्गावृत्तिः]

प्रधानद्रव्यव्यापत्तौ साङ्गावृत्ति, स्तदादेशात् ॥२७॥

प्रधानयागाद्यनुष्ठानार्थं यद् द्रव्यमुपात्तं, तस्य द्रव्यस्य तादृशप्रधानानुष्ठानात् पूर्वमेव नाशे सति साङ्गस्यैव प्रधानस्य आवृत्तिर्भवति । कुतः ? तदादेशात् । तेन प्रधानहविषा अङ्गानि प्रोक्षणा-ऽवघात-पेषणादीनि स्वसिद्ध्यर्थमाक्षिप्तानि । तन्नाशे तेषामपि विनाशादित्यर्थः ॥२७॥

इति कातीयश्रौतसूत्रवृत्तौ प्रथमे परिभाषाध्याये सप्तमी कण्डिका ॥७॥

---

१ "उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे" (अम० २।७।४९) इति कोशात् दक्षिणबाहुना उद्धृ सव्यांसस्थितं स्मृत्युक्तरीत्या निर्मितं यज्ञोपवीतमित्युच्यते ।

२ "अग्नेः षोडशभिर्दर्भैः पूर्वादिषु परिस्तृतिः" इति वचनात् अग्नीनां पूर्वादिक्रमेण दर्भैः स्तर परिस्तरणम् ।

३ हविषामासमन्तात् प्रादक्षिण्येन उल्मुकस्य भ्रमणं पर्यग्निकरणम् ।

४ जलसहितेन पाणिना अग्न्यायतनाद्बहिः ऐशानदिशमारभ्य पुनस्तद्दिक्पर्यन्तं दूरतोऽस्पर्शं प्रदक्षिणं जलपरिषेकः पर्युक्षणम् ।

५ उपवीतविपरीतं सव्योद्धृतं दक्षिणांसस्थितं प्राचीनावीतम् ।

[व्रीहि—यवयोरन्यतरेण यागानुष्ठानम्]

"व्रीहिभिर्यजेत", "यवैर्यजेत" इति वाक्यद्वयेन यत्र एककार्योद्देशेन व्रीहीणां यवानां च विधानं, तत्र किं व्रीहिभिर्यवैर्वा विकल्पेन यागः कर्त्तव्यः ? उत व्रीहिभिर्यवैश्च समुच्चितैः, अथवा व्रीहिभिर्यवैश्च उभयैरपि पृथक् पृथक् एकस्यै देवतायै आवृत्या यागः कार्य ? इति संशये पूर्वपक्षयति—

गुणानामेकार्थानाꣳ सर्वारम्भ, श्चोदितत्वात् ॥१॥

पुरोडाशनिष्पत्तिरूपैकप्रयोजनकानां गुणानां व्रीहियवानां विषये सर्वैरेव समुच्चितैः कर्मानुष्ठेयम् । कुतः ? चोदितत्वात्, सर्वेषामपि तदर्थमेव विहितत्वात् ॥१॥

एवं प्राप्ते आह—

न, कृतत्वात् ॥२॥

न सर्वैः समुच्चितैर्यागः, किन्तु विकल्पेन । कुतः ? कृतत्वात्, एकैनैव व्रीह्यादिद्रव्येण पुरोडाशनिष्पत्तिरूपप्रयोजनस्य सम्पन्नत्वात् । व्रीहिभिर्यजेत इत्यत्र हि तृतीयाश्रुत्या व्रीहीणामितरनैरपेक्ष्येण साधनत्वं श्रूयते । तच्च व्रीहिमात्रनिष्पादितेन पुरोडाशेन यागानुष्ठाने ऽनुगृहीतं भवति । अन्यथा तद्बाध्येतेत्यपि इति भावः ॥२॥

यदि चैवं मन्यते एकेनैव द्रव्येण यागे निष्पन्ने ऽपि विध्यन्तरानुग्रहार्थं द्रव्यान्तरेणापि यागस्यावृत्तिराश्रीयते इति, तत्राह—

अनारभ्यत्वात् ॥३॥

द्रव्यस्य यागं प्रति गुणभूतत्वेन गुणानुरोधेन प्रधानावृत्तेरन्याय्यतया न श्रुत्यन्तरानुग्रहार्थं यागोऽभ्यसितुमर्हति । अतो विकल्प एव युक्तो, न समुच्चय इति भावः ॥३॥

दर्शनाच्च ॥४॥

"वर्षवृद्धा उ हैवैते यदि व्रीहयो यदि यवाः" (श० १।२।४।२०) इति व्रीहि—यवयोर्विकल्पेन श्रवणाच्च विकल्प एव, न समुच्चयः ॥४॥

श्रुत्यानर्थक्यमिति चेत् ॥५॥

व्रीहि—यवयोर्विकल्पे अन्यतरश्रुतेरानर्थक्यं भविष्यतीति चेत् ॥५॥

तत्रोत्तरमाह—

कालान्तरेऽर्थवत्वं स्यात् ॥६॥

कालान्तरानुष्ठेयप्रयोगे शास्त्रान्तरस्य प्रयोजनवत्वं भविष्यतीत्यर्थः । अयं भावः—साग्निकस्य शरदि व्रीह्या[१]ग्रयणं, वसन्ते च यवाग्रयणं विहितम् । (का० श्रौ० ४।६।१) तत्र व्रीह्याग्रयणं कृत्वा यवाग्रयणात्प्राक् व्रीहिभिरेव दर्शपूर्णमासादिकमनुष्ठेयम्, एवं यवाग्रयणं कृत्वा व्रीह्याग्रयणात्प्राक् यवैरेव यागो विधेय इति नियमोऽस्ति (आप० श्रौ० ६।३१।१३) । एवं च व्रीहियागकाले यवश्रुतेरनर्थकत्वे ऽपि यवयागकाले यवश्रुतिः सार्थिकैव, इति व्यवस्थितविकल्पोऽयमिति भावः ।

---

१ अग्रे नवान्नोत्पत्यनन्तरम् आदौ अयनमाचरणं यस्य तदाग्रयणं नाम यज्ञः । एतत् कृत्वैव नवमन्नं प्राश्यते नाकृत्वेति ।

यद्यपि "रूपं कालो ऽनुनिर्वापो देवता श्रपणं तथा। आदौ ये विधृताः पश्चात्त इमे सर्वदा स्मृताः" (त्रिकाण्डमं० २६) इति शास्त्रेण प्रथमप्रयोगे गृहीतद्रव्यस्यैव द्वितीयादिप्रयोगे ऽपि ग्रहणावश्यंभावः; तथापि "व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेताऽऽग्रयणात्, यवैरिष्ट्वा यवैरेवा व्रीह्याग्रयणात्" (आप० श्रौ० ६।३१।१३) इत्यापस्तम्बसूत्रानुसारेण आहिताग्नेः शरदि व्रीह्याग्रयणविधानात्, वसन्ते च यवाग्रयणविधानात् तद्विधिबलात् यवग्रहणावश्यंभावे सति तत्र शास्त्रान्तरस्य चारितार्थ्यं भवतीत्याशयः। एतच्च पूर्वमीमांसायाम् (१२।३।४) स्पष्टम् ॥६॥

[ऋज्वादिगुणानामाघारे समुच्चयः]

"ऋजुमाघारयति" "प्राञ्चमाघारयति" "सन्ततमाघारयति" (तै० स० २।५।११ "दीर्घमाघारयति" (आप० ३।१२।१८) इति आघारसंज्ञकौ होमौ प्रकृत्य ऋज्वादयो धर्मा विहिताः। तत्र तेषां समुच्चय उत विकल्प? इति संशये उक्तन्यायेन व्रीहि-यववद्विकल्पे प्राप्ते आह—

धर्ममात्रेषु समुच्चयोऽविरोधे ॥७॥

अदृष्टार्थानामृज्वादीनामङ्गानां मध्ये विरोधाभावे सति समुच्चयः कर्त्तव्यो, न विकल्पः। नहि ऋज्वादीनां परस्परं विरोधोऽस्ति। एतच्च जैमिनीये(११।३।६) विचारितम् ॥७॥

[होतृका—ऽऽधानमन्त्राणां समुच्चयः]

अग्निमन्थनकाले होत्रा पठनीया बह्वो मन्त्रा आम्नाताः क्रि[1]यमाणानुवादिनः "अभि त्वा देव" इत्यादयस्त्रयोदश (का० हौ० प० ३।२)। एवम् अग्निप्रणयनादावपि "प्र देवं देव्या धिया" इत्याद्या अष्ट ऋच आम्नाताः (का० हौ० प० ३।५)। एवमाधानमन्त्रा अपि भूर्भुवः स्वः (का० श्रौ० ४।६।११) इत्याम्नाताः। तत्र सत्स्वपि बहुषु मन्त्रेषु यः कश्चिदेको मन्त्रो विकल्पेन पठनीय उत सर्वे मन्त्राः? एवमाधानेऽपि भूर्भुवः स्वः इति व्याहृतित्रये विकल्पेन एका व्याहृतिः पठनीया उत व्याहृतित्रितयम्? इति संशये—मन्त्राणामनुष्ठेयक्रियासारकत्वस्य निर्णीतत्वात् एकेनैव मन्त्रेण तन्निष्पत्तेः एको यः कश्चिन्मन्त्रः पठनीय इति प्राप्ते आह—

होत्रा—ऽऽधानयोः ॥८॥

पूर्वसूत्रात् समुच्चय इत्यनुवर्त्तते। होतृकेषु क्रियमाणानुवादिषु आधानाङ्गभूतव्याहृतिषु च समुच्चय एव। कुतः? अदृष्टार्थत्वात्। क्रियमाणानुवादिनो हि मन्त्रा अदृष्टार्थाः, अतो न विकल्पः। आधानमन्त्रेष्वपि "त्रिभिरक्षरैर्गार्हपत्यमादधाति पञ्चभिरा हवनीयम्" (तै० ब्रा० १।१।५) (श० ब्रा० २।१।४।१४) इति वचनात्समुच्चयः। एतच्च जैमिनीये (१२।३।१६) विचारितम् ॥८॥

पूर्वोक्तन्यायेन सर्वत्र प्राप्तं समुच्चयं क्वचिदपवदति—

न या[2]ज्या—ऽनुवाक्या[3]सु, विरोधात् ॥९॥

एकस्मिन्प्रकरणे यत्र बह्व्यो याज्या बह्व्यश्च अनुवाक्याः पठिताः, तासु न समुच्चयः।

---

१ मन्त्रास्त्रिविधाः। करणमन्त्राः, क्रियमाणानुवादिनो, जपमन्त्राश्च। यं मन्त्रं पूर्वमुच्चार्य मन्त्रान्ते कर्म क्रियते ते करणमन्त्राः। क्रियाकरणकाले एव यः पठ्यते स क्रियमाणानुवादी मन्त्रः। अदृष्टार्थे कर्मकाले पठनीया मन्त्रा जपमन्त्राः।

२ ये यजामहे इति पूर्विका वषट्कारान्ता हविःप्रदानार्था ऋक् इज्यते अनया इति व्युत्पत्त्या याज्याशब्देनोच्यते।

३ पुरः यागात्पूर्वं देवतामनुकल्पयितुं (आह्वातुं) या ऋक् अनूच्यते सा पुरोऽनुवाक्या, अनुवाक्या इति चोच्यते।

अनुवाक्याया देवतास्मरणरूप-दृष्टप्रयोजनत्वात्, याज्यायाश्च हविःसमर्पणार्थत्वरूप-दृष्ट फलकत्वादेकयैव पुरोऽनुवाक्यया, एकयैव याज्यया तत्कार्यसिद्धेः। एतच्च पूर्वमीमांसायां (१२।४।३) विचारितम् ॥९॥

दर्शनाच्च ॥१०॥

"एकाऽनुवाक्या भवत्येका याज्या" (श० ५।१।३।४) इति लिङ्गाच्च एक एव याज्या— पुरोऽनुवाक्यामन्त्रो भवति, न समुच्चयेन द्वौ वा बहवो वा ॥१०॥

[एकस्मिन् कर्मणि आम्नातानामनेकप्रायश्चितानां समुच्चयः]

एकस्मिन्निमित्ते यत्र अनेकप्रायश्चित्तविधानं तत्र विकल्पः समुच्चयो वा इति संशये पूर्वपक्षयति—

प्रायश्चित्तेषु, दोषनाशात् ॥११॥

अपूर्वस्मात्सूत्रान्नेति वर्त्तते, समुच्चय इति च। एकस्य कर्मणो दोषनिर्घातार्थं यत्र बहूनि प्रायश्चित्तानि विहितानि तत्र समुच्चयेन न सर्वेषां प्रायश्चित्तानामनुष्ठानं, किन्तु विकल्पेन यस्य कस्यचित् एकस्य प्रायश्चित्तस्यानुष्ठानम्। कुतः? एकेनापि प्रायश्चित्तेन दोषनाशात्। अतो विकल्पः ॥११॥

ननु एकेन प्रायश्चित्तेन दोषनाशे द्वितीयस्य वैयर्थ्यं स्यादित्याशङ्क्य सिद्धान्तमाह—

ना,ऽश्रुतेः ॥१२॥

प्रायश्चित्तेऽनुष्ठिते दोषनिवृत्तिर्न भवति। कुतः? अश्रुतेः, तथा अविधानादित्यर्थः। अतश्च दोषनिवृत्त्यभावेन दृष्टार्थत्वाभावाददृष्टार्थतैव। तस्मात्समुच्चयः। एतच्च जैमिनिना (१२।३।५) निर्णीतम् ॥१२॥

प्रत्यक्षाच्च ॥१३॥

"भिन्ने जुहोति" (का० श्रौ० २५।२।५) इति प्रणीतापात्रादिभेदने होमरूपं प्रायश्चित्तं विहितम्। तत्र कृते ऽपि होमे न भिन्नमभिन्नं भवति। अतः प्रत्यक्षेणापि दोषनिवृत्त्यदर्शनात् प्रायश्चित्तानुष्ठानं धर्ममात्रमेव। अतः समुच्चय एव, न विकल्पः ॥१३॥

पुनः पूर्वपक्षी प्रत्यवतिष्ठते—

स्याद्वा, दर्शनात् ॥१४॥

अथवा अस्तु केषां चित्प्रायश्चित्तानां दोषनिवृत्त्यर्थता। कुतः? दर्शनात्, "स यथा पर्वणा पर्व सन्दध्यादेवं० हैव स सन्दधाति य एताभिर्भिषज्यति" (श० ११।५।७।६) इति श्रुत्या सन्धानरूपभैषज्यस्य दर्शनादित्यर्थः। अतो दृष्टार्थत्वाद्विकल्प एवेति भावः ॥१४॥

एवमुपक्षिप्तं पक्षं खण्डयति—

ना, ऽन्यार्थत्वात् ॥१५॥

यदुक्तं दर्शनाद्विकल्प इति, तन्न। कुतः? अन्यार्थत्वात्, सन्धान—भैषज्ययोर्महाव्याहृतिस्तुत्यर्थत्वादित्यर्थः। इत्थं प्रशस्तो महाव्याहृतिहोमो येन सन्धान—भैषज्ये क्रियेते, अतोऽदृष्टार्थत्वात्समुच्चयः ॥१५॥

[कर्मणि जपादिवर्जं मन्त्राणामेकश्रुतिः]

प्रयोगकाले उच्चार्यमाणा मन्त्राः संहितास्वरेण प्रयोज्या, उत ब्राह्मणस्वरेण, उत [१]एकश्रुत्या इति संशये पूर्वपक्षयति—

मन्त्रे स्वरक्रिया यथाम्नात, मविशेषात् ॥१६॥

कर्मणि प्रयुज्यमानो मन्त्रो येन स्वरेण संहितायां पठितस्तेनैव स्वरेण प्रयोज्यः। कुतः ? स्वरान्तरस्य विशेषेणोपदेशाभावात् ॥१६॥

द्वितीयं पूर्वपक्षमाह—

भाषिकस्वरो वा, पपन्नमन्त्रोपदेशात् ॥१७॥

अथवा प्रयोगकाले ब्राह्मणस्वरेण मन्त्राः प्रयोज्या, न संहितास्वरेण। कुतः ? संहितास्वरेण युक्तस्य मन्त्रस्य पुनर्ब्राह्मणस्वरेण स्वरान्तरोपदेशात्। अतो न संहितास्वरः। "छन्दोगा बह्वृचाश्चैव तथा वाजसनेयिनः। उच्चनीचस्वरं प्राहुः स वै भाषिक उच्यते" इति शबरभाष्ये (१२।३।७) ॥ १७ ॥

एवं प्राप्ते सिद्धान्तयति—

तानो वा, नित्यत्वात् ॥१८॥

वाशब्दः पूर्वपक्षव्यावर्त्तकः। तानः = उदात्तादिस्वररहित एकश्रुतिरेव मन्त्राणां स्वरो भवति, न संहितास्वरो, नापि ब्राह्मणस्वरः। कुतः ? नित्यत्वात्, वर्णस्वरूपमात्रोच्चारणाविनाभूतत्वादित्यर्थः। स्वरान्तरस्यानियतत्वात् ॥१८॥

उक्तेऽर्थे व्याकरणस्मृतिं प्रमाणयति—

एकश्रुति दूरात्संबुद्धौ यज्ञकर्मणि, सुब्रह्मण्या-साम-जप-न्यूङ्ख-याजमानवर्जम् ॥ १९ ॥

दूराद्दाह्वाने, सुब्रह्मण्यानिगद-साम-ज[२]प-न्यूङ्[३]ख-याजमानभिन्ना ये मन्त्रा यज्ञकर्मणि प्रयुज्यन्ते, तेषु च एकश्रुतिस्वरः स्यात्। एतच्च जैमिनिना (९।२।७) निर्धारितम् ॥१९॥

---

१ एकश्रुतिर्नाम उदात्तानुदात्तस्वरितस्वराणामभावः। "उदात्तानुदात्तस्वरितानां परः सन्निकर्ष ऐकश्रुत्यम्" इति आश्वलायनश्रौतसूत्रात्। (१।२)

२ जपो मयीदमिति जपति (का० श्रौ० ३।४।१९) इत्यादिः।

३ न्यूङ्खो नाम—सोमयागे प्रातरनुवाकसंज्ञकं शस्त्रं होत्रा शंसनीयत्वेन विहितम्। तत्र एकैकस्या ऋचः यौ अर्द्धर्चयोराद्यौ भागौ, तत्र प्रथमम् अचं वर्जयित्वा द्वितीयस्य अचः स्थाने ओकारं प्लुतम् उदात्तस्वरविशिष्टं च त्रिःपठेत्। ततः प्रथमवारं पञ्च, ततोऽधिकान् वा अर्द्धौकारान् पठेत्। ततः तमेव ओकारं प्लुतं पठित्वा पुनः पञ्च अर्द्धौकारान् पठेत्। ततः पुनरपि तृतीयवारं तमेव ओकारं प्लुतं पठित्वा पुनः त्रीन् अर्द्धौकारान् पठेत्; स एव न्यूङ्ख इत्युच्यते। यथा—"आपो ३ ३० ३० ३० ३० ३० ओ ३ ३० ३० ३० ३० ३० ओ ३ ३० ३० ३० रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च। रायो ३ ३० ३० ३० ३० ३० ओ ३ ३० ३० ३० ३० ३० ओ ३ ३० ३० ३० स्थः स्व पत्यस्य पत्नी सरस्वती तद् गृणते वयोधो३मा पो ३।" इति। एतच्च "चतुर्थेऽहनि प्रातरनुवाकप्रतिपद्यर्द्धर्चाद्योर्न्यूङ्खः। द्वितीयस्वरमौकारं त्रिमात्रमुदात्तं त्रिः। तस्य तस्य चोपरिष्टादपरिमितान्पञ्च वाऽर्धौकारानुदात्तान्। उत्तमस्य तु त्रीन्। पूर्वमक्षरं निहन्यते न्यूङ्खमाने" इति (आश्व० श्रौ० सूत्रे ७।१) स्पष्टम्।

[आम्नातानेकसङ्ख्याकदक्षिणानां विकल्पः]

आधाने "षड् द्वादश चतुर्विंशतिं दद्यात्" (श० २।२।२।३) इति वाक्येन दीयमानदक्षिणायां सङ्ख्या श्रुता, तत्र विकल्पः ? उत समुच्चयः ? इति संशये विकल्पे कारणाभावात् सङ्ख्यानां समुच्चय इति प्राप्त आह—

सङ्ख्याविकल्पो दानसंयोगे, कृतत्वात् ॥ २० ॥

दानसंयोगे या सङ्ख्या श्रुता, तस्या विकल्प एव, न समुच्चयः । कुतः ? कृतत्वात्, एकयैव सङ्ख्यया आनतिरूप—दृष्टप्रयोजनस्य सम्पत्तेः । एतच्च जैमिनीये (१२ । ४ । ५) निर्णीतम् ॥ २० ॥

[पशुगणे द्रव्यार्थक्रियाणां वसाहोमादीनां समुच्चयः]

अग्नीषोमीयपशौ "ऊव[1]ध्यमवदधाति" (का० श्रौ० ६।७।२७) "वसां[2] जुहोति" (श० ३।८।३०) "अध्यूध्नीं[3] होत्रे प्रयच्छति" (का० श्रौ० ६।८।५) "वनिष्ठु[4]मग्नीधे ददाति" (का० श्रौ० ६।८।४) इत्यादिवाक्यैः श्रुतानाम् ऊवध्यादीनामतिदेशेन वाजपेये "सप्तदश प्राजापत्याना-लभते" (श० ५।१।३।७) इत्यादौ पशुगणेन प्राप्तानां प्रतिपशु भेदेनानुष्ठानमुत सकृदेव इति संशये "भूतं भव्यायोपदिश्यत" इति न्यायेन द्रव्यस्य क्रियार्थत्वात् एकेनैव द्रव्येण क्रियाया निर्वर्त्तितत्वात् पुनर्द्रव्यान्तरेणानुष्ठाने प्रयोजनाभावाद् विकल्पेन येन केनचिद् द्रव्येण क्रियाकरणमिति प्राप्त आह—

ऊवध्य-वसा-ऽध्यूध्नी-वनिष्ठुषु समुच्चयो द्रव्यसंस्कार-तद्भेदाभ्याम् ॥२१॥

ऊवध्यादिषु समुच्चय एव। अर्थात् सर्वपशूनां सर्वैरूवध्यैः क्रियाऽनुष्ठेया। कुतः ? द्रव्यसंस्कारात्, तद्भेदाच्च । ऊवध्यावधानादीनां द्रव्यसंस्कारकत्वात् । द्रव्याणां च भेदात् । संस्कार्यत्वेन द्रव्याणां प्रधानत्वात् प्रतिप्रधानं गुणावृत्तिन्यायेन यावद्द्रव्यमवधानादिक्रिया कर्त्तव्या। अन्यथा यस्य कस्य चित्पशोरननुष्ठाने तस्य वैगुण्यमापद्येत, तस्मात्समुच्चय एव ।

यत्र च क्रियोद्देशेन द्रव्यमुपदिश्यते तत्रैव "[5]भूतं भव्यायोपदिश्यत" इति न्यायः, तत्रैव विकल्पो ऽपि, नात्रेति भा[6]वः ॥ २१ ॥

[सोमक्रयसाधनानां हिरण्यादीनां समुच्चयः]

ज्योतिष्टोमे सोमक्रयप्रकरणे श्रूयते "हिरण्येन क्रीणाति, वाससा क्रीणाति" (तै० सं० ६।१।१०) इत्यादि। तत्रायं संशयः। क्रयार्थं विहितेषु दशस्वपि द्रव्येषु समुच्चय, उत विकल्पः?। अर्थात् दशसु मध्ये येन केनापि द्रव्येण क्रयणम्, उत सर्वैर्द्रव्यैरिति । तत्र परस्परनिरपेक्षाणामेव द्रव्याणां क्रमोद्देशेन विधानात् एकेनैव द्रव्येण दृष्टस्य क्रयस्याभिनिर्वृत्तेः विकल्पेन येन केन चिद् द्रव्येण क्रयणमिति प्राप्ते सिद्धान्तयति—

---

१ 'उद्रगतम् असुरभि शकृदादि ऊवध्यम्' इति "आप० श्रौ. भाष्ये", ७।१६।३) ।

२ मांसपाकभाण्डस्थितः स्नेहविशेषो वसा ।

३ "अधिकमूधो यस्याः सा अध्यूध्नी । अत्र ऊधस्थं मांसमध्यूध्नीशब्देनोच्यते". इति आप. श्रौ. भाष्ये (७।२२।६)

४ "स्थूलमान्त्रं वनिष्ठुः" इति आप० श्रौ. भाष्ये (७।२६।१०) ।

५ भावाधिकरणसिद्धोऽयं न्यायः (पू० मी० २।१।२) ।

६ एतच्च पूर्वमीमांसायां (१२।४।६) विचारितम् ।

चोदनागुणेषु च, प्रक्लृप्त्यु-पबन्धाभ्याम् ॥२२॥

चशब्दः पूर्वसूत्रोक्तं समुच्चयमनुकर्षति। चोदनागुणेषु क्रयविधिषु श्रुतेषु हिरण्यादिषु दशसु गुणेषु विकल्प एव न समुच्चयः। कुतः? प्रक्लृप्तेः, उपबन्धाच्च। प्रक्लृप्तेः पूर्वमेव सोमस्य सन्निहितत्वात्। यदि क्रयः अप्राप्तसोमस्य प्रापकः स्यात्, तर्हि दृष्टार्थता क्रयस्य भवेत्। अत्र च सोमो विध्यन्तरानुसारेण पूर्वमेवानीय स्थापितः। अतश्च केवलादृष्टार्थतैव क्रयस्य। न ह्यदृष्टार्थानां विकल्पो भवितुमर्हति। अतः समुच्चय एव।

एवम् "तं वै दशभिरेव क्रीणीयान्नादशभिः" (श० ३।३।३।१८) इति सङ्ख्योपबन्धादपि समुच्च[1]यः ॥ २२ ॥

[गार्हपत्याहवनीययोर्मध्ये न गच्छेत्, न चोदपात्रादिकं नयेत्]

गार्हपत्याहवनीयौ न व्यवेयात् ॥२३॥

यत्र प्रयोजनार्थं विहारे सञ्चरः प्राप्नोति तत्र विधिमन्तरा गा[2]र्हपत्याह[3]वनीयोर्मध्ये आत्मना पात्रादिना वा व्यवधानं न कुर्यात्, नान्तरा गच्छेत्, न वा पात्रादिकमाहरेदिति यावत् ॥२३॥

[प्रदक्षिणमप्रदक्षिणं वा ऽऽवृत्येतरथा ऽऽवृत्तिः]

विवृत्याऽऽवृत्य चेतरथा ऽऽवृत्तिः ॥२४॥

विवृत्य = यत्र पैतृके कर्मणि अप्रदक्षिणं विहितं तत्र तत्कृत्वा इतरथा ऽऽवृत्तिस्तद्वैपरीत्येन प्रत्यावृत्तिः कार्या। आवृत्य यत्र दैवे कर्मणि प्रदक्षिणं विहितं तत्र तत्कृत्वा प्रत्यावृत्तिः कार्या। दैवेषु कर्मसु प्रादक्षिण्येन कर्मानुष्ठाय तत्कर्मावसाने अप्रादक्षिण्येन प्रतिनिवर्तितव्यम्। एवं पित्र्येषु कर्मसु अप्रदक्षिणं कर्मानुष्ठाय पुनः प्रादक्षिण्येन प्रतिनिवर्त्तितव्यमिति भावः। तद्यथा—परिस्तरणादौ प्रादक्षिण्येन हस्तेन परिस्तरणे कृते यत्र परिस्तरणं समाप्तं तत्स्थानात् परिस्तरणारम्भस्थानं प्रति अप्रादक्षिण्येनैव हस्तस्यानयनमित्यादि ॥२४॥

[विहितपदार्थानुष्ठानानन्तरं प्रवेशमार्गेण निष्क्रमणम्]

अतीत्य निष्क्रमणम् ॥२५॥

यत्र अग्निहोत्रेष्ट्यादौ "अन्तरेणापराग्नी गत्वा" (२-१-१६) इत्यादिशास्त्रोपदिष्टमार्गेण प्रवेशः कृतः, तत्र कर्मसमाप्तौ तेनैव मार्गेण निष्क्रमणं कर्त्तव्यम् ॥२५॥

[अग्न्यायतनादुत्तरतः कर्मणोऽनुष्ठानम्]

उत्तरत उपचारो यज्ञः ॥२६॥

यस्य कर्मणो यज्ञे स्थानविशेषो न विहितः, तस्य कर्मणो विहारादुत्तरस्मिन् स्थाने करणं वेदितव्यम् ॥२६॥

---

१ एतच्च पूर्वमीमांसायां द्वादशाध्याये चतुर्थपादे तृतीयाधिकरणे विचारितम्।

२ अग्निहोत्रशालायां पश्चिमे भागे सप्तविंशत्यङ्गुलव्यासं वृत्तं द्वादशाङ्गुलोच्च—चतुरङ्गुलविस्तृतमेखलावत्, गार्हपत्यायतनं भवति। तत्र विधिना संस्थापितो ऽग्निर्गार्हपत्यः। अयमेवाग्निराहवनीय—दक्षिणाग्न्योर्योनिः। "यतः प्रणयते स गार्हपत्यः" इति (आप० श्रौ० ७।७।३) सूत्रात्।

३ अरत्निप्रमाणं समचतुरस्रं मेखलावत् आहवनीयकुण्डम्। तत्र स्थापितोऽग्निराहवनीयः। स च आहूयते ऽस्मिन्नित्याहवनीय इति व्युत्पत्त्या "आहवनीये होमाः" (का० श्रौ० १।८।४३) इति सूत्रेण होमाधारभूतः।

[ब्रह्मयजमानयोर्दक्षिणत उपवेशनम्]

दक्षिणतो ब्रह्म-यजमानयोरासने ॥२७॥

कर्त्तव्ये ॥२७॥

[यजमानस्य ब्रह्मणः पश्चादुपवेशनम्]

पश्चाद्यजमानो वेदिस्पृक् ॥२८॥

यजमानो वेदेर्दक्षिणतो वेदिसंलग्नः पश्चिमत उपविशेत् । अर्थात् यजमानस्य पूर्वतो, वेदेर्दक्षिणतो ब्रह्मोपविशेत् ॥२८॥

[यजुर्वेदविहितस्य कर्मणो ऽध्वर्युकर्तृकत्वम्]

अध्वर्युः कर्मसु, वेदयोगात् ॥२९॥

यजुर्वेदविहितकर्मसु कर्त्तुरनुक्तौ अध्व[1]र्युः कर्त्ता भवति । कुतः ? अध्वर्योर्यजुर्वेदेन सम्बन्धात् । यजुर्वेदस्य अध्वर्युवेद इति समाख्यानात् । यजुर्वेदविहितकर्मसु अध्वर्योः कर्तृत्वे सत्येव समाख्या सम्पद्यत इति भावः ॥२९॥

[यजुर्वेदविहितकर्मणो ऽग्नीदादिकर्तृकत्वं क्वाचित्कम्]

वचन-विरोधाभ्यामन्यः ॥३०॥

यत्र तु विशेषवचनमस्ति, यत्र च विरोधोऽस्ति तत्र अध्वर्युव्यतिरिक्तो ऽन्योपि यजुर्वेदविहितकर्मणः कर्त्ता स्यात् । यथा—"मन्थि[2]नं प्रतिप्रस्थाता जुहोति" (४।२।१।१३) इति वचनात् मन्थिग्रहहोमः प्रतिप्रस्थातृकर्त्तृकः । "पेषणोपधाने युगपत्" (२।४।२४) इति पेषणस्य, क[3]पालोपधानस्य च युगपद्विधानात् एकेनाध्वर्युणा युगपत्कार्यद्वयस्य कर्त्तुमशक्यत्वात् अर्थात् [illegible]ुः, उपधानमग्नीत्कुर्यात् ॥३०॥

[हविरादीनामन्तरङ्ग-बहिरङ्गभावः]

हविष्पात्र-स्वाम्यृ-त्विजां पूर्वं पूर्वमन्तरम् ॥३१॥

हविर्व्रीह्यादि, पात्रं प्रणीतादि, स्वामी यजमानः पत्नी च, ऋत्विजो ब्रह्माद्याः, एतेषामेकत्र समावेशे सति यद्यत्पूर्वं पठितं तत्तदग्निसन्निकृष्टं भवति, परं परं बहिरङ्गं भवति । अर्थात् हविरपेक्षया पात्रस्य बहिरङ्गत्वम्, पात्रापेक्षया च स्वामिनः, स्वाम्यपेक्षया च ऋत्विजाम् । अतश्च पात्रं यदि क्वचित्स्थाने स्थितं स्थानान्तरं प्रति नेयं भवति तदा नाग्निहविषोर्मध्ये नेयम्, किन्तु हविषो बहिरेव नेयम् । तथा स्वामिनो ऽपि वचनादन्यत्र गमने प्रसक्ते हविः पात्राणि च अन्तरं कृत्वा स्वयं बहिर्गच्छेत्, न हविषः पात्राणामग्नेश्चान्तरा । एवमृत्विजो गमने प्राप्ते हविः, पात्राणि, स्वामिनं चान्तरं कृत्वा स्वयं बहिर्गच्छेत् । एवं च ऋत्विक् स्वीये

---

१ अध्वरं युनक्तीति अध्वर्युः । यः कर्मण आरम्भसमाप्ती करोति । एतच्च जैमिनीये (३।८।९) विचारितम् ।

२ मन्थी नाम ग्रहः । स च सोमरसाधारभूतः पात्रविशेषः वैकङ्कतः प्रादेशपरिमाण उलूखलसदृशः उपरि गर्त्तवान् । प्रतिप्रस्थाता ऋत्विग्विशेषः ।

३ पुरोडाशभर्जनार्थं मृत्तिकया निर्मितानि वह्नौ परिपक्वानि द्व्यङ्गुलोच्छ्रायाणि यस्मिन् पुरोडाशे यावन्ति विहितानि तानि कपालानि ।

हस्ते पात्रं यदि गृहीत्वा गच्छति तदा प्रसारितहस्तः पात्रमग्निसमीपं कृत्वा स्वयं यजमानाद्ब-हिरर्थात् स्वस्य स्वहस्तस्थस्य पात्रस्य च मध्ये स्वामिनं कृत्वा गच्छेदित्यर्थः ॥३१॥

ऋत्विजां च यथापूर्वम् ॥३२॥

ऋत्विजां च वरणक्रमेण अन्तरङ्गता बहिरङ्गता च। तत्र पूर्वपूर्वस्यान्तरङ्गता, परप-रस्य बहिरङ्गता ॥३२॥

ननु अयमन्तर्बहिर्भावो ब्राह्मणे कुत्रापि न विहितः। अतश्च किमर्थमत्र परं विधीयते इति इमामाशङ्कां सूत्रेणैवानुवदति—

न वा ऽचोदितत्वात ॥३३॥

वेति पक्षव्यावृत्तौ। न ऋत्विजामन्तर्बहिर्भावो भवति। कुतः? अचोदितत्वात्, अस्य अन्तर्बहिर्भावस्य ब्राह्मणे कुत्राप्यविधानात्।

इदमेव सूत्रं समाधानपरतया ऽपि आवृत्त्या योजनीयम्। ब्राह्मणे विस्पष्टमविहितो ऽप्ययमन्तर्बहिर्भावो यदि कचिदपि न स्मर्येत तदानीं न स्यात्। स्मर्यते तु। यथा—"तामन्तरेण यूपं चाग्निं च हरन्ति" (श० ब्रा०३।८।२।२०) इत्यत्र अन्तर्बहिर्भावस्य स्पष्टतो विधानाभावेऽपि तात्पर्यगत्या प्रतीतेः। ब्राह्मणे अन्तर्बहिर्भावस्य शब्दतो ऽविधाने ऽपि तात्पर्यगत्या-ऽवबोधनात् अस्त्येव स इति ॥३३॥

गार्हपत्ये संस्काराः ॥ ३४ ॥

अधि[1]श्रयण-पर्यग्निकरण—प्रतपनादयः संस्कारा गार्हपत्ये कर्त्तव्याः ॥३४॥

श्रपणं वा ऽऽहवनीये ॥ ३५ ॥

वा-शब्दः पक्षान्तरपरिग्रहार्थः। हविषां श्रपणमाहवनीये गार्हपत्ये वा कर्त्तव्य-मित्यर्थः ॥ ३५ ॥

[आज्यशब्दो जातिनिमित्तः]

घृतमाज्ये, लिङ्गात् ॥ ३६ ॥

यत्र आज्यशब्दः श्रूयते "आज्येन यूपमनक्ति" (श० ब्रा० ३।७।१।११) इत्यादौ, तत्र सर्वत्र असंस्कृतमेव घृतं ग्राह्यम्। जातिनिमित्तो ऽयमाज्यशब्दो न संस्कारनिमित्त इत्यर्थः। अश्वमेधे "यदाज्यमुच्छिष्यते तेन रशनामभ्यज्यादत्ते" (श० १३-१-१-१) इति ब्रह्मौद-नावशिष्टेन असंस्कृते घृते आज्यप्रयोगदर्शनरूपाल्लिङ्गाच्च ॥३६॥

तस्य होमो ऽनादेशे ॥ ३७ ॥

तस्येत्यवयवलक्षणा षष्ठी। होमार्थं द्रव्यान्तराविधाने घृतेन होमः कार्यः ॥ ३७ ॥

[पुरीषं चात्वालाद् ग्राह्यम्]

चात्वालात्पुरीषम् ॥ ३८ ॥

यज्ञे वेद्यादिनिर्माणार्थं यत्र खातायाः मृदः प्रयोजनं, तत्र सा मृत्तिका चात्वालाद् ग्राह्या। (द्वात्रिंशदङ्गुलमितसमचतुरस्रो द्वात्रिंशदङ्गुलखातवान् वेदेरीशानकोणस्थः शुष्कखात-मृदा पूरितो गर्त्तविशेषश्चात्वालः) ॥ ३८ ॥

१ वह्नेरुपरि आज्यादीन् स्थापयित्वा सन्तापनमधिश्रयणम्।

[आज्यसाध्ययागा ध्रौवाज्येनानुष्ठेयाः]

आहवनीययजतयो ध्रुवायाः ॥ ३९ ॥

आहवनीये कर्त्तव्यतया विहिता यागा ध्रुवा[1]त आज्यं गृहीत्वा कार्याः, नाज्यस्थालीतः । "सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यम्" (श० ब्रा० ४।३।५।२) इति ध्रौवाज्यस्य साक्षात् यज्ञसाधनत्वेनैव श्रवणात् । एतेन उपस्तर[2]णा-भिघा[3]रण-प्राणदा[4]नादीनि कर्माणि आज्य[5]स्थालीत एव कर्त्तव्यानीत्यर्थात्सिध्यति । एवं च यागसाधनमाज्यं ध्रुवातो ग्राह्यं, संस्कारकमाज्यं स्थालीत इति भावः ॥ ३९ ॥

[इडादीनामपि ध्रौवाज्येनानुष्ठानं केषांचिन्मते]

इडा-प्राशित्रा-ऽऽघारांश्चैके ॥ ४० ॥

इडायाः, प्राशि[6]त्रहरणस्य च उपस्तरणाभिघारणे, आघारहोमौ च केचिद् ध्रौवाज्यादभिवाञ्छन्ति । एकग्रहणान्नेदं सर्वसम्मतम् । अतः स्थालीत एव ग्राह्यमिति कर्कः ॥ ४० ॥

प्राञ्चावाघारौ ॥ ४१ ॥

प्रजापतये स्वाहा, इन्द्राय स्वाहा, इत्येतौ पूर्वोत्तराघारौ प्राक्संस्थौ होतव्यौ ॥४१॥

विदिशावेके ॥ ४२ ॥

आहवनीयस्योत्तरश्रोणे[7]रारभ्य दक्षिणांसपर्यन्तं पूर्वाघारं जुहुयात् । दक्षिणश्रोणेरारभ्योत्तरांसपर्यन्तमुत्तराघारो होतव्यः । अर्थाद् वायव्यादारभ्य आग्नेय्यां प्रथमाऽऽघारः परिसमापनीयः । नैर्ऋत्यात्कोणादारभ्य ऐशान्यां दिश्युत्तराऽऽघारः परिसमापनीय इति ॥४२॥

आहवनीये होमाः, श्रुति-समाख्यानाभ्याम् ॥४३॥

विशेषवचनाभावे सर्वे होमा आहवनीये कार्याः । कुतः ? "यदाहवनीये जुहोति" (तै० ब्रा० १०।१०।१०) इति श्रुतेः । आ अस्मिन् हूयते इति आहवनीय इति समाख्यानाच्च ॥४३॥

[दर्शपूर्णमासादिषु जुह्वा होमः]

जुह्वा ऽवचने ॥ ४४ ॥

अवचने जु[8]ह्वा होमः कार्यो न स्रुवादिना ॥४४॥

---

१ वारणकाष्ठनिर्मिता बाहुमात्री पाणिमात्रमुखी पाणिमात्रबिलवती त्रिलावशिष्टभागे दण्डयुता हंसमुखसदृशप्रणालिकावती होमाद्यर्थं स्रुवेण गृह्यमाणस्याज्यस्य आधारभूता यागसमाप्तिपर्यन्तं वेद्यां विद्यमानतया स्थिरत्वदर्शनात् ध्रुवति अप्रचलिता भवतीति ध्रुवा ।

२ जुह्वां पुरोडाशादिहविषो ग्रहणात्पूर्वमाज्यस्य प्रक्षेप उपस्तरणम् ।

३ अवत्तस्य हविष उपरि घृतप्रक्षेप अभिघारणम् ।

४ हविषामुद्वासनकाले उद्वासनात्पूर्वं हविषि आज्यप्रक्षेप प्राणदानम् ।

५ होमाद्यर्थं यस्यां स्थाल्यामाज्यं गृह्यते सा आज्यस्थाली ।

६ प्राशितुर्भक्षण इदं प्राशित्रं, ब्रह्मणो भागः ।

७ आहवनीयादीनामाग्नेयैशानकोणावंसौ । नैर्ऋत्य-वायव्यकोणौ श्रोणी ।

८ बाहुमात्री पाणिमात्रमुखी तावद्बिलवती दण्डवती हंसमुखप्रसेका हूयते ऽनया इति व्युत्पत्या होमसाधना स्रुक् जुहूः ।

[अवचने सकृद्गृहीतेन होमः कार्यः]

सकृद्गृहीता, ऽर्थाऽवाप्तेः ॥४५॥

सकृद्गृहीतेति लुप्तविभक्तिको निर्देशः। अवचने स्रुवेण जुह्वां सकृद् आज्यं गृहीत्वा तयैव जुहुयात्। कुतः? अर्थावाप्तेः, सकृद्गृहीतेनैव आज्येन होमरूपस्यार्थस्य निष्पत्तेः सति तु वचने चतुर्गृहीतेन पञ्चगृहीतेन वा होमः कार्यः ॥४५॥

किञ्च—

अवषट्कारातिरेकाच्च ॥४६॥

वषट्काररहितेषु होमेषु अतिरेकाद् = द्वितीयस्यावदानस्याधिकत्वज्ञापनादित्यर्थः "तद्वै चतुरवत्तं भवतीदं वा अनुवाक्या, अथ याज्या, अथ वषट्कारो, थ ऽसा देवता चतुर्थ यस्यै देवतायै हविर्भवति, अतिरिक्तर्ठ० ह तदवदानं यत्पञ्चमम्" (श० १।७।२।७) इति श्रुत्या यत्र वषट्कारो ऽस्ति तत्र याज्या एका, पुरोऽनुवाक्या अपरा, वषट्कारस्तृतीयः, देवता चतुर्थ इति चतुरवत्तस्योपपत्तिर्भवति। पञ्चमावदानस्य उपपत्त्यभावादतिरिक्तमेव तत् इत्यर्थिकत्य यत्र वषट्कारो नास्ति तत्र अनुवाक्यादीनामभावात् द्वितीयस्यैवावदानस्य अतिरिक्तत्वज्ञापना दित्यर्थः। एवं च सवषट्कारहोमेषु चतुरवदानस्यावश्यकत्वे ऽपि तदभावस्थले सकृद्गृहीतेनै होमनिर्वृत्तेरेतच्छ्रुत्यभिप्रेतत्वात् सकृद्गृहीतेनैव होमः कार्य इति भावः ॥४६॥

इति कातीयश्रौतसूत्रवृत्तौ अष्टमी कण्डिका ॥८॥

———

[हविपश्चोदनायां व्रीहि-यवान्यतरोपादानम्]

व्रीहीन्यवान्वा हविषि ॥ १ ॥

यत्र हविरिति श्रूयते तत्र व्रीहयो यवा वा उपादेयाः ॥ १ ॥

[देवतोद्देशेन गृहीतस्य द्विस्त्रिर्वा ऽवदानम्]

तस्य द्विरवद्यति ॥ २ ॥

तस्य पुरोडाशादेर्हविषो मध्यात्पूर्वार्द्धाच्च प्रदेशादङ्गुष्ठपर्वमात्रमवदानं कुर्यात्। त मध्यात्प्रथमावदानम्, पूर्वार्द्धाच्च द्वितीयमवदानम् ॥२॥

त्रिर्जमदग्नीनाम् ॥ ३ ॥

जमदग्निगोत्रोत्पन्नानां यजमानानां यागे हविषः त्रिरवदानं कुर्यात् ॥ ३ ॥

तृतीयः खण्डः कस्मात्प्रदेशाद् ग्राह्य इत्याह—

[हविषः पश्चाद् भागात्तृतीयमवदानम्]

पश्चात्तृतीयम् ॥ ४ ॥

तृतीयमवदानं हविषः पश्चाद्भागादवदेयम् ॥४॥

इति निरूपणम्?

सर्वेषां वोभय, मविधानात् ॥ ५ ॥

वा विकल्पे । सर्वेषां जमदग्नीनां तद्व्यतिरिक्तानां च चतुरवत्तं[1] पञ्चावत्तं वा[2] विकल्पेन भवति । कुतः ? जमदग्नीनामेव पञ्चावत्तमिति विशेषस्य अविधानात् । स्वशाखायां "तद्वै चतुरवत्तं भवति, उतो पञ्चावत्तमेव भवति" (श० ब्रा० १।२।७।८) इत्यविशेषेण श्रवणात् । वस्तुतस्तु शाखान्तरे "पञ्चावत्तं जमदग्नीनाम्" (आप० श्रौ० २।१८।२) इति विशेषः श्रूयते । अतो विशेषाध्यवसाय एव युक्तः । तेन जमदग्नीनां पञ्चावत्तमेवेति नियमः, इतरेषां चतुरवत्तं पञ्चावत्तं वेति विकल्पः ॥५॥

[हविषो मध्यात्पूर्वार्द्धाच्चाङ्गुष्ठपर्वमात्रस्यावदानम्]

द्विरवदानं कस्मात्प्रदेशाद् ग्राह्यमित्याह—

मध्यात्पूर्वार्द्धाच्चासम्भिन्दन्नङ्गुष्ठपर्वमात्रमवदानम् ॥ ६ ॥

यागकाले होमार्थं हविषो मध्यात्, हविषः पूर्वार्द्धाच्च अङ्गुष्ठपर्वमात्रमवदा[3]नं श्रृतावदानेन सम्पादयेत् । किं कुर्वन्—अवदानयोः परस्परं संभेदं सङ्गतिं मर्यादाभङ्गमकुर्वन् । अवदानयोः सम्भेदे कृते मर्यादाभङ्गः । मर्यादाभङ्गे च मध्यपूर्वार्द्धसंमोहः । स मा भूदिति यत्नः कार्य इत्यर्थः । मर्यादा च श्रृतावदाननामकेन पात्रेण क्रियते याज्ञिकैः ॥६॥

[दधिपयसोरपि अङ्गुष्ठपर्वमात्रमवदानम्]

मात्रावद्दधिपयसोः ॥ ७ ॥

दधिपयसोरपि अवदानमङ्गुष्ठपर्वमात्रमेव स्रुवेणावदेयम् ॥ ७ ॥

[अवदानात्प्राक् पश्चाच्चाज्येनोपस्तरणाभिघारणे]

आद्यन्तयोराज्यम् ॥ ८ ॥

चतुरवत्ततासम्पादनाय हविषो मध्यात्पूर्वार्द्धाच्च द्विरवदानग्रहणात्पूर्वमादौ स्रुवेण जुह्वामाज्यप्रक्षेपः, स एव उपस्तारशब्देनोच्यते । ततो द्विरवदानग्रहणम् । ततः पुनः स्रुवेण हविष उपरि आज्यप्रक्षेपः, अयमेव अभिघारणशब्देनोच्यते । एवमेव पञ्चावत्ततासम्पादनाय आदावन्ते च जुह्वामाज्यग्रहणं, त्रिर्हविषो ऽवदानग्रहणमिति ॥ ८ ॥

[स्विष्टकृते प्रधानावदानापेक्षया एकं न्यूनमवदेयम्]

एकप्रत्यवायꣳ स्विष्टकृतः ॥ ९ ॥

स्विष्टकृद्यागस्य अवदानं प्रधानयागावदानापेक्षया एकेनावदानेन प्रत्यवैति न्यूनीभवति इति एक-प्रत्यवायम्, कार्यमिति शेषः । अतश्च पञ्चावत्तिनां स्विष्टकृद्यागे हविषो द्विरवदानं, चतुरवत्तिनां सकृदवदानमिति भावः ॥९॥

स्विष्टकृद्यागे अभिघारणे विशेषमाह—

[स्विष्टकृते ऽवत्तस्य द्विरभिघारणम्]

द्विश्चाभिघारणम् ॥ १० ॥

---

१ जुह्वां चतुर्वारमाज्यादीनां ग्रहणं चतुरवत्तम् । यस्य यजमानस्य तद् भवति स चतुरवत्तीत्युच्यते ।

२ "जामदग्न्या वत्सविदावार्ष्टिषेणस्तथैव च । भार्गवाश्च्यवना और्वाः पञ्चावत्तिन ईरिताः" इति वचनात् एतद्वचनोक्तगोत्राणां यजमानानां पञ्चवारमवद्यति तत्पञ्चावत्तम् । यजमानश्च पञ्चावत्ती ।

३ दो अवखण्डने इति धातोः स्थापितहविषः होमपरिमितस्य भागस्य ग्रहणार्थं खण्डनमवदानम् ।

स्विष्टकृद्यागार्थमुपस्तीर्णायां जुह्वां हविष उत्तरार्द्धात्पूर्वोक्तन्यायेन हविषि द्विः सकृद्वा गृहीते तदुपरि द्विरभिघारणं कार्यम् ॥१०॥

[स्विष्टकृदिष्यावदाने कृते हविषः प्रत्यभिघारणम्]

अवदाय प्रत्यभिघारणं, प्राक् स्विष्टकृतः ॥ ११ ॥

प्रधानयागार्थं हविषोऽवदानं गृहीत्वा यस्माद्यस्मात्प्रदेशादवदानं गृहीतं तं तं हविषः प्रदेशमाज्येन प्रत्यभिघारयेत्। इदमेव प्रत्यभिघारणं क्षताभ्यञ्जनशब्देनोच्यते। स्विष्टकृद्यागार्थमवदानं कृत्वा तु प्रत्यभिघारणं न कार्यम् ॥११॥

[एककपालस्य पुरोडाशस्य सर्वस्यैव होमः]

सर्वहुत एक-कपालः ॥१२॥

एकस्मिन् कपाले संस्कृतः पुरोडाश एककपालः। तस्य यत्र होमो विहितस्तत्र सर्वत्रापि मध्य—पूर्वार्द्धादवदानादिकं विनैव सर्वो ऽपि पुरोडाशो निरवशेषेण होतव्यः ॥१२॥

[अनुब्रूहीति प्रैषे चतुर्थ्यन्तं देवतापदं निर्देष्टव्यम्]

अनुवाचनप्रैषो यथादेवत''ममुष्मा अनुब्रूही''ति ॥१३॥

देवतानामावाहनार्थं याऽऽृक् होत्रा पठ्यते साऽनुवाक्या। अनुवाक्याप्रैषो ऽनुवाचनप्रैषः। स च प्रैषः[1] तत्तद्देवतापदं चतुर्थ्यन्तमुच्चार्य अनुब्रूहीत्यन्तः पठनीयः। यथा— ''अग्नये ऽनुब्रूहि, सोमायानुब्रूहि'' इति ॥१३॥

[मैत्रावरुणस्य प्रैषे च देवतापदं चतुर्थ्यन्तम्]

आश्राव्यप्रैषे च ॥१४॥

ओश्रावय इत्याश्रावणानन्तरं यत्र सोमादौ मैत्रावरुणोद्देशेन अध्वर्युणा प्रैषः क्रियते, तत्रापि चतुर्थ्यन्तं देवतापदमुच्चार्य अनन्तरं प्रेष्येति पदमुच्चारयेत्, 'अग्नये प्रेष्य' इत्येवं प्रयोगः कार्य इत्यर्थः। तद्यथा—पशौ ''ओश्रावय'' इति आश्रावणे कृते ततः आग्नीध्रेण अस्तु श्रौषट् इत्यभ्यनुज्ञाते अध्वर्युः ''इन्द्राग्निभ्यां छागस्य वपां मेदः प्रेष्य'' इति मैत्रावरुणमुद्दिश्य प्रेष्यति। प्रेषितो मैत्रावरुणः तद्देवताकामनुवाक्यां पठित्वा तदन्ते हविर्होतर्यज इति होतारं प्रति प्रेष्यति। ततश्च प्रेषितो होता तद्देवताकामनुवाक्यां पठित्वा तदन्ते 'हविर्होतर्यज' इति होतारं प्रेष्यति। यत्र इष्ट्यादौ मैत्रावरुण ऋत्विग् नास्ति, तत्र 'अमुं यज' इत्येव होतारं प्रति प्रेष्येदध्वर्युः। यथा—आग्नेये 'अग्निं यज' उपांशुयाजे 'विष्णुं यज' इति ॥१४॥

[मैत्रावरुणप्रैषभिन्ने प्रैषे द्वितीयान्तं देवतापदम्]

'अमुं यज' इति ॥१५॥

आवाहनानन्तरं यया ऋचा हविः प्रयच्छति सा याज्या इत्युच्यते। होतुर्याज्यावाचनार्थम् अध्वर्युणा आवाहितदेवतापदं द्वितीयान्तमुच्चार्य यज इत्यन्तं पठनीयम्। यथा—''अग्निं यज, सोमं यज'' इति ॥१५॥

[प्रैषसम्बद्धेऽनुवाचने द्रव्यपदं षष्ठ्यन्तम्]

प्रैषानुवाचने षष्ठी, वपायै, धानासोमेभ्य इति परिहाप्य ॥१६॥

यत्र पुरोऽनुवाक्यानन्तरं 'अग्नये प्रेष्य' इति मैत्रावरुणमुद्दिश्य अध्वर्युकर्तृकः प्रैषो भवति, तत्र मैत्रावरुणेन पठनीये पुरोऽनुवाक्याप्रैषे द्रव्यवाचिनि शब्दे षष्ठी विभक्तिः कार्या। देवता-

---

१ 'यज' इत्यादिलोण्मध्यमपुरुषान्तपदघटितेन येन वाक्येन अध्वर्य्वादिना होत्रादिः प्रेर्यते तद्वाक्यं प्रैषः।

वाचिनि तु चतुर्थी उक्ता एव । यथा—'अग्नीषोमाभ्यां छागस्य हविषो ऽनुब्रूहि' (श० ब्रा० ३।८।३।२९) इति । परन्तु वपायै, (का० श्रौ० ६।६।२०) धानासोमेभ्यः (का० श्रौ० १०।८।३) इति प्रैषद्वयं वर्जयित्वा । अर्थात् अत्र द्रव्यवाचिनि शब्दे ऽपि चतुर्थी विभक्तिरेव । इतो ऽन्यत्र षष्ठी विभक्तिरिति ॥ १६ ॥

[मन्त्रवटकस्य असौ इत्यस्य स्थाने नामादेशः]

असावित्यपनोदे ॥ १७ ॥

यत्र मन्त्रे "अभिषिञ्चाम्यसौ" (९-३०) इत्यादौ असौ इति सर्वनामपदं श्रूयते तत्र तत्सर्वनामपदं निष्काश्य तत्स्थाने यद्विवक्षितं तन्नाम संबुद्ध्यन्तं प्रक्षेप्तव्यम् । यथा—'अभिषिञ्चामि यज्ञदत्तशर्मन्' इति ॥ १७ ॥

[सवषट्कारहोम आहवनीयदक्षिणतः तिष्ठता ईशानाभिमुखेन कार्यः]

सवषट्कारास्तु तिष्ठन्दक्षिणत, उदङ्प्राङ्, वषट्कृते ॥ १८ ।

वषट्कारेण सहिताः सवषट्काराः । तास्वाहुतिषु वेदेर्दक्षिणत ईशानाभिमुखो ऽवस्थितो ऽध्वर्युर्होत्रा वौषट् इत्युक्ते सति जुहुयात्, न वषट्कारात्पूर्वम् ॥ १८ ॥

सह वा ॥ १९ ॥

अथवा वषट्कारेण सह आहवनीये हविः प्रक्षेप्तव्यम् ॥ १९ ॥

उभयत आज्यꣳ हविषः ॥२०॥

होमकाले आदौ स्रुक्स्थमाज्यं किंचिद्धुत्वा ततः पुरोडाशादिहविर्हुत्वा हविष उपरि च किञ्चिदाज्यं होतव्यम् ॥ २० ॥

सह वा ॥ २१ ॥

अथवा आज्यं हविश्च युगपदेव होतव्यं नोभयत आज्यम् ॥ २१ ॥

इति कातीयश्रौतसूत्रवृत्तौ नवमी कण्डिका ॥९॥

[अग्नीदग्नीन्विहरेत्यादीनां संबोधनार्थानां मन्त्रत्वम्]

अग्नीदग्नीन्विहर (श० ४।२।५।११) बर्हिस्तृणीहि (श० ४।२।५।११) इत्यादीनां प्रैषाणां मन्त्रविलक्षणत्वात् एतेषां मन्त्रत्वमस्ति न वा । कुतः संशयः । एतेषामनुष्ठेयार्थस्मारकत्वं न भवति करणमन्त्रवत् । नापि जपमन्त्रवत्केवलमदृष्टार्थता । न वा अग्निमन्थनीयादिवत् क्रियमाणानुवादिता । अतो मन्त्रकार्याभावादत्र मन्त्रत्वमस्ति न वा ? इति संशये प्राप्ते पूर्वपक्षयति—

वर्तमानापदेशा, चोदनाशब्दा, स्तुत्यर्थाभावा, त्वै चेति वचना, न्निर्देशात्कर्मचोदकः ॥१॥

वर्तमानस्य अर्थस्य अपदेशात् = उपदेशात् प्रैषो न मन्त्रः, किन्तु कर्मविधायकः । प्रैषस्य ज्ञाते ऽर्थे प्रवर्त्तनमेव व्यापारः । अतश्चाप्रवृत्तप्रवर्त्तनात्मको विधिरेवेति भावः । एवं लिङ्-लोट्-तव्यप्रत्ययादिरूपविधिशब्दसंबन्धात्, विधायकत्वानङ्गीकारे विधायकप्रत्ययस्य लिङ्लोडादेर्वैयर्थ्यापत्त्या, त्वै च इत्यादिशब्दानां मन्त्रत्वविरुद्धानां प्रैषेषु दर्शनात्, "अहे

बुध्निय मन्त्रं मे गोपाय" (तै० ब्रा० १३।१) इति वाक्ये "ऋचो यजूंषि सामानि" इति त्रयाणामेव मन्त्रत्वव्यपदेशाच्च कर्मविधायकप्रैषाणां न मन्त्रत्वम् ॥१॥

एवं प्राप्ते सिद्धान्तयति—

मन्त्रो वा समभिव्याहारात् ॥ २ ॥

वा शब्दः पक्षं व्यावर्त्तयति। एवं जातीयको मन्त्र एव प्रत्येतव्यः। कुतः ? समभिव्याहारात, वाक्यान्तरेण विहितत्वादित्यर्थः। एवं जातीयको हि मन्त्रो वाक्यान्तरेण विहितः। न च विहितस्य पुनर्विधानं भवितुमर्हति। अतो विधायकत्वासंभवान्मन्त्र एव। अथवा समभिव्याहारादित्यस्य प्रयोगकाले उच्चारणस्य विहितत्वादित्यर्थः। एतेषां हि "अग्नीदग्नीन्विहर" (श० ४।२।५।११) इत्यादिना प्रयोगकाले उच्चारणं विधीयते। यदि इमे कर्मविधायका भवेयुर्नैतेषामुच्चारणं प्रयोगकाले विहितं स्यात्। विधीयते च। अत इमे मन्त्राः।

मन्त्रेष्वपि वर्त्तमानापदेशस्य दर्शनात्, लिङ्-लोट्-तव्यप्रत्ययादीनां प्राप्तकालार्थतायामपि सत्वात्, विधायकत्वाभावे ऽपि प्राप्तकालार्थतामादाय मन्त्रेषु प्रयोगसंभवात्, तथा मन्त्रेषु "कन्या इव वहतुमेतवै" (१७।८७) इति तवैशब्दश्रवणात्, इतिवचनरहितानामपि मन्त्राणां बहुशो दर्शनात्, यजुरन्तर्भावमभिप्रेत्यैव निर्देशस्याकारणात् न पूर्वसूत्रोक्तदोषाणां सम्भव इति भावः ॥ २ ॥

[प्रयोजनमालोच्य कर्मानुष्ठानात्प्रागेव द्रव्याणां समीपे स्थापनम्]

अर्थप्रसङ्ख्यया द्रव्योपकल्पनम् ॥३॥

दर्शपूर्णमासादौ कर्मारम्भात्प्रागेव यावतां द्रव्याणां प्रयोजनमस्ति तावन्ति द्रव्याणि परिसङ्ख्याय समीपे स्थापनीयानि ॥३॥

चर्माण्युत्तरलोमानि प्राग्ग्रीवाणि ॥४॥

कृष्णाजिनादीनि चर्माणि प्राग्ग्रीवाणि पश्चिमपुच्छानि, ऊर्ध्वलोमानि यथा लोमान्युपरि भवेयुस्तथा कृत्वा प्रयोगकाले स्तरणीयानि ॥४॥

[हविषां मध्ये पश्चादुक्तस्य पश्चाद् ग्रहणम्, उत्तरतः श्रपणम्, आसादनं च]

अवरोक्तमुत्तरꣳ हविषि ॥५॥

"आग्नेयो ऽष्टाकपालः, अग्नीषोमीय एकादशकपालः पुरोडाशः" (आप० श्रौ० ३।१७।६) इत्यादौ हविषि यद्धविः पूर्वमुक्तं तस्य पूर्वं ग्रहणं, दक्षिणतः श्रपणं, दक्षिणत आसादनादि च कार्यम्। पश्चादुक्तस्य द्वितीयादेर्हविषः पश्चाद् ग्रहणम्, उत्तरतः श्रपणमुत्तरत आसादनादि च कार्यम् ॥५॥

[साज्यस्यैकस्य दक्षिणहस्तस्थस्य जुह्वादेर्वेदेनोपग्रहणम्]

एकद्रव्ये साज्ये वेदेनोपग्रहणम् ॥६॥

दर्शपूर्णमासादौ आज्यसहितस्य स्रुक्स्रुवस्थाल्यादिद्रव्यस्य दक्षिणहस्तेन ग्रहणे वामहस्तेनापि वेदः कुशमुष्टिर्ग्रहीतव्यः। साज्ययोर्जुहूपभृतोर्द्वयोर्ग्रहणे तु न वेदोपग्रहः ॥६॥

[आज्यान्यसहितस्य तादृशस्य स्फ्येनोपग्रहणम्]

स्फ्येनान्यत्र ॥७॥

यत्राज्यसंबन्धो नास्ति तदतिरिक्ते कर्ममात्रे स्फ्येनोपग्रहणं कार्यम् ॥७॥

[जपोपस्थानादिषु कुशैरुपग्रहणम्]

कुशैरसत्सु ॥८॥

जपोपस्थानादिषु स्फ्यस्य वेदस्य च असद्भावे कुशमात्रं वामहस्ते धार्यम् ॥८॥

षाचिनि तु चतुर्थी उक्ता एव। यथा—'अग्नीषोमाभ्यां छागस्य हविषो ऽनुब्रूहि' (श० ब्रा० ३।८।३।२९) इति। परन्तु वपायै, (का० श्रौ० ६।६।२०) धानासोमेभ्यः (का० श्रौ० १०।८।३) इति प्रैषद्वयं वर्जयित्वा। अर्थात् अत्र द्रव्यवाचिनि शब्दे ऽपि चतुर्थी विभक्तिरेव। इतो ऽन्यत्र षष्ठी विभक्तिरिति ॥ १६ ॥

[मन्त्रवटकस्य असौ इत्यस्य स्थाने नामादेशः]

असावित्यपनोदे ॥ १७ ॥

यत्र मन्त्रे "अभिषिञ्चाम्यसौ" (९-३०) इत्यादौ असौ इति सर्वनामपदं श्रूयते तत्र तत्सर्वनामपदं निष्काश्य तत्स्थाने यद्विवक्षितं तन्नाम संबुद्ध्यन्तं प्रक्षेप्तव्यम्। यथा—'अभिषिञ्चामि यज्ञदत्तशर्मन्' इति ॥ १७ ॥

[सवषट्कारहोम आहवनीयदक्षिणतः तिष्ठता ईशानाभिमुखेन कार्यः]

सवषट्कारास्तु तिष्ठन्दक्षिणत, उदङ्प्राङ्, वषट्कृते ॥ १८ ।

वषट्कारेण सहिताः सवषट्काराः। तास्वाहुतिषु वेदेर्दक्षिणत ईशानाभिमुखो ऽवस्थितो ऽध्वर्युर्होत्रा वौषट् इत्युक्ते सति जुहुयात्, न वषट्कारात्पूर्वम् ॥ १८ ॥

सह वा ॥ १९ ॥

अथवा वषट्कारेण सह आहवनीये हविः प्रक्षेप्तव्यम् ॥ १९ ॥

उभयत आज्यꣳ हविषः ॥२०॥

होमकाले आदौ स्रुक्स्थमाज्यं किंचिद्धुत्वा ततः पुरोडाशादिहविर्हुत्वा हविष उपरि च किञ्चिदाज्यं होतव्यम् ॥ २० ॥

सह वा ॥ २१ ॥

अथवा आज्यं हविश्च युगपदेव होतव्यं नोभयत आज्यम् ॥ २१ ॥

इति कातीयश्रौतसूत्रवृत्तौ नवमी कण्डिका ॥९॥

[अग्नीदग्नीन्विहरेत्यादीनां संबोधनार्थानां मन्त्रत्वम्]

अग्नीदग्नीन्विहर (श० ४।२।५।११) बर्हिस्तृणीहि (श० ४।२।५।११) इत्यादीनां प्रैषाणां मन्त्रविलक्षणत्वात् एतेषां मन्त्रत्वमस्ति न वा। कुतः संशयः। एतेषामनुष्ठेयार्थस्मारकत्वं न भवति करणमन्त्रवत्। नापि जपमन्त्रवत्केवलमदृष्टार्थता। न वा अग्निमन्थनीयादिवत् क्रियमाणानुवादिता। अतो मन्त्रकार्याभावादत्र मन्त्रत्वमस्ति न वा? इति संशये प्राप्ते पूर्वपक्षयति—

वर्तमानापदेशा, च्चोदनाशब्दा, त्स्तुत्यर्थाभावा, त्तवै चेति वचना, न्निर्देशात्कर्मचोदकः ॥१॥

वर्तमानस्य अर्थस्य अपदेशात् = उपदेशात् प्रैषो न मन्त्रः, किन्तु कर्मविधायकः। एवं प्रैषस्य ज्ञाते ऽर्थे प्रवर्त्तनमेव व्यापारः। अतश्चाप्रवृत्तप्रवर्त्तनात्मको विधिरेवेति भावः। एवं लिङ्-लोट्-तव्यप्रत्ययादिरूपविधिशब्दसंबन्धात्, विधायकत्वानङ्गीकारे विधायकप्रत्ययस्य लिङ्लोडादेर्वैयर्थ्यापत्त्या, तवै च इत्यादिशब्दानां मन्त्रत्वविरुद्धानां प्रैषेषु दर्शनात्, "अहे

बुध्निय मन्त्रं मे गोपाय" (तै० ब्रा० १३।१) इति वाक्ये "ऋचो यजूंषि सामानि" इति त्रयाणामेव मन्त्रत्वव्यपदेशाच्च कर्मविधायकप्रैषाणां न मन्त्रत्वम् ॥१॥

एवं प्राप्ते सिद्धान्तयति—

मन्त्रो वा समभिव्याहारात् ॥ २ ॥

वा शब्दः पक्षं व्यावर्त्तयति। एवं जातीयको मन्त्र एव प्रत्येतव्यः। कुतः? समभिव्याहारात, वाक्यान्तरेण विहितत्वादित्यर्थः। एवं जातीयको हि मन्त्रो वाक्यान्तरेण विहितः। न च विहितस्य पुनर्विधानं भवितुमर्हति। अतो विधायकत्वासंभवान्मन्त्र एव। अथवा समभिव्याहारादित्यस्य प्रयोगकाले उच्चारणस्य विहितत्वादित्यर्थः। एतेषां हि "अग्नीदग्नीन्विहर" (श० ४।२।५।११) इत्यादिना प्रयोगकाले उच्चारणं विधीयते। यदि इमे कर्मविधायका भवेयुर्नैतेषामुच्चारणं प्रयोगकाले विहितं स्यात्। विधीयते च। अत इमे मन्त्राः।

मन्त्रेष्वपि वर्त्तमानापदेशस्य दर्शनात्, लिङ्-लोट्-तव्यप्रत्ययादीनां प्राप्तकालार्थतायामपि सत्वात्, विधायकत्वाभावे ऽपि प्राप्तकालार्थतामादाय मन्त्रेषु प्रयोगसंभवात्, तथा मन्त्रेषु "कन्या इव वहतुमेतवै" (१७।९७) इति तवैशब्दश्रवणात्, इतिवचनरहितानामपि मन्त्राणां बहुशो दर्शनात्, यजुरन्तर्भावमभिप्रेत्यैव निर्देशस्याकारणात् न पूर्वसूत्रोक्तदोषाणां सम्भव इति भावः ॥ २ ॥

[प्रयोजनमालोच्य कर्मानुष्ठानात्प्रागेव द्रव्याणां समीपे स्थापनम्]

अर्थप्रसङ्ख्यया द्रव्योपकल्पनम् ॥३॥

दर्शपूर्णमासादौ कर्मारम्भात्प्रागेव यावतां द्रव्याणां प्रयोजनमस्ति तावन्ति द्रव्याणि परिसङ्ख्याय समीपे स्थापनीयानि ॥३॥

चर्माण्युत्तरलोमानि प्राग्ग्रीवाणि ॥४॥

कृष्णाजिनादीनि चर्माणि प्राग्ग्रीवाणि पश्चिमपुच्छानि, ऊर्ध्वलोमानि यथा लोमान्युपरि भवेयुस्तथा कृत्वा प्रयोगकाले स्तरणीयानि ॥४॥

[हविषां मध्ये पश्चादुक्तस्य पश्चाद् ग्रहणम्, उत्तरतः श्रपणम्, आसादनं च]

अवरोक्तमुत्तरठं० हविषि ॥५॥

"आग्नेयो ऽष्टाकपालः, अग्नीषोमीय एकादशकपालः पुरोडाशः" (आप० श्रौ० ३।१७।६) इत्यादौ हविषि यद्धविः पूर्वमुक्तं तस्य पूर्वं ग्रहणं, दक्षिणतः श्रपणं, दक्षिणत आसादनादि च कार्यम्। पश्चादुक्तस्य द्वितीयादेर्हविषः पश्चाद् ग्रहणम्, उत्तरतः श्रपणमुत्तरत आसादनादि च कार्यम् ॥५॥

[साज्यस्यैकस्य दक्षिणहस्तस्थस्य जुह्वादेर्वेदेनोपग्रहणम्]

एकद्रव्ये साज्ये वेदेनोपग्रहणम् ॥६॥

दर्शपूर्णमासादौ आज्यसहितस्य स्रुक्स्रुवस्थाल्यादिद्रव्यस्य दक्षिणहस्तेन ग्रहणे वामहस्तेनापि वेदः कुशमुष्टिर्ग्रहीतव्यः। साज्ययोर्जुहूपभृतोर्द्वयोर्ग्रहणे तु न वेदोपग्रहः ॥६॥

[आज्यान्यसहितस्य तादृशस्य स्फ्येनोपग्रहणम्]

स्फ्येनान्यत्र ॥७॥

यत्राज्यसंबन्धो नास्ति तदतिरिक्ते कर्ममात्रे स्फ्येनोपग्रहणं कार्यम् ॥७॥

[जपोपस्थानादिषु कुशैरुपग्रहणम्]

कुशैरसत्सु ॥८॥

जपोपस्थानादिषु स्फ्यस्य वेदस्य च असद्भावे कुशमात्रं वामहस्ते धार्यम् ॥८॥

[शब्दमकुर्वन्नुपभृति जुहूमादध्यात्]

पाणिभ्यां जुहूं परिगृह्योपभृत्याधानमादानकाले ऽसंह्रादयन् ॥९॥

दर्श-पूर्णमासादौ जुहूपभृतोर्युगपदादानकाले प्रथमतो हस्तद्वयेन जुहूं गृहीत्वा उपभृत उपरि निदध्यात्, ततश्च द्वयोर्ग्रहणम्। किं कुर्वन्, असंह्रादयन् = परस्परविघट्टनेन शब्दमकारयन्नित्यर्थः ॥९॥

[विश्वजिदादीनां स्वर्गफलकत्वम्]

वाच्यफलेषु स्वर्गः सामर्थ्यात् ॥१०॥

विश्वजिता यजेत (ता० २५।१९) (श० ब्रा० १०।२।५।१६) इत्यादिषु अनुक्तफलेषु कर्मसु फलत्वेन स्वर्गः कल्पनीयः। कुतः ? सामर्थ्यात् = सार्थकत्वादित्यर्थः। अन्यथा फलकल्पनाभावे अफले कर्मणि पुरुषस्य प्रवृत्त्यनुदयात् विधिर्व्यर्थ एव स्यादिति भावः। अतः स्वर्गपदमध्याहृत्य विश्वजिता यजेत स्वर्गकाम इतिवाक्यं कल्पनीयमिति भा[1]वः ॥१०॥

[गुणात् फलाधिक्यम्]

एककर्मणि गुणविशेषे फलविशेषः ॥११॥

यत्र एकस्मिन् कर्मणि विकल्पेन गुणाः श्रुताः, तत्र विशेषगुणानुष्ठाने तदनुसारं फलविशेषो ऽपि भवति। यथा—अग्न्याधेये "षड् द्वादश चतुर्विंशतिं वा ददाति" (श० २।२।२।३) इत्यादिकाः सङ्ख्याविशिष्टा दक्षिणा विकल्पेन श्रुताः। तत्र न्यूनसङ्ख्याकदक्षिणादानापेक्षया अधिकदक्षिणादाने फलाधिक्यम् ॥११॥

[दानवाचनादिषु यजमानस्य कर्तृत्वम्]

दान-वाचना-न्वारम्भण-वर-वरण-व्रत-प्रमाणेषु यजमानं प्रतीयात् ॥१२॥

दानं = दक्षिणादानादि। वाचनं = यत्र वाचयति (का० श्रौ० ७।४।३३) इति विहितं तत्। अन्वारम्भणं स्पर्शः। व[2]रः = वरं ददाती (का० श्रौ० ४।८।८) त्यादिः। वरणम् = ऋत्विग्वरणादिः। व्रतं = पयो व्रतं ब्राह्मणस्येत्यादिः। प्रमाणम् = पञ्चारत्निर्यूप इत्यादिः। एषु सर्वेष्वपि यजमानमेव कर्त्तारमवबुध्येत। इदं सर्वं यजमानेनैव कर्त्तव्यमित्यर्थः ॥१२॥

[खातादिषु असंभवे यजुर्मन्त्रेण क्रिया न भवति]

खात-लून-छिन्ना-वहत-पिष्ट-दुग्ध-दग्धेषु यजुष्क्रिया सम्भवात् ॥१३॥

खातं = यूपावटखननादि। लूनं = बर्हिर्लवनादि। छिन्नं = यूपादिकम्। अवहतं = व्रीह्यादीनामवहननम्। पिष्टं = तण्डुलपेषणम्। दुग्धं = होमार्थं गोदोहनम्। दग्धं = महावीरादिदहनम्। एषु सर्वेषु प्रयोगात्पूर्वमनुष्ठितेष्वपि प्रयोगकाले सर्वत्रापि मन्त्रः पठनीयः। कुतः ? संभवात् = प्रयोगकाले मन्त्रपठनेनापि तज्जन्यादृष्टस्य संभवात् = उत्पत्तेः। अथवा असंभवात्, एतेषां प्रयोगमध्ये अनुष्ठानस्य असंभवात्। नहि प्रयोगमध्ये यूपावटखनने आरब्धे, महावीरदाहादीनां वा ऽनुष्ठाने आरब्धे यथोक्तसमये इतरेषामङ्गानां परिसमापनं भवितुमर्हति। अतः तानि सर्वाण्यपि पूर्वमेव सम्पाद्य प्रयोगमध्ये तदङ्गभूतमन्त्रमात्रं पठनीयमिति भावः ॥१३॥

[रौद्रादिमन्त्रमुच्चार्य तत्कर्म च कृत्वा अप उपस्पृशेत्]

रौद्रर्ठ०-राक्षस-मासुर-माभिचरणिकं मन्त्रमुक्त्वा पित्र्य-मात्मानं चालभ्योपस्पृशेदप उपस्पृशेदपः ॥१४॥

---

१ एतच्च पूर्वमीमांसायां चतुर्थाध्याये तृतीयपादे पञ्चमाऽऽधिकरणे विचारितम्।

२ दक्षिणात्वेन दीयमानं धेनुसुवर्णादिकं व्रियते अनेन इति व्युत्पत्त्या वर इत्युच्यते।

द्वितीयोऽध्यायः ।

दर्श–पूर्णमासेष्टिः ।

[इष्टिपूर्वदिने इष्टिदिने एव वा यमनियमवान् भवेत्]

प्रथमे ऽध्याये सामान्यधर्मा अनुकीर्त्तिताः । इतः प्रभृति विशेषाननुक्रमिष्यन् सर्वकर्मणां युगपदभिधातुमशक्यतया अवश्यं कस्मिंश्चित् क्रमे आश्रयणीये श्रुतौ "व्रतमुपैष्यन्" (श० ब्रा० १ । १ ।) इत्यादिना पौर्णमासेष्टेरेव प्रथममारभ्यमाणत्वात्, मन्त्रकाण्डे दार्शिकमन्त्राणां प्रथमपाठे ऽपि दर्शस्यापि पौर्णमासपूर्वकत्वेन पौर्णमासेष्टिमेव प्रथमनिरूपणीयां मन्वानः सूत्रकारः प्रथमं तामेव निरूपयति—

पूर्वां पौर्णमासीमुत्तरां वोपवसेत् ॥१॥

अत्र पौर्णमासीशब्देन तिथिरभिप्रेयते । उपवासशब्देन च यमनियमौ । पूर्वां पौर्णमासीं पञ्चदशीमुपवसेत् । पूर्वस्यां पञ्चदश्यां तिथौ यमनियमवान् भूत्वा प्रतिपदि यजेतेत्यर्थः ।

[1]उत्तरा पौर्णमासीत्यनेन लक्षणया प्रतिपदभिधीयते । प्रतिपदि वा उभावपि यमनियमपरिग्रह—यागौ कुर्यात् । यमनियमार्थं प्रतिपत्पञ्चदश्योर्विकल्पः ।

अयं भावः—पौर्णमासेष्टिर्द्व्यहकालकर्त्तव्यतया विहिता । "पक्षान्ता उपवस्तव्याः पक्षादयो यष्टव्याः" (गो० गृ० १।५।५) इत्यादिना । "सद्यो वा प्रातः" (का० श्रौ० २।१।१६) इत्यनेन सद्यस्कालकर्त्तव्यतयाऽपि विहिता । अनयोः पक्षयोर्विकल्पो ऽङ्गीकर्त्तव्यः । तत्र यद्यपि अन्यत्र उपवासशब्दः प्रसिद्ध्या अनशनमभिदधाति । तथापि नात्र सोऽर्थः परिग्रहीतुं शक्यते । उत्तरत्र हि "अपराह्णे व्रतोपायनीयमश्नीतः सर्पिषा ऽसुहितौ" (का० श्रौ० १ । १ । ८) इति सर्पिरादिगुणनियमः क्रियते । यद्यत्र अशननिषेधः क्रियेत, स च व्यर्थ एव स्यात् । उत्तरत्र गुणविधानात् । अशनस्य च अवश्यप्राप्तत्वात् । अतश्च 'चान्द्रायणमुपवसेत्' इत्यादौ यथा यमनियमपरकत्वमुपवासशब्दस्य, तथाऽत्रापि यमनियमपरकत्वमेवाङ्गीकार्यम् ।

एवं पूर्वा पौर्णमासी इति पौर्णमासीपदेन मुख्या पौर्णमासी गृह्यते । सा च पञ्चदशीरूपा । उत्तरा पौर्णमासीत्यनेन पौर्णमासीसादृश्यात् प्रतिपदेव गृह्यते; न तु पूर्वापदेन चतुर्दशी, उत्तरापदेन च पञ्चदशी ग्रहीतुं शक्यते । चतुर्दश्यां पौर्णमासीसादृश्याभावेन पौर्णमासीपदेन लक्षणयाऽपि तस्या अभिधेयत्वाऽसंभवात् । पञ्चदशीप्रतिपदोरेव हि चतुर्दश[2]कलावत्त्वं साद-

---

१ पूर्वा उत्तरा इति द्वे पौर्णमास्यौ उक्ते । " या पूर्वा पौर्णमासी साऽनुमतिर्योत्तरा सा राका" (काठ० ११।७।) इति, "द्वे पौर्णमास्यौ यजते द्वे अमावास्ये" (श० ब्रा० २।४।४।६) इति, "एषा संवत्सरस्य प्रथमा रात्रिर्यत् फाल्गुनी पौर्णमासी योत्तरा, एषोत्तमा या पूर्वा (श० ब्रा० ६।२।२।१८।) इति । सूत्रकारो ऽप्याह "उत्तरस्यां फाल्गुन्याम् (का० श्रौ० १६।१।५ इति ।

२ मासस्य पूरणं पौर्णमासीशब्दस्य प्रवृत्तौ निमित्तम् । तथैतच्चन्द्रमसः पूरणं प्रतिपदि पञ्चदश्यां

होतृकर्तृकत्वं प्राप्नुयादत्र; तद्व्यावृत्त्यर्थमत्राध्वर्युग्रहणम् । अतो न समाख्यया होताऽन्वाधानं कुर्यात्, किं तु अध्वर्युरेवेति[1] ॥३॥

तूष्णीं द्वितीयाम् ॥४॥

ततो द्वितीयां समिधं तूष्णीं मन्त्रं विनैवाहवनीये प्रक्षिपेत् ॥४॥

एवमितरयोः ॥ ५ ॥

[2]आहवनीये समिदाधानानन्तरं ममाग्ने इति मन्त्रेण प्रथमां, तूष्णीं द्वितीयाम्, इत्येवं गार्हपत्ये समिद्द्वयमाधाय ततो दक्षिणाग्नौ तथैव समिधावादध्यात् ॥ ५ ॥

अग्न्यन्वाधाने द्वितीयं प्रकारमाह—

महाव्याहृतिभिर्वा प्राक्संस्थम् ॥ ६ ॥

अथवा 'भूर्भुवः स्वः' इति महाव्याहृतिभिः (का० सर्वा० (१।१०।७) प्राक्संस्थम् समिदाधानं कुर्यात्। तत्र "ॐ भूः" इति म[3]न्त्रेण आदौ गार्हपत्ये एकां समिधमाधाय तूष्णीं द्वितीयामादध्यात्। एवमेव दक्षिणाग्नौ "ॐ भुवः" इति प्रथमा, द्वितीया तूष्णीमाधेया। तत आहवनीये "ॐ स्वः" इत्येकां, तूष्णीं द्वितीयां प्रक्षिपेदिति भावः। मन्त्रस्थाने एतासां व्याहृतीनां विहितत्वात्, मन्त्रशब्दत्वसामान्याच्च मन्त्रनिवर्त्तकत्वमेतासाम् ॥६॥

तृतीयं पक्षमाह—

तूष्णीं वा यथापूर्वम् ॥ ७ ॥

अथवा येन क्रमेण अग्नीनामुत्पत्तिस्तेन क्रमेण गार्हपत्याहवनीयदक्षिणाग्निषु तूष्णीमेव द्वे द्वे समिधौ युगपदादधीत, न भेदेन। अस्याग्न्यन्वाधानस्य "कस्य देवा गृहानागच्छन्ति, कस्य न, यः पूर्वेद्युर्ममाग्न इत्यग्नीन् गृह्णाति" इति श्रुतिबलात् देवतापरिग्रहरूपादृष्टफलोपजनकतया अवभृथेष्ट्याम् आहवनीयकार्यापन्नासु अप्सु अपि इदं क्रियते। अतश्च तत्र ममापो वर्चः, वयं व इन्धानाः, युष्माभिरध्यक्षाभिः इत्यूहः कार्यः। अस्य देवतापरिग्रहार्थत्वाद्यस्मिन्नग्नौ देवा इज्यन्ते तत्रैव कार्यम्। अतो (चातुर्मास्यान्तर्गत-साकमेधपर्वणि) गृहमेधीयादौ (का० श्रौ० ५।८।८।२५) यावदुक्ते कर्मणि पत्नीसंयाजाद्यभावात् गार्हपत्यदक्षिणाग्न्योरग्न्यन्वा[4]धानं न भवति ॥ ७ ॥

---

१ एतच्च पूर्वमीमांसायां (३।८।१३) स्पष्टम्।

२ अग्न्यन्वाधानस्य हि कार्यं देवतापरिग्रहः। ताश्च पूर्वं गार्हपत्ये ऽभीज्यन्ते, ततो दक्षिणाग्नौ। अतो मुख्यक्रमानुहार्थमयं क्रम आश्रित इति भावः।

३ "भूरिति गार्हपत्यो, भुव इत्यन्वाहार्यपचनः, स्वरित्याहवनीयः" इत्यर्थवादात् प्रतिमहाव्याहृति गार्हपत्यादिक्रमेणाग्न्यन्वाधानम्। सूत्रे समस्तोपदेशो लाघवार्थः।

४ "कस्य देवा गृहानागच्छन्ति कस्य न, यः पूर्वेद्युर्ममाग्न इत्यग्नीन् गृह्णाति" इति श्रुत्या देवतापरिग्रहार्थमग्न्यन्वाधानम्। अत एव सोमयागे आदिभूतायां दीक्षणीयेष्ट्यां कृतेन अग्न्यन्वाधानेनैव अङ्गप्रधानदेवतापरिग्रहस्य निर्वर्तितत्वात् प्रायणीयादिषु दीक्षणीयेष्ट्यनन्तरभाविनीषु अग्न्यन्वाधाननिवृत्तिः सूत्रकारेणोक्ता (का० श्रौ० ७।७।५)। एवं चाग्न्यन्वाधानस्य देवतापरिग्रहार्थत्वात्, देवतापरिग्रहस्य च अवभृथेष्ट्यामपि सत्वात् तत्रापि अग्न्यन्वाधानं क्रियत एव। अग्नीन्धनरूपदृष्टार्थत्वे तु अबादिषु तदभावात् न क्रियेतेति।

अग्नित्रये समिदाधानरूपमिदमग्न्यन्वाधानम् "अग्न्यन्वाधानम्" (सू० २) इति एकवचनात् परिधिपरिधानवत् एकं कर्म। अतस्त्रिष्वप्यग्निषु अग्न्यन्वाधानान्ते नैमित्तिकस्य प्रवृत्तिः।

[कर्माङ्गं मांस-मैथुनवर्जनम्]

अहनि मा॑ꣳस—मैथुने वर्जयेत् ॥८॥

अस्मिन्दिने मांसभोजनं मैथुनं च यजमानेन न कार्यम्। पर्वणि मांसमैथुनयोः सुतरां निषिद्धत्वात्पुनः क्रतुमध्ये निषेधः क्रत्वर्थत्वबोधनार्थः। अहर्ग्रहणमत्र कर्मोपलक्षणार्थम्। कर्मप्रकरणादेव कर्माङ्गत्वे ऽवगते पुनः अहर्ग्रहणं तस्मिन्नेवाहनि एतन्नियमपरिपालनम्, न पुनः पौर्णमास्यमावास्यारूपप्रयोगद्वयपरिसमाप्तिपर्यन्तमिति ज्ञापयितुम् ॥८॥

[केश-श्मश्रुवपनं शिखावर्जम्]

केशश्मश्रु वपते वा, ऽशिखम् ॥ ६ ॥

अग्न्यन्वाधानानन्तरं यजमानः केशान् श्मश्रूणि च शिखावर्जं वापयेत्, अथवा न मुण्डयेत्। वपनस्य विकल्पः। वाशब्दो वपतिना संबध्यते, नाशिखमित्यनेन। तत्र हि संम्बन्धे पक्षे सशिखमपि वपनं प्राप्नुयात्। तच्च सर्वथा शास्त्रविरुद्धम्। अतश्च वपतिना संबध्य वपनविकल्पमेव बोधयति ॥ ६ ॥

[मध्यान्होत्तरं दम्पत्योर्घृतमिश्रमाषादिभिन्नान्नाशनं सति सामर्थ्ये]

अपराह्णे व्रतोपायनीयमश्नीतः सर्पिषा ऽसुहितौ ॥१०॥

व्रतं भोजनं येनान्नेनामाषादिना क्रियते तद् व्रतोपायनीयम्। अन्हो द्वितीयभागे घृतेनोपसिक्तं प्रात[1]र्होष्यमाणद्रव्यातिरिक्तममाषादि हविष्यमन्नं पत्नीयजमानौ अतृप्तौ सन्तौ भुञ्जीयाताम्। अत्र सर्पिषेति नियमविधिरथवा परिसङ्ख्या इति विचार्यते। नियमविधौ परिसङ्ख्याविधौ वा को वा फलविशेष इति चेत्, अयं विशेषः। अप्राप्तांशपूरणं नियमः। इतरव्यावृत्तिः परिसङ्ख्या (पू० मी० १।२।४)। यथा—"व्रीहीनवहन्ति" (का० श्रौ० २।४।१४) इत्यत्र तण्डुलनिर्वृत्तिरूपफलसाधनत्वेन अवहननस्य प्राप्तावपि साधनान्तराणामपि कदाचित्प्राप्तिसंभवेन साधनान्तराप्राप्तिदशायां वा अवहननस्य अप्राप्तिः। तादृशाप्राप्तांशस्य पूरणमनेन विधिना क्रियते व्रीहीनवहन्यादेवेति नियमविधिः।

"पञ्च पञ्च[2]नखा भक्ष्या" (वाल्मी० कि० १७।३६) इत्यत्र पञ्चनखभक्षणे न विधेस्तात्पर्यम्, तस्य रागतः प्राप्तत्वात्। किन्तु पञ्चातिरिक्तपञ्चनखभक्षणव्यावृत्तावेव विधेस्तात्पर्यमिति परिसङ्ख्याविधिः।

प्रकृते च यदि नियमविधिरङ्गीक्रियेत तर्हि इतरनिवृत्तौ विधेस्तात्पर्याभावाद् व्यञ्जनादिसंस्कारकत्वेन तैलस्यापि प्राप्तिर्न निरोद्धुं शक्येत। यदि तु परिसङ्ख्या, तदा विधेरितरतैलादिनिवृत्तावेव तात्पर्याद् घृतप्रापणे विध्यभावात् कदाचिद् घृतं विनाऽपि भोजनं प्राप्नुयात्। किमत्र युक्तमिति चेत्, नियमविधिरेवेति ब्रूमः। नियमविधौ स्वीक्रियमाणे विधेरप्राप्तांशे अप्राप्तप्रापकत्वरूपस्वार्थवृत्तित्वं संभवति। परिसङ्ख्यायां तु इतरनिवृत्तेरेव वक्तव्यतया तस्याः शब्दतः प्रतीत्यभावेन श्रुतस्य शब्दस्य अर्थान्तरपरिकल्पनं, तदर्थं लक्षणास्वीकरणं च दोषः स्यात्। तन्निवृत्त्यर्थं नियमविधिरेवाश्रयणीय इति।

भोजनस्य पुरुषार्थरूपत्वात्तृप्तिरेव दृष्टप्रयोजनम्। अतो रोगादिना ऽसामर्थ्ये ग्रहणादौ च भोजनं न कार्यम् ॥ १० ॥

---

[1] "न तस्य सायमश्नीयाद्येन प्रातर्यक्ष्यमाणः स्यात्" (आप० श्रौ० ४।७।१०) इति।

[2] "शल्यकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः" (वाल्मी० कि० १७।३९) इति पञ्च पञ्चनखाः।

[आहवनीयस्य पश्चात्प्राङ्मुखस्तिष्ठन् अग्निं पश्यन् व्रतमुपेयात्]

अन्तरेणापराग्नी गत्वा परेणाऽऽहवनीयं प्राङ् तिष्ठन्नग्निमीक्षमाणो ऽप उपस्पृश्य व्रतमुपै "त्वग्ने व्रतपत" "इदमह" मिति वा ॥ ११ ॥

यजमानो गार्हपत्य-दक्षिणाग्न्योरन्तरालेन गत्वा आहवनीयस्य पश्चात्प्राङ्मुखस्तिष्ठन् अग्निं पश्यन् उदकं स्पृष्ट्वा सत्यवदनादिरूपं व्रतम् "अग्ने व्र[1]तपत" इति मन्त्रेण "इद[2]महम्" इति मन्त्रेण वा गृह्णीयात् । इतः प्रभृति आकर्मसमाप्तेः सत्यमेव वदनीयमित्यादिकं नियमं परिगृह्णातीत्यर्थः । अत्र मन्त्रवर्णादेव ईक्षणस्य प्राप्तत्वेऽपि पुनरीक्षमाण इति कथनं वैकल्पिकमन्त्रान्तरपाठे ऽपि ईक्षणं यथा स्यादित्येवमर्थम् । एवं प्रोषितस्यापि दिङ्नियमार्थं प्राङ्मुखत्ववचनम् । प्रोषितस्यापि यथासंभवमग्निहोत्रदर्शपूर्णमाससंबन्ध्यात्मसंस्कारकवपनोपस्थानादीनां कर्त्तव्यतया अग्रे (का० श्रौ० ४।१२।१५) वक्ष्यमाणत्वादिति । अत्रापामुपस्पर्शनं स्पर्शमात्रम्, न त्वाचमनम् । तस्यानुपदेशात् ॥ ११ ॥

[कर्माङ्गं सत्यवदनम्]

सत्यवाद्यतः ॥ १२ ॥

अतः परं यजमानः सत्यवादी भवेत् ॥ १२ ॥

ननु "सत्यवदनमेव वा" (पार. गृ० २। ८।८) इति सूत्रादुपनयनप्रभृति सत्यवदनस्य प्राप्तत्वात्किमर्थं पुनर्विधानमित्याशङ्कायामाह—

कर्माङ्गमुत्तरे सत्यवदनम् ॥ १३ ॥

व्रतोपायनादुत्तरकाले विहितमेतत्सत्यवदनं कर्माङ्गम्, अतः पुनरुपदिष्टमित्यर्थः । एवं चैतदपचारे प्रयाजाद्यपचार इव क्रतोर्वैगुण्यात् कर्माङ्गापचारनिमित्तं श्रौतं प्रायश्चित्तम् । उपनयनसमकालगृहीतसत्यवदनापचारे तु स्मार्त्तं प्रायश्चित्तमिति बोध्यम् ॥ १३ ॥

[सायमारण्य—वृक्षफलाद्यशनं वैकल्पिकम्]

वृक्षाऽऽरण्यौषधीनामश्नीयाद्वा ॥ १४ ॥

यजमानः पत्नी च सायंकाले आरण्यवृक्षीयान्याम्रादीनि फलानि, आर[3]ण्यौषधीः श्यामाकादिका अश्नीयातां, न वा अश्नीयाताम् । अत्राशनानशनयोर्विकल्पः ॥ १४ ॥

[गार्हपत्याहवनीयान्यतरगृहे ऽध आस्तरणे यजमानशयनम्]

आहवनीयगृहशाय्यधो गार्हपत्यस्य वा ॥ १५ ॥

यजमानः पत्नी च पर्वणि रात्रौ आहवनीयगृहे गार्हपत्यागारे वा अपेक्षया अधस्तात् तृणाद्यास्तृतभूमौ शयनं कुरुतो, न खट्वायाम् ॥ १५ ॥

[प्रतिपद्दिने एव अन्वाधानादि—कर्मापवर्गान्तम्]

सद्यो वा प्रातः ॥ १६ ॥

पौर्णमासेष्टिर्दिनद्वयेन, सद्यो वा कार्येति पक्षद्वयमनेन विधीयते । द्वयहपक्षे अन्वा-

---

१ "ॐ अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्" (शु० य० १।५) ।

२ "ॐ इदमहमनृतात्सत्यमुपैमि" (१।५)

३ "स वा आरण्यमेवाश्नीयात्" इति प्रकृत्य "या वा आरण्या ओषधयो यद्वा वृक्ष्यम्" (श० ब्रा० १।१।१९) इति अविशेषेण श्रवणात् आरण्यशब्द उभयविशेषणम् ।

धानादि शयनान्तं पूर्वदिने कृत्वा परदिने यागः । सद्यः पक्षे तु प्रातः प्रतिपद्येव अग्न्यन्वाधानादि ब्राह्मणतर्पणान्तं कार्यं, न पूर्वेद्युः पूर्णिमायां, नापि द्वितीयायाम् । अतः प्रतिपद्युपवासपक्षे प्रतिपद्येव यागः ॥ १६ ॥

[प्रातरग्निहोत्रानन्तरं ब्रह्मवरणम्]

अग्निहोत्रं हुत्वा ब्रह्माणं वृणीते ब्रह्मिष्ठं "भूपते भुवनपते महतो भूतस्य पते ब्रह्माणं त्वा वृणीमह" इति ॥ १७ ॥

पूर्वसूत्रात्प्रातरित्यनुवर्तते[1] । सूत्रमिदममावास्याविषयम् । "उदिते सवितरि पौर्णमासस्य तन्त्रं प्रक्रमियादनुदित आमावास्यस्य" (आप०श्रौ० १।६।५।१) इति शास्त्रात् सूर्योदयात्पूर्वमेव दर्शेष्टेरारम्भविधानात् अमायां प्रातरग्निहोत्रहोमानन्तरमुदयात्पूर्वमेव वेदत्रयविहितकर्मकुशलं ब्रह्माणं यजमानो "भूपत" इति मन्त्रेण वृणुयात् । पौर्णमासेष्टौ तु सूर्योदयानन्तरं ब्रह्मवरणमिति । एतच्च वरणं कर्मण्यप्रवृत्तस्य ब्रह्मणः प्रवर्त्तनार्थम् । अत अग्न्याधेये ब्रह्मण आधानकाल एव वृतत्वेन आधानानन्तरभाविनीषु तदङ्गभूतासु पवमानेष्टिषु ब्रह्मवरणाऽभावः । एवं सोमयागे सङ्कल्पानन्तरमेव ब्रह्मणो वृतत्वात् तदङ्गभूतासु तदुत्तरकालीनासु दीक्षणीयादिषु च वरणं न कर्त्तव्यम् ॥ १७॥

[भूपत इत्यादिना सकलेन मन्त्रेण वृतः सन् 'अहं भूपतिः' इत्यादिमन्त्रं जपेत्]

वृतो जपति "अहं भूपतिरहं भुवनपतिरहं महतो भूतस्य पतिर्भूर्भुवः स्वर्देव सवितरेतं त्वा वृणते बृहस्पतिं ब्रह्माणं तदहं मनसे प्रब्रवीमि मनो गायत्र्यै गायत्री त्रिष्टुभे त्रिष्टुब्जगत्यै जगत्यनुष्टुभे ऽनुष्टुप्प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यो बृहस्पतिर्देवानां ब्रह्माऽहं मनुष्याणाम्" इति ॥ १८ ॥

भूपत इति वरणमन्त्रोच्चारणानन्तरं ब्रह्मा अहं भूपतिरिति मन्त्रं पठेत् । न तु ब्रह्म-यजमानावुभावपि एककाले पठेताम् । कर्त्तृभेदात्कदाचिद्युगपत्पाठः प्राप्नुयात्, तन्निषेधार्थमिदम् । ब्रह्मवरणाभावे पवमानेष्ट्यादौ जपस्याप्यभावः ॥ १८ ॥

[यजमानकर्त्तृकं ब्रह्मणः प्रार्थनम्]

"वाचस्पते यज्ञं गोपाये" त्याह ॥१९॥

यजमानो वाचस्पत इति प्रैषं ब्रह्माणमुद्दिश्य ब्रूयात् । अयं च प्रैषोऽदृष्टार्थत्वाद्वरणाभावे ऽपि दीक्षणीयादिषु प्रवर्त्तते ॥ १९ ॥

[उत्तरतो वृतस्य ब्रह्मणो दक्षिणतः स्थापितांऽऽसनगमनार्थं मार्गविकल्पः]

अपरेण वाऽऽहवनीयं दक्षिणा ऽतिक्रामति ॥ २० ॥

आहवनीयस्य पश्चिममार्गेण पूर्वमार्गेण वा ब्रह्मा दक्षिणस्यां दिशि उपवेशनार्थं स्वस्थानं प्रति गच्छेत् ॥ २० ॥

[ब्रह्मणा स्वासनस्येक्षणम्]

"अहे दैधिषव्योदतस्तिष्ठाऽन्यस्य सदने सीद योऽस्मत्पाकतर" इति ब्रह्मसदनमीक्षते ॥ २१ ॥

---

१ सायङ्कालीनाग्निहोत्रहोमानन्तरमेव ब्रह्मवरणं मा भूत् इति प्रातरित्यनुवर्तते । तथात्वे रात्रौ कर्मकरणं स्यात्, तच्च न कुत्रापि विहितम् ।

ब्रह्मा कुशास्तृतं काष्ठादिनिर्मितं स्वासनमनेन मन्त्रेण पश्येत् ॥ २१ ॥

[आसनात्तृणनिरसनम्]

ब्रह्मसदनात्तृणं निरस्यति "निरस्तः पाप्मा सह तेन यं द्विष्म" इति ॥ २२ ॥

नैर्ऋ[1]त्यां दिशि तृणं ब्रह्मा प्रक्षिपेत् ॥ २२ ॥

इति कातीयश्रौतसूत्रवृत्तौ द्वितीयाध्याये प्रथमा कण्डिका ॥१॥

[ब्रह्मासने उपवेशनम्]

"इदमहं बृहस्पतेः सदसि सीदामि प्रसूतो देवेन सवित्रा तद[2]ग्नये प्रब्रवीमि तद्वायवे तत्पृथिव्यै" इति ब्रह्मस[3]दन आहवनीयमभिमुख उपविशति॥१॥

ब्रह्मा इदमहमिति मन्त्रेण स्वस्थाने आहवनीयाभिमुख उपविशेत् ॥ १ ॥

[ब्रह्मणे विशिष्टभागार्पणप्रभृति अनुयाजप्रैषान्तं ब्रह्मणो वाग्यमः]

वाग्यत आऽनुयाजप्रसवात् ॥ २ ॥

इत आरभ्य 'ब्रह्मन्प्रस्थास्यामि' (श० ब्रा० १।७।४।२०) इति अनुयाजार्थं प्रैषे कृते 'ॐप्रतिष्ठ' इति यदा ब्रह्मा ऽभ्यनुजानाति तावत्पर्यन्तं ब्रह्मा वाग्यतो भवेत् ॥ २ ॥

भागपरिहरणादि वा ॥ ३ ॥

पूर्वोक्तपक्षव्युदासार्थमिदं सूत्रम् । नेत आरभ्य वाग्यमनं कर्त्तव्यम् , किन्तु भाग[4]मस्मै परिहरति (३।४।२५) इति भागपरिहरणमारभ्य अनुयाजप्रसवं यावत् कृतवाग्यमो भवेत् ॥३॥

[नैमित्तिके व्याहृतिहोमे पूर्वमुपस्थिते अपकृष्य ब्रह्मवरणम्]

आवृता ऽवषट्कारासु ॥ ४ ॥

न विद्यते वषट्कारो यासां ता अवषट्कारा महाव्याहृत्याहुत[5]यः । तासु अवषट्-कारासु महाव्याहृत्याहुतिषु आवृता = क्रियया मन्त्ररहितेन क्रियामात्रेण ब्रह्मा उत्पाद्यः । अयं भावः । अत्र अवषट्कारशब्देन महाव्याहृतिसम्पाद्या आहुतय उच्यन्ते । यद्यपि अग्निहोत्रा-

---

१ "समानं होत्रा तृणनिरसनम्" (शां० श्रौ० ६।५।४) इति सूत्रात् नैर्ऋत्यामित्युक्तम् । तत्र हि "होतृषदनात्तृणं दक्षिणापरमवान्तरदेशं निरस्यति " (शां० श्रौ० १।६।६) इति विहितम् ।

२ अयमग्निशब्दः सौर्यादौ न विपरिणम्यते । वायुना सहोच्चारणेन प्रकृताग्निपरत्वाभावात् ।

३ ब्रह्मसदनस्य प्रकृतत्वादेव तत्रोपवेशने सिद्धे ब्रह्मसदनग्रहणमाहवनीयाभिमुखत्वस्य ब्रह्मसदन-संबन्धनियमार्थम् । तेन "आहवनीयं दक्षिणेनास्ते" (का० श्रौ० ११।१।६) इत्यादौ नाहवनीयाभिमुखत्वम् ।

४ "अथास्मै ब्रह्मभागं पर्याहरन्ति" इति प्रकृत्य "स वै वाचं यम एव स्याद् 'ब्रह्मन् प्रस्थास्यामी'त्येतस्माद्वचसः" (श० ब्रा० १।७।४।१९) इति श्रुतेर्विशेषाध्यवसानात् ।

५ "यदि याज्यां पुरोऽनुवाक्यां वा न विन्देद् व्याहृतीरेव याज्यायाः पुरोऽनुवाक्यायाश्च स्थाने कुर्यात्" इति याज्याकार्ये व्याहृतीनां विधानात् व्याहृतयः अवषट्कारा इत्युक्तम् ।

हुतिरपि अवषट्कारा:, तथापि तस्याऽपि "एकर्त्विजमग्निहोत्रम्" (बौ० श्रौ० ३।३) इति एकर्त्विक्साध्यत्वेन सर्वस्यापि तत्रत्यहोमस्य एकेनैव ऋत्विजा कर्त्तुं शक्यत्वेन न तत्र ब्रह्मणः कर्त्रन्तरस्य आक्षेपोऽस्ति, इति नाग्निहोत्राहुतिपरमवषट्कारपदम् । एवं दर्विहोमानाम् (का० श्रौ० ५।८।२९-३४) अवषट्कारत्वे ऽपि तत्र ब्रह्मवरणस्य प्राप्तत्वेन न तेषामपि ग्रहणम् । पूर्णाहुतिहोमानामपि (का० श्रौ० ४।१०।५) अग्निहोत्रन्यायसाम्यात् न तत्रापि ब्रह्मणः प्राप्तिः । अतः परिशेषात् इष्टावेव ब्रह्मवरणात्पूर्वं भेदनादिनिमित्ते नैमित्तिकतया होमकर्त्तव्यताप्राप्तिः । त एव होमा अवषट्कारपदेनाऽभिधीयन्ते । तत्रैव पश्चात्कर्तव्यं ब्रह्म-वरणमपकृष्य पूर्वं मन्त्रं विना तूष्णीं कर्त्तव्यम् । "व्याहृतिहोमो ऽनादेशे" (२५।१।४; इति प्रायश्चित्तविशेषानुक्तौ व्याहृतिहोमो विहितः; स च "ब्रह्मा प्रायश्चित्तानि जुहुयादनादिष्टानि" (२५।१४।३५) इति ब्रह्मकर्तृकः । यदि दैवान्मानुषाद्वा ऽपराधात्प्राग्ब्रह्मवरणाद् व्याहृतिहोमनिमित्तं समापतेत्, तर्हि ब्रह्मवरणस्यापकर्षं कृत्वा व्याहृतिहोमः सम्पादनीयः । तच्च ब्रह्मवरणं तूष्णीं क्रिया-मात्रेण कर्त्तव्यं, न मन्त्रैः । न्यायतस्तु समन्त्रिका क्रिया प्राप्नोति, सा ऽनेन वार्यते ॥ ४ ॥

[ब्रह्मवरणानन्तरं वा व्रतग्रहणम्]

पूर्वमुक्तस्य (२।१।११) व्रतग्रहणस्य कालान्तरमाह—

अत्र वा व्रतोपायनम् ॥ ५ ॥

उक्तावसरे, ब्रह्मवरणोत्तरकालं वा यजमानो व्रतमुपगच्छेत् ॥ ५ ॥

[ब्रह्मणो वाग्यमलोपे वैष्णवमन्त्रजपः]

व्याहृत्य वैष्णवं मन्त्रं जपेत् ॥ ६ ॥

वाग्यतो ब्रह्मा भ्रान्त्या वैदिकाद्व्यतिरिक्तां संस्कृतामपि वाचमुच्चार्य प्रायश्चितार्थं वैष्णवं मन्त्रं जपेत् ॥ ६ ॥

[अध्वर्योरपि हविर्ग्रहणकालिकवाग्यमलोपे वैष्णवमन्त्रजपः]

अध्वर्युश्च ॥ ७ ॥

हविर्ग्रहणकाले "वाचं यच्छति" (२।३।१०) इत्यध्वर्योरपि वाग्यमनं विहितं, तदपचारे अध्वर्युरपि वैष्ण[1]वं मन्त्रं जपेत् ॥ ७ ॥

[अपां प्रणयनाय अध्वर्योरनुज्ञानम्]

"प्रण[2]य यज्ञं देवता वर्द्धय त्वं नाकस्य पृष्ठे यजमानो अस्तु । सप्त·

---

१ "स यदि पुरा मानुषीं वाचं व्याहरेत्तत्रो वैष्णवीमृचं वा यजुर्वा जपेत्" (श० ब्रा० १।१।१।४) इति श्रुतिः । स च वैष्णवो मन्त्रः तत्तत्प्रकरणे यो मन्त्रः पठितः स एव ग्राह्यो, न तु अन्यत्र यत्र कुत्रापि पठितः । प्राकरणिकस्य हि प्रकरणादेव कर्मणा सह सामान्यतः संबन्धोऽवगम्यते, मन्त्रो ऽयमनेन कर्मणा संबद्ध इति । तत्र विशेषसम्बन्धः परं कल्पनीय इति कृत्वा लाघवम् । प्रकरणान्तरस्थस्य मन्त्रस्य ग्रहणे तस्य प्रकृतकर्मणा सह सम्बन्धाभावात् सामान्यसम्बन्धो ऽपि अनेन सह कल्पनीयो विशेषसंबन्धश्च इति संबन्ध-द्वयकल्पनकृतं गौरवं स्यात् ।

अत्र "उरु विष्णो" (शु० य० ५।३) इति ऋक् । "ध्रुवा असदन्नृतस्य योनौ ता विष्णो" (शु० य० २।७) इति, "विष्णो हव्यꣳ रक्ष" (शु० य० १।४) इति वा यजुः ।

२ प्रथमं 'प्रणय' इति पदं देवतारूपब्रह्मपरमिति तस्य सर्वत्र विशिष्टत्वात्तन्नोह्यते । द्वितीयमध्वर्यु-परमिति तदनुसारेणोह्यत इति ।

... यत्र ... यजमानं च धेहि ॐ प्रणय”
इति प्रणीताः प्रसौति ॥ ८ ॥

“ब्रह्मन्नपः प्रणेष्यामि” (का० श्रौ० २।३।२) इत्यध्वर्युणा पृष्टो ब्रह्मा प्रणय यज्ञमिति मन्त्रेण प्रणीताप्रणयनार्थमाज्ञां ददाति ॥ ८ ॥

[ब्रह्मणा हविष इध्मा-बर्हिषोश्च प्रोक्षणायाध्वर्योरनुज्ञादानम्]

एवमामन्त्रित ओङ्कारेण “प्रोक्ष यज्ञमि”ति हविषी,ध्मा–बर्हिषोश्च ॥९॥

ए[1]वमनेनैव प्रकारेण “ब्रह्मन्हविः प्रोक्षिष्यामि, (आप० श्रौ० १।१९।१) ब्रह्मन्निध्मं प्रोक्षिष्यामि, (आप० श्रौ० २।८।१) ब्रह्मन्बर्हिः प्रोक्षिष्यामि” इत्यध्वर्युणा पृष्टो ब्रह्मा “ॐ प्रोक्ष” इति अनुज्ञां दद्यात् । तत्र हविषामिध्माबर्हिषोश्च प्रोक्षणे प्रणय यज्ञमिति पूर्वोक्ते मन्त्रे ‘प्रणय’ इत्यस्य स्थाने ‘प्रोक्ष’ इति पदं प्रयोज्यमिति विशेषः। अत्र प्रणय यज्ञमित्यारभ्य धेहीत्यन्तो मन्त्र उपांशु प्रयोज्यः। ‘ॐ प्रणय’ इत्यस्य तूच्चैः प्रयोगः, प्रसवार्थत्वात् ॥ ९ ॥

[वेदिपरिग्रहानुज्ञानम्]

“बृहस्पते परिगृहाण वेदिꣳ सुगावो देवाः सदनानि सन्त्वस्यां बर्हिः प्रथताꣳ साध्वन्तर्हिꣳस्रा पृथिवी देवी देव्यस्तु” इति वेदिं परिगृह्णन्तम् ॥ १० ॥

“ब्रह्मन्पूर्वं परिग्रहं परिग्रहीष्यामि” (आप० श्रौ० २।३।७) इति अध्वर्युणा पृष्टो ब्रह्मा बृहस्पत इति मन्त्रेण वेदेः परिग्रहं कुर्वन्तमध्वर्युमाज्ञां ददाति। गायत्रेणेत्यादिमन्त्रैर्वेदेरियत्तां निश्चेतुं वेदेर्दक्षिणपश्चिमो-त्तरदिक्त्रये स्फ्येन रेखात्रयकरणं पूर्वः परिग्रहः (का०श्रौ० २।६।२३) ॥१०॥

[सामिधेन्यनुवचनार्थं ब्रह्मणा होतुरनुज्ञानम्]

“प्रजापते ऽनुब्रूहि यज्ञ” मिति सामिधेनीरनुवक्ष्यन्तम् ॥ ११ ॥

“ब्रह्मन्त्सामिधेनीरनुवक्ष्यामि” इति होत्रा पृष्टो ब्रह्मा सामिधेनीर्ऋचः पठिष्यन्तं होतारं प्रजापते ऽनुब्रूहि यज्ञमिति मन्त्रेणाऽऽज्ञापयेत् ॥ ११ ॥

[देवता वर्द्धयेत्यादिधेहीत्यन्तस्य प्रोक्षणाद्यनुज्ञाने ऊहपूर्वकमनुषङ्गः]

देवता वर्द्धय त्वमिति सर्वत्रानुषजति ॥ १२ ॥

प्रोक्ष यज्ञमित्यादिमन्त्रेषु देवता वर्द्धय त्वमित्यारभ्य धेहीत्यन्तः पूर्वोक्तो मन्त्रः संयोजनीयः। प्रोक्ष यज्ञं देवता वर्द्धय त्वं ना० धेहि। बृहस्पते प० देव्यस्तु देवता वर्द्धय० धेहि। प्रजापतेऽ नुब्रूहि यज्ञं देवता० धेहि इत्यादि।

वरुणप्रघासपर्वणि दक्षिणवेद्यां प्रतिप्रस्थाता, उत्तरवेद्यामध्वर्युरिति कर्त्तुर्द्वित्वात् प्रोक्षतं यज्ञं, वर्द्धयतं, युवां धत्तम् इत्यादीनामध्वर्युपराणां वचनानां द्विवचनान्तेनोहः का[2]र्यः।

---

१ तत्र प्रोक्षणानुज्ञायां मन्त्रे ॐ प्रोक्षेति, वेदिपरिग्रहानुज्ञायां च ॐ परिगृहाणेति, सामिधेन्यनुज्ञायां च ॐ अनुब्रूहीत्यपि संयोजनीयम्।

२ तथा चायं मन्त्रः। “ॐ बृहस्पते परिगृहाण वेदी सुगावो देवाः सदनानि सन्त्वनयोर्बर्हिः प्रथेताꣳ साध्वन्तर्हिꣳस्ते पृथिव्यौ देव्यौ देव्यौ स्ताम्। देवता वर्द्धयतं युवां नाकस्य पृष्ठे यजमानो अस्तु। सप्तऋषीणाꣳ सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धत्तम्” इति। अहीनादौ अनकेयजमानके यजमानाभिधायिपदानां चोहः कर्त्तव्यः।

ऋषीणाꣳ सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि।

एवं वेदी सुगावो देवाः, सन्त्वनयोः, प्रथेताम्, हिंस्र, पृथिव्यौ, देव्यौ, देव्यौ स्ताम् इत्यादीनां वेदिपराणां च पदानामूहः कार्यः ॥ १२ ॥

[ब्रह्मा सपात्रं प्राशित्रं प्रतिगृह्याऽऽसाद्य पुनरादाय प्राश्नीयात्]

"मित्रस्य त्वा चक्षुषा प्रतीक्षे" इति प्राशित्रं प्रतीक्षते ॥ १३ ॥

प्रधानयागानन्तरं शिष्टाद् हविषो यवमात्रं पिप्पलमात्रं वा गृहीत्वा अध्वर्युणा स्वस्मै दीयमानमात्मीयं भागं ब्रह्मा मित्रस्येति पश्येत् ॥ १३ ॥

देव[1]स्यत्वेति प्रतिगृह्णाति ॥ १४ ॥

वीक्षणानन्तरं ब्रह्मा पात्रसहितं प्राशित्रं देवस्यत्वेति प्रतिगृह्णीयात् ॥ १४ ॥

पृथि[2]व्यास्त्वेति सादयत्यपोह्य बर्हीꣳषि ॥ १५ ॥

ब्रह्मा वेद्या दक्षिणेंऽसे स्तृतानि बर्हींषि हस्तेनापसार्य तत्र भूमौ सपात्रं प्राशित्रं स्थापयेत्। दक्षिणें ऽसे इति "निदधाति वांऽसदेशे" (का० श्रौ० २।२।१७) इति वक्ष्यमाण सूत्रैक-वाक्यतया उक्तम्। प्राशित्रभक्षणस्य कालद्वयं विहितमस्ति; तत्र कालान्तरे भक्षणपक्षे अंसदेशे आसादनं कार्यम्। अत्र भक्षणपक्षे तु नासादनम्। किन्तु आसादनमकृत्वैव भक्षणम् ॥ १५ ॥

पुनरादाय "देवस्य त्वे" त्यनामिकाङ्गुष्ठाभ्या "मग्नेष्ट्वे[3]ति" प्राश्नाति दन्तैरनुपस्पृशन्नत्र चेत् ॥ १६ ॥

अस्मिन्नवसरे चेद् ब्रह्मा प्राशित्रं प्राश्नाति तदा प्राशित्रद्रव्यं पात्रादनामिकाङ्गुष्ठाभ्यां देवस्य त्वेति मन्त्रेण पुनरादाय दन्तैरचर्वयन् अग्नेरिति प्राश्नीयात् ॥ १६ ॥

अथोपरिष्टाद्भक्षणपक्षे आह—

निदधाति वाऽꣳसदेशे ॥ १७ ॥

वेदेराग्नेयैशानकोणावंसौ। कालान्तरे भक्षणपक्षे वेदेर्दक्षिणांसे आग्नेयकोणे स्तृतानि बर्हींषि अपसार्य पृथिव्यास्त्वेति मन्त्रेण प्राशित्रं ब्रह्मा ऽऽसादयेत्। "पृथिव्यास्त्वा" (१५) इति पूर्वोक्तसूत्रेणासादनस्योक्तत्वे ऽपि स्थानविशेषस्यानुक्तत्वात् स्थानविधानार्थमिदं सूत्रम् ॥ १७ ॥

[ब्रह्मा प्राशित्रपात्रे प्रक्षाल्य नाभिमालभेत्]

प्रक्षाल्य पात्रं नाभिमालभते—"या अप्स्वन्तर्देवतास्ता इदꣳ शमयन्तु स्वाहाकृतं जठरमिन्द्रस्य गच्छ घसिना मे मा संपृक्था ऊर्ध्वं मे नाभेः सीदेन्द्रस्य त्वा जठरे सादयामि" इति ॥ १८ ॥

पात्रमिति जातावेकवचनम्। ब्रह्मा उभे अपि प्राशित्राधारापिधानार्थे प्राशित्रहरण [4]पात्रे प्रक्षाल्य या अप्स्विवति मन्त्रं पठित्वा मन्त्रान्ते नाभिं स्पृशेत् ॥ १८ ॥

---

१ "ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। प्रतिगृह्णामि (२।११)

२ "ॐ पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थेऽग्ने हव्यꣳ रक्ष" (१।११)।

३ "ॐ अग्नेष्ट्वाऽऽस्येन प्राश्नामि" (२।११)।

४ यद्यप्यत्रप्रकरणे "प्रक्षाल्य पात्रम्" "तूष्णीं प्राशित्रहरणम्" (का० श्रौ० २।७।४२) इत्यादौ एकमेव पात्रं श्रूयते, तथापि अन्त्येष्टौ "आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च (का० श्रौ० २५।७।१-३७) इति वचनात् यज्ञपात्र साधनकदाहे "कर्णयोः प्राशित्रहरणे" (का० श्रौ० २५।७।२५) इति प्राशित्रहरण-द्वित्वावगमात् अत्रापि पात्रद्वित्वेनैव भाव्यम् इति कृत्वा अत्रायमेकवचनं जात्यभिप्रायमित्युक्तम्।

[अनुयाजार्थं ब्रह्मणा 'एतं त' इत्यनेनानुज्ञानम्]

"एतं त" इति समिदामन्त्रितः प्रसौति ॥१९॥

"ब्रह्मन्प्रस्थास्यामि" (आप० श्रौ० ३।४।५) इति अनुयाजार्थमध्वर्युणा पृष्टो ब्रह्मा "एतन्त" (शु० य० २।१२-१३) इति मन्त्रद्वयेनाध्वर्युमाज्ञापयेत् । समिच्छब्देन तदर्थत्वाद नुयाजा अभिधीयन्ते ॥१९॥

[1]प्रतिष्ठेति ब्रूयाद्वा ॥२०॥

'एतन्त' इति मन्त्रद्वयान्ते प्रतिष्ठ इति क्रियापदमस्ति, तद् ब्रूयादन्यद्वा ब्रूयादिति विकल्पः । प्रतिष्ठेत्यनभिव्याहरणपक्षे प्रणवान्त एव मन्त्रः पठनीय इति भावः ॥२०॥

[कर्मसमाप्तौ ब्रह्मकर्तृकः समिद्धोमः]

कर्मापवर्गे समिधमादधाति जुहोत्युपतिष्ठते वा "नमः कृताय कर्मणे, अकृताय कर्मणे नमः । अयाड् यज्ञं जातवेदा अन्तरः पूर्वो अस्मिन्निषद्य । सन्वठं० सनिठं० सुविमुचा विमुश्च धेह्यस्मभ्यं द्रविणं जातवेदः स्वाहा" इति [2]यथेतमेत्य ॥ २१ ॥

इष्टिसमाप्तौ ब्रह्मा वरणोत्तरकालमुपवेशनार्थम् आहवनीयमपरेण पूर्वेण वा येन मार्गेण गतो भवेत्तेनैव मार्गेण प्रत्यागत्य नमः कृतायेति मन्त्रेणाऽऽहवनीये समिधमादधाति । अथवा तेनैव मन्त्रेण सकृद्गृहीतमाज्यं जुह्वा होतव्यम् । अथवाऽनेनैव मन्त्रेणाहवनीयोपस्थानं कार्यम् । मन्त्रश्च सर्वत्र स्वाहान्त एव पठनीयः । होमपक्षे इदं जातवेदसे इति त्यागः कार्यः । पक्षान्तरयोस्तु यागाभावान्न त्यागः ॥२१॥

[व्रतजपादिकर्मापवर्गसमिद्धोमान्तं ब्रह्मत्वमुक्तमिष्टिपश्वोर्ज्ञेयम्]

एतद् ब्रह्मत्वमिष्टि-पश्वोः ॥२२॥

इष्टिषु पशुषु च एतावदेव ब्रह्मणः कर्म, न कर्मान्तरमित्यर्थः ॥२२॥

इति कातीयश्रौतसूत्रवृत्तौ द्वितीया कण्डिका ।

---

१ प्रपूर्वस्तिष्ठतिरनुयाजार्थे गमने वर्त्तते। प्रतिष्ठ अनुयाजार्थं गच्छ इत्यर्थः । प्रतिष्ठतमिति च वरुण-प्रघासेषु विपरिणामः ।

२ अत्र च "अतीत्य निष्क्रमणम्" (का० श्रौ० १।८।२५) इति परिभाषयैव यद्यपि यथेतं प्रत्यागमनं प्राप्नुयात् , तथापि स्वस्थानस्थित एव ब्रह्मा समिदाधानादिकं कृत्वा ततः प्रतिनिवर्त्तेत तन्मा भूत् , किन्तु यथेतं प्रत्येत्यैव समिदाधानं कर्त्तव्यम्; एतदर्थमत्र पुनः 'यथेतमेत्य' इति कथनम् ।

एवं होमपक्षे "स्वाहाकारः सर्वत्र" (का० श्रौ० ४।४।१५) इत्यनेन स्वाहाकारः प्राप्नुयाद्यद्यपि, तथापि उपस्थान-समिदाधानपक्षयोरपि स्वाहाकारान्त एव मन्त्रः पठनीयः । स च न पूर्वोक्तसूत्रेण प्राप्तः । तत्राप्यर्थं च पुनरत्र स्वाहाकारस्य पाठः ।

अयं च समिदाधानरूपः पदार्थोऽदृष्टार्थत्वात् यावदुक्ताऽन्तापच्छिन्नादिषु निवर्त्तते । सामान्यतः "प्रकृतिवद् विकृतिः कर्त्तव्या " इति शास्त्रेण तत्तत्कर्मणां स्वस्वप्रकृतितः पदार्थानां प्राप्तौ सत्यामपि पुनः यत्र कर्मणि केषांचन अङ्गानामाम्नानं तद्यावदुक्तं कर्म उच्यते । एवं सर्वेषामङ्गानां प्रकृतितोऽतिदेशप्राप्तौ कानिचिदङ्गान्यनुष्ठाय अवशिष्टानां परित्यागो यत्र विधीयते तत् अन्तापच्छिन्नमित्युच्यते । तत्रोभयत्रापि उक्ताङ्गातिरिक्तानामननुष्ठानस्य शास्त्रतात्पर्यविषयभूतत्वेन तादृशानामदृष्टार्थानामङ्गानां परित्यागः कर्त्तव्यः । प्रतिपत्तिरूप-सन्निपत्योपकारकाणां तु तत्तद्द्रव्यादिभिरपेक्षितत्वात् तत्रानुक्तानामपि अनुष्ठानमावश्यकमेव । अत एव प्रकृते समिदाधानादिरूपस्य अर्थकर्मत्वात् यावदुक्तान्तापच्छिन्नादावनिवृत्तिरेवेति । यागाद्यनुपयुक्तस्य कृतकार्यस्य द्रव्यस्य विहितदेशे प्रक्षेपः प्रतिपत्तिः ।

[सोदकचमसस्य गार्हपत्योत्तरतः स्थापनमालम्भश्च]

गार्हपत्यमुत्तरेणोदपात्रं निधायाऽऽलभते "भूतस्त्वा भूत करिष्यामी"ति ॥१॥

अध्वर्युर्वामहस्तस्थं प्रणीतापात्रं जलेनाऽऽपूर्य गार्हपत्यस्योत्तरतः स्थापयित्वा भूतस्त्वेति मन्त्रेण तत्पात्रं स्पृशेत्। आलम्भश्च पात्रस्यैव नोदकस्य। तेन अभ्युदयेष्ट्यादौ[1] दधिपयसोः प्रणीताकार्ये श्रपणे विनियुक्तत्वेन प्रणीतास्थानापन्नत्वात् तयोः प्रणयने मन्त्रो नोहितव्यः। [2]उदकालम्भे तु त्वाशब्दस्य उदकविषयत्वात्तत्र द्रव्यद्वित्वे विपरिणामः ॥१॥

(अपांप्रणयनार्थं ब्रह्मानुज्ञाप्रार्थनम्)

'ब्रह्मन्नपः३ प्रणेष्यामि' 'यजमान वाचं यच्छे' त्याह ॥ २ ॥

अध्वर्युः। अयं वाग्यमः प्रणयनाभावेऽपि प्रवर्तते। यजमानसंस्कारकत्वात्। प्रैषश्च तादर्थ्यात्।

अत्र प्रणीतानां दृष्टार्थत्वमुत अदृष्टार्थत्वमिति संशये देशनियमात्[4], पात्रनियमात् मन्त्रविधानात्, स्कन्ने प्रायश्चित्तविधानात्, शिरःसंस्तवात्, अन्ते प्रतिपत्तिविधानाच्च अदृष्टार्थत्वमेव तासाम्, इति प्राप्ते क्रियानिवृत्त्यर्थमेव द्रव्याणां विधानात् प्रकृते च उदकसाध्यानां क्रियाणां बहूनां संयवनादीनां सत्त्वात्, तदर्थं च अन्यस्य कस्यचिदुदकस्य अविधानात्, "प्रणीताभिः संयौति" (आप० श्रौ० १।२४।३) इति लिङ्गदर्शनाच्च संयवनादिरूपदृष्टार्थत्वमेवैतासाम्। यश्च देशादिनियमः स तु वरमदृष्टार्थो भवतु। यथा दृष्टार्थे एव भोजने प्राङ्मुखत्वादीनां

---

१ अमावास्यायां प्रातरिष्टेरारम्भो विहितः। यदि कश्चिद् भ्रान्त्या अमाबुद्ध्या चतुर्दश्यामिष्टिमारभेत, तदानीं चन्द्रस्याभ्युदितत्वात् तन्निमित्तजन्यदोषनिर्घातार्था इयमिष्टिः 'अभ्युदयेष्टिः अभ्युदयदृष्टेष्टिरिति चोच्यते।

२ उदकालम्भे तु उदकस्थानापन्नयोर्द्रव्ययोर्द्वित्वात् मन्त्रो द्विवचनान्तेन विपरिणमयितव्य इति कर्काचार्याः। इदमत्र विचारणीयम्। आलम्भनस्य संस्कारकर्मत्वात् प्रतिप्रधानं गुणावृत्तिन्यायेन यावद्द्रव्यमावृत्तिरवश्यं भाविन्येव। तत्र यत्र अनेकानि द्रव्याणि, तत्र पात्रानेकत्वस्याप्यावश्यकत्वेन यावत्पात्रमालम्भनस्याप्यावर्त्तनीयतया तदङ्गभूतस्य मन्त्रस्यावृत्तिः केन वार्येतेति। अथ "चतुर्होत्रा पौर्णमासीमभिमृशेत्" (आप० श्रौ० २।११।५) इत्यत्र बहूनामपि हविषां सकृदेवाभिमर्शनम्, असंभवतां च मन्त्रावृत्तिः इत्युक्तम्। तद्वदत्रापि बहूनामपि द्रव्याणां सकृदेवालम्भनं भवेत्। तत्र द्रव्याणां द्वित्वे बहुत्वे वा मन्त्रघटकपदानां तद्वाचिनां द्विवचन-बहुवचनान्ततया विपरिणाम आपद्येतेति यद्याशङ्क्येत, तदा पात्रबहुत्वेऽपि तथा विपरिणाम आपतन् कथं धारयितुं शक्यत इति। चतुर्होत्रेत्यस्यायमर्थः। "पृथिवी होता, द्यौरध्वर्युः, रुद्रोऽग्नीत्, मित्रो बृहस्पतिः" (तै० आ० ३।२) इति चतुर्होतृसंज्ञकेन मन्त्रेण पौर्णमासीम् = पौर्णमासीकालिकानि हवींषि स्पृशेत् इति।

३ ब्रह्मेत्यृत्विग्विशेषः। स च वरण भरणनिमित्तोऽपि अत्र ब्रह्मत्वकर्त्तरि उपचर्यते। तेन सत्रे वरण-भरणाभावेऽपि ब्रह्मन्नपः प्रणेष्यामीत्येव प्रयोगः, न तु यजमानापः प्रणेष्यामीति विपरिणामः। कुण्डपायिनामयनसंज्ञके सत्रे च "यो होता सोऽध्वर्युः स पोता, य उद्गाता स नेष्टा सोऽच्छावाकः, यो मैत्रावरुणः स ब्रह्मा स प्रतिहर्त्ता, यः प्रस्तोता स ब्राह्मणाच्छंसी स ग्रावस्तुत्, यः प्रतिप्रस्थाता सोऽग्नीत्स उन्नेता" (आप० श्रौ० २२।११।१२) इति मैत्रावरुणस्य ब्रह्मत्वं विहितं, तत्रापि न विपरिणामः।

४ "उत्तरेणाहवनीयम्" (२।३) इति देशनियमः। कांस्येत्यादिना (का० श्रौ० २।३।५) पात्रनियमः। "कस्त्वेति(श०ब्रा० १।१।१।१३) प्रणयति"इति मन्त्रविधानम्। "स्कन्नाः प्रणीता अभिमृशति "ऐतु राजा"(का० श्रौ० २५।६।२८) इति मन्त्रेण इति स्कन्दनप्रतिषेधः। "शिरो ह वा एतद्यज्ञस्य यत्प्रणीताः" (श० ब्रा० १४।२।१।५०)इति शिरःसंस्तवः। "अथ प्रणीता दक्षिणतः परीत्य निनयति" (श०ब्रा० १। ९।२।३२) इति प्रतिपत्तिः।

नियमानामदृष्टार्थता, तद्वत्। तत्रापि न केवलं संयवनार्थता, किन्तु अपेक्षितसर्वकार्यार्थतैव। प्रणीताभिः संयौतीति तु एकदेशकार्यानुवादः ॥ २ ॥

[आहवनीयोत्तरतः सोदकचमसस्य मन्त्रेण स्थापनम्]

अनुज्ञात उत्तरेणाहवनीयꣳ सम्प्रति निदधाति "कस्त्वे"ति[1] ॥ ३ ॥

ॐ प्रणय इति ब्रह्मणाऽनुज्ञातोऽध्वर्युः प्रणीता गार्हपत्यादाहवनीयसमीपं तूष्णीं नीत्वा आहवनीयस्योत्तरतः सम्प्रति अनन्तिके अनतिदूरे च बहिर्वेदि कस्त्वेति निदध्यात् । निधाने मन्त्रोऽयम् ॥३॥

[अग्नि-प्रणीतयोर्मध्ये न कश्चिद्गच्छेत्]

नान्तरेण गच्छेयुः ॥ ४ ॥

अग्निप्रणीतयोरन्तरालेन न केनापि गन्तव्यम् ॥ ४ ॥

[प्रणयनाश्रित-पात्रविशेषात् फलविशेषः]

कांꣳस्य—वानस्पत्य—मार्त्तिकैरभिचार—ब्रह्मवर्चस—प्रतिष्ठाकामा यथासङ्ख्यम् ॥ ५ ॥

अभिचारकामः कांस्यपात्रेण[2], ब्रह्मवर्चसकामो वानस्पत्यपात्रेण, प्रतिष्ठांकामो मृन्मयेन प्रणीतापात्रेण प्रणीताप्रणयनं कुर्यात् ॥ ५ ॥

[अग्नीनां दर्भैः परिस्तरणम्, सर्वेषां पात्राणां द्वन्द्वशः स्थापनं च]

तृणैरग्नीन्परिस्तीर्य पुरस्तात्प्रथमं, द्विशः पात्राणि सꣳसादयति ॥ ६ ॥

अध्वर्युराहवनीय-गार्हपत्य-दक्षिणाग्नीन् क्रमेण कुशैः प्रागग्रैरुदगग्रैश्च आदौ पूर्वस्यां दिशि, ततः प्रादक्षिण्येन परिस्तीर्य द्वे द्वे पात्रे एकेन प्रयत्नेन सहैव निदधाति। पान्ति रक्षन्ति हविरादि एभिरिति पात्राणि । पिबन्त्येभिरिति पात्राणि इति तु न विगृह्यते । तथा सति शूर्पादीनामपात्रता स्यात् । अतः पात्रशब्दः साधनवचन एव । पात्रस्य साधनत्वात् तस्य च "कपालानि च" (श० ब्रा० १।१।१।२२) इति समाम्नानसामर्थ्याच्च कपालसमुदायस्य पात्रता, न प्रतिकपालम् । अतश्च सर्वेषां कपालानामेकपात्रत्वात् पात्रान्तरेणैव सह द्वन्द्वता कार्या सर्वेषाम्। एवं पुरोडाशपाऽयोरपि अन्येन द्वन्द्वता कार्या, कपालवत् । एवं तण्डुलादावपि ।

अत्र "शूर्पं चाग्निहोत्रहवणीं च (श० ब्रा० १।१।१।२२) इत्यादिश्रुत्या पञ्चानां द्वन्द्वानां समाम्नानसामर्थ्यात् समाम्नातानां द्वन्द्वानामेव परस्परं द्वन्द्वता भवतीति नियमः। एवं च पत्निंष्ट्यां कपालानामभावात् स्फ्य[3] एक एवासाद्यते । समाम्नानारिक्तानामर्थवदासादितानां पात्राणां तु यदृच्छया द्वन्द्वता कार्या, न तत्र कश्चिद्विशेषः ॥ ६ ॥

---

१ ॐ कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति।१।६।

२ अत्र च कांस्यादीनां पात्राणामेव अभिचारादिरूपफलोद्देशेन विधानम् । प्रणयनरूपा क्रिया तु कांस्यादीनामाश्रयभूता । न तु क्रियायाः फलोद्देशेन विधानम् । यथा—"दध्नेन्द्रियकामस्य जुहुयात्" (का० श्रौ० ४।१५।२३) इत्यत्र प्रकृतमग्निहोत्रहोममाश्रित्य इन्द्रियरूपफलोद्देशेन दध्नो विधानम् । अत एव पुरुषाभिलषितफलजनकत्वादस्य गुणस्य पुरुषार्थत्वम् । अतः क्रत्वङ्गत्वाभावात् दर्शपूर्णमासविकृतिषु कांस्यादीनामतिदेशो नास्ति । पुरुषार्थस्य काम्यगुणादेः विकृतौ अनतिदेशस्य पूर्वमीमांसायामष्टमे ऽध्याये प्रथमे पादे पञ्चमाधिकरणे निरूपितत्वात् ।

३ अग्रेतनैः पात्रैः सह द्वन्द्वता तु न क्रियते । तथात्वे यथापाठं द्वन्द्वता न कस्य चित्स्यात् । ननु यदा स्फ्य एक एवासाद्यते तदा स्फ्यस्य द्वन्द्वताऽभावप्रसङ्ग इति चेत्, उच्यते । मा भूद् स्फ्यस्य द्वन्द्वता । अन्येषां तु द्वन्द्वता तदवस्थितेति ।

[पात्रासादनमध्वर्युकर्तृकं यजमानकर्तृकं वा]

यजमानो वा ॥ ७ ॥

यजमानो वा पात्राण्यासादयेदध्वर्युर्वेति विकल्पः ॥ ७ ॥

पात्राण्याह—

[पात्राणां विनियोगक्रमेणाऽऽसादनम्]

शूर्पाग्निहोत्रहवणि, स्फ्यकपालऽ॰, शम्याकृष्णाजिन, मुलूखलमुसलं, दृषदुपल, मर्थञ्च ॥ ८ ॥

शूर्पादीनि दश पात्राणि यथोपदिष्टं सादयित्वा यस्य यस्य पात्रस्य प्रयोजनं तत्सर्वमासादयेत् । अत्र येषां पात्राणामुपयोगस्तेषां सर्वेषामुपयोगक्रमेणासादनं कार्यमित्यर्थश्चेत्यनेन बोध्यते । छन्दोगपरिशिष्टे कात्यायनोऽपि—"प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः तत्तथाऽऽसादयेद् द्रव्यं यद्यथा विनियुज्यते" (६।१५) इति । एवं च विनियोग (कार्य) क्रमेणैव पात्राणामासादनमिति कर्कः ।

देवयाज्ञिकास्तु—यस्य पात्रस्य येन क्रमेण प्रथमं कार्यार्थं हस्तेनोपादानं तेनैव क्रमेण तस्यासादनम् । एवं दृष्टार्थता भवति लाघवं च । विनियोगक्रमेणासादने तु तथा न स्यात् हविर्ग्रहणे पात्र्या हविर्द्रव्यस्य च देशविप्रकर्षात । आज्यनिर्वापे आज्यस्थाल्या आज्यस्य च तस्मादुपादानक्रमेणैव पात्रासादनमित्याहुः ।

विकृतावपि प्राकृतकार्यापन्नानामासादनादि कार्यम् । अप्राकृतकार्यापन्नानां तु उपकल्पनमेव, नासादनं नापि प्रोक्षणम् । चरुपात्रस्य कपालस्थानीयत्वात् प्राकृतकार्यापत्त्या आसादनादिकमिति कश्चित् । तन्नेति कर्कः । यथा कपालगतेन ऊष्मणा पुरोडाशः पच्यते, न तथा चरुपात्रगतेन ऊष्मणा चरुः पच्यते । चरुपात्रगत ऊष्मा उदकमेव तापयति ततश्चरुसिद्धिर्भवति इति अकपालकार्यापत्तिः । अतश्चरुपात्रस्योपकल्पनमेव नासादनम् । स्मार्त्तकर्मसु याज्ञिकानां चरुस्थाल्यासादनानुष्ठानं कर्कविरुद्धमेवेति बोध्यम् ॥ ८ ॥

[गार्हपत्यस्य पश्चादुत्तरतो वा पात्रासादनम्]

श्रपणस्य पश्चादुत्तरतो वा ॥ ९ ॥

गार्हपत्यस्य आहवनीयस्य वा पश्चात् प्राक्संस्थं पात्राणामासादनम् । अथवा श्रपणस्योत्तरत उदक्संस्थं पात्रासादनम् । "उत्तरे चेदुदक्संस्थं प्राक्संस्थं पश्चिमे भवेत्" इति देवयाज्ञिकधृतकारिकाकारवचनात् । स्थानसङ्कोचे तु पश्चादपि उदक्संस्थम्, उत्तरेऽपि प्राक्संस्थं पात्रासादनम् । पदार्थस्य प्रधानत्वात् । तदुक्तं "प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः" (छं० प० ६।१५) इति ॥९॥

[शूर्पाद्यादाय सम्यक्पदार्थानुष्ठानाय वाग्यमः कार्यः]

"कर्मणे वा"मिति शूर्पाग्निहोत्रहवण्यादाय वाचं यच्छति ॥१०॥

अध्वर्युः कर्मण[1] इति मन्त्रेण शूर्पमग्निहोत्रहवणीं च सहैवादाय वाग्यमनं कुर्यात् । अत्र मन्त्रे साकाङ्क्षत्वात् आददे इत्यध्याहर्त्तव्यम् । अस्य संहितावत्प्रयोगो न भवति । अध्याहारस्य लौकिकत्वात् इति कर्कः (का० श्रौ० ६।४।२) । समन्त्राग्निहोत्रहवण्यादानस्य हविर्ग्रहणार्थतया परौ पयस्यायां च हविर्ग्रहणाभावात् प्रोक्षण्यर्थतया क्रियमाणमग्निहोत्रहवण्यादानं मन्त्रेण न कार्यं, किन्तु तूष्णीम् ।

---

1 ॐ कर्मणे वां वेषाय वाम् आददे ।१।१।

वाग्यमनस्य पदार्थधर्मतया हविर्ग्रहणस्थानीयस्य पदार्थान्तरस्यापि सम्यगनुष्ठेयत्वात् तदर्थमपि वाग्यमस्यावश्यकत्वात् पश्चादावपि भवत्येव वाग्यमनम् ॥१०॥

[शूर्पाग्निहोत्रहवण्योः प्रतपनं हविर्ग्रहणार्थम्]

प्रतपनं "प्रत्युष्टं" निष्टप्तमि"ति वा ॥११॥

शूर्पाग्निहोत्रहवण्योर्गार्हपत्येऽग्नौ प्रत्युष्टमिति मन्त्रेण[1], निष्टप्तमिति[2] मन्त्रेण वा प्रतपनं कुर्यादध्वर्युः। प्रतपनं हविर्ग्रहणार्थं शूर्पाग्निहोत्रहवण्योः संस्कारः। तेन हविर्ग्रहणाभावे न कार्यः ॥११॥

[गार्हपत्यस्य पश्चात् स्थितं शकटमनु गच्छेत्]

गच्छे"त्युर्वन्तरिक्ष"मिति[3] श्रपणस्य पश्चादनस्तिष्ठत्समङ्गि ॥१२॥

श्रपणस्य गार्हपत्यस्य पश्चिमदेशे युग-योक्त्र-वरत्रादिभिः सर्वाङ्गैरुपेतं शकटमवस्थितं भवति, तत्प्रति अध्वर्युर्गच्छेत्। समङ्गीत्यनेन अनडुत्प्राप्तिर्न शङ्कनीया। तयोः केवलं गमनार्थत्वात्। गमनस्य चात्राभावात् ॥१२॥

[दक्षिणोत्तरयोर्धुरोः क्रमेणाऽभिमर्शनम्]

"धूरसी"ति धूरभिमर्शनम् ॥१३॥

अध्वर्युर्धूरसीति[4] मन्त्रेण दक्षिणां धुरमभिमृश्य तत उत्तरां धुरमभिमृशेत्। अनडुत्स्कन्धयोरुपरि यौ निधीयेते तौ युगस्य प्रान्तौ युगशम्यान्तरालौ धूःशब्देनोच्येते ॥१३॥

[अनःसंस्कारत्वादेकस्या एव ईषाया अभिमर्शनम्]

"देवाना"मित्युपस्तम्भनस्य पश्चादीषाम् ॥१४॥

शकटे प्रागपरायतो दीर्घः काष्ठविशेष ईषा। तदग्रस्य भूमिस्पर्शो मा भूदिति तदाधारत्वेन स्थापितं काष्ठमुपस्तम्भनं, तस्य पश्चाद्भागे तामीषांस्पृशेत्। मन्त्रोऽयं प्रयोगसमवेतार्थस्मारकत्वात् पितृयज्ञे ऽतिदिष्टः सन् तत्र पितॄणां प्रकाशनार्थं पितॄणामसीत्यूह्यते। अत्रत्यदेवशब्दस्य देवपरत्वात् पितृयज्ञे च पितॄणां देवत्वाभावात् तत्प्रकाशनार्थं देवपदस्थाने पितृपदं प्रयोक्तव्यमेव। एवमेकदेवत्यायां विकृतौ देवस्यासीत्याद्यूहः कार्यः। केचित्तु अत्र देवशब्दस्य बहुवचनान्तत्वात् देवयोश्च अग्नीषोमयोरुभयोरेवात्र सत्वाद् बहुवचनान्तेन देवशब्देन तयोः प्रकाशनासंभवादसमवेतत्वेनादृष्टार्थत्वमेव मन्त्रस्य। अतश्च एकदेवत्यायां विकृतौ देवशब्दस्य ऊहो नास्ति इति वदन्ति, तन्न। अत्रापि अग्निरेकः अग्नीषोमौ च द्वौ इति बहूनां देवतानां सत्वात् तत्प्रकाशकत्वेन मन्त्रस्य समवेतार्थत्वसम्भवात्।

न च नात्र देवशब्देन देवोऽभिधीयते, किन्तु देवता। देवता च त्यज्यमानोद्देश्यत्वरूपा। देवत्वं तु मनुष्यत्वादिवज्जातिविशेषः। तादृशं च देवतात्वं तद्धितेन चतुर्थ्यन्तेन वा बोध्यते। प्रकृते च आग्नेयमिति तद्धितेन अग्नेरेकं देवतात्वम्, अग्नीषोमीय इति तद्धिता-

---

१ ॐ प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयः ।१।७।

२ ॐ निष्टप्तꣳ रक्षो निष्टप्ता अरातयः १।७।

३ ॐ उर्वन्तरिक्षमन्वेमि १।७।

४ ॐ धूरसि धूर्व धूर्वन्तं धर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः।

५ ओं देवानामसि वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम्। अह्रुतमसि हविर्धानं दृꣳहस्व माह्वार्मा ते यज्ञपतिर्ह्वार्षीत् १।८-९।

न्तेन च अग्नीषोमयोर्मिलितयोर्व्यासज्यवृत्ति एकं देवतात्वम् इति देवतात्वद्वयस्यैव सत्वात् कथं बहुवचनस्योपपत्तिरिति वाच्यम्।

यद्यपि अग्नीषोमयोर्व्यासज्यवृत्ति देवतात्वं, तथापि अग्निः सोमश्च पृथक् पृथक् शब्देन अभिधातुं शक्येते। अस्ति च मन्त्रवर्णो "देवोऽअग्निः," (शु० य० २१।५८) "देवः सोम" (ऋ० ७।१।३२) इति।

अत एव "अग्नीषोमाभ्याम्," (१।१०) "अग्नीषोमयोः", (२।१५) इत्यादि द्विवचनान्तप्रयोगो मन्त्रेषु सङ्गच्छते। अतो देवतात्वस्य द्वित्वेऽपि देवानां बहुत्वात् तेषामपि यागे समवेतत्वेन तत्प्रकाशनेन मन्त्रस्य प्रकृतसमवेतार्थप्रकाशकत्वरूपदृष्टार्थत्वस्य प्रकृतावपि संभवेन तादृशकार्यार्थं वचनस्यापि एकदेवत्ययागे विपरिणामो युक्त एव। यदि च देवशब्देन देवतैवाभिधीयेत तर्हि पितॄणामपि तादृशत्वात् देवशब्देनैव पितॄणामपि प्रकाशनावश्यकतया देवशब्दस्यापि न विपरिणामः सिद्ध्येत्। तत्तु भवतो नेष्टम्।

यदि च पितृयज्ञे पितृशब्देनैव तेषां चोदितत्वात् तत्र तेनैव शब्देन तेषामभिधानं युक्तमित्युच्येत, तर्हि अग्न्यादीनामपि आग्नेयादिशब्देनैव चोदितत्वात् तेष्वपि देवशब्दप्रयोगो दुर्लभः स्यात्। नाप्यवयवयोगाद्देवशब्दप्रयोगः। तेनैव योगेन पितॄणामपि देवत्वापातात् पुनस्त द्दोषतादवस्थ्यापत्तेः।

न चैवमपि अग्निरेकः सोमश्चापर इति देवतयोर्द्वित्वात् कथं बहुत्वमिति वाच्यम्। एकश्च केवलोऽग्निः, अपरः सोमसहितोऽग्निरिति वैशिष्ट्यभेदाद्भेदमङ्गीकृत्य बहुवचनान्तेन प्रयोगः। अतो देवशब्दस्य बहुवचनान्तस्य सर्वथा प्रकृतौ समवेतत्वेन विकृतावपि एकदेवतायां देवस्यासि, द्विदेवतायां देवयोरसि इत्यूहः कार्यः। एवं वचनवत् लिङ्गस्यापि प्रकृतौ समवेतत्वात् स्त्रीदेवताकायां विकृतौ अदितीष्ट्यौ देव्या असीत्यूहः कार्यः॥ १४॥

[शकटसंबन्धि—दक्षिणचक्रारोहणम्]

"विष्णुस्त्वे"त्यारोहणम् ॥ १५ ॥

विष्णुस्त्वेति[1] मन्त्रेणानसो दक्षिणं चक्रमारोहेदध्वर्युः॥ १५॥

[हविषः प्रेक्षणम्]

प्रेक्षत "उरु वाताये"ति हविर्धान् ॥ १६ ॥

आरोहणानन्तरमध्वर्युः शकटस्थान् व्रीहीन् यवान् वा हविरर्थान् पश्येत्। अत्र मन्त्रे साकाङ्क्षत्वाद् भव इत्यस्याध्याहारः। इदं प्रेक्षणं हविः संस्कारार्थम्। अतो हविषः प्रधानत्वम्, कर्मणश्च गुणत्वम्। एवं च यत्र व्रीहियवादीनि भिन्नानि द्रव्याणि सन्ति तत्र संस्कार्याणां द्रव्याणां बहुत्वात् प्रतिप्रधानं गुणावृत्तिन्यायेन यावद्द्रव्यं वीक्षणमावर्त्तितव्यम्। तदङ्गत्वाच्च मन्त्रस्याप्यावृत्तिः॥ १६॥

[हविर्व्यतिरिक्तलोष्टादिनिरासः]

"अपहत"मिति निरस्यत्यन्यत् ॥ १७ ॥

तत्र व्रीहियवेभ्योऽन्यत्तृणलोष्टादिकं यदि स्यात्, तदनेन[3] मन्त्रेण निरस्येदध्वर्युः। तत्र व्रीहियवेभ्योऽन्यत्तृणलोष्टादिकं यदि स्यात्, तदनेन मन्त्रेण निरस्येदध्वर्युः।

---

१ ॐ विष्णुस्त्वा क्रमताम् ।१।९।

२ ॐ उरु वाताय भव ।१।९।

३ ॐ अपहतꣳ रक्षः ।१।९।

[लोष्टादेरभावे हविषोऽभिमर्शनम्]

अविद्यमानेऽभिमृशेत् ॥ १८ ॥

यदि तत्र तृणलोष्टादिकमपद्रव्यं नास्ति तदा ऽनेन मन्त्रेण व्रीह्यादीनभिमृशेत् । नानाबीजेष्वपि प्रतिबीजं मन्त्रावृत्त्याऽभिमर्शनं कार्यम् ॥ १८ ॥

[हविष आलम्भः]

"यच्छन्ता" मित्यालभते ॥१९॥

यच्छन्तामिति[1] मन्त्रेणाध्वर्युर्हविष्यान् स्पृशेत् । नानाबीजेषु भेदेन मन्त्रावृत्त्या स्पर्शः । स्पर्शस्य हविः संस्कारत्वात् ॥१९॥

[आग्नेययागार्थं चतुरो मुष्टीन् निर्वपेत्]

"देवस्य त्वे"ति गृहणात्याग्नेयं चतुरो मुष्टीन् ॥ २० ॥

अध्वर्युर्मुष्टिना अग्निदेवतं व्रीह्यादिकं हविस्तूष्णीमादाय देवस्य[2] त्वेति मन्त्रेण शूर्पस्थाग्निहोत्रहवण्यां प्रक्षिपेत्[3] । एवं चतुरो मुष्टीन्निर्वपेत् । तत्र मुष्टित्रयनिर्वापः समन्त्रकः । चतुर्थमुष्टिनिर्वापस्तु तूष्णीमित्युक्तम् (१।७।११) । यद्यप्यत्र सूत्रपर्यालोचनया ग्रहणे मन्त्र इति प्रतीयते, तथापि "अग्निहोत्रहवण्यां चतुरो मुष्टीन्निर्वपति" (आप० श्रौ० १।१७।१०) इति शास्त्रेण निर्वापरूपप्रक्षेप एव मन्त्रस्याङ्गताप्रतीतेस्तदनुरोधेनात्रत्यं गृह्णीयादिति पदं लक्षणया प्रक्षेपपरमङ्गीकर्त्तव्यम् । चतुर्मुष्टिकाग्नेयहविर्ग्रहणानन्तरं चाग्निहोत्रहवण्याः सकाशात् शूर्पे हविः पृथक् पृथक् प्रक्षेपणीयम् । एवं शूर्पादानस्यापि दृष्टार्थता भवति । अग्निहोत्रहवण्यां च हविरन्तरं ग्रहीष्यन्ते, आपश्च तत्र धारिष्यन्ते ॥२०॥

[अग्नीषोमीययागार्थं च चतुर्मुष्टिनिर्वापः]

एवमग्नीषोमीयम् ॥२१॥

हविर्गृह्णीयादध्वर्युः[4] ॥२१॥

यथादेवतमन्यत् ॥२२॥

अन्यदैन्द्राग्नादिकं हविर्यथादेवतं ग्रहीतव्यम् ॥२२॥

[हविष्यशेषाभिमर्शनं शेषिसंस्कारार्थम्]

"भूताय त्वे"ति शेषाभिमर्शनम् ॥२३॥

अनसि स्थितस्य गृहीतावशिष्टस्य हविषोऽभिमर्शनं भूताय त्वेति[5] कार्यम् । नानाबीजेषु प्रत्येकं समन्त्रकमभिमर्शनम्[6] । अत्र मन्त्रे परिशेषयामीत्यध्याहारः, साकाङ्क्षत्वात् ॥२३॥

१ ॐ यच्छन्तां पञ्च ।१।९।

२ ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अग्नये जुष्टं गृह्णामि ।१।१०

३ अत्र निर्वापस्य समाख्ययाऽध्वर्युकर्तृकत्वात् मुष्टिरध्वर्योरेव बोध्यो, न तु याजमानः । पदार्थस्य प्राधान्यात् । यजमानपरिमाणं तु "पञ्चारत्निं परिवासयेत्" (श० ब्रा० ३।४।४।१८) इत्यादौ ग्राह्यम् ।

४ ॐ देवस्य त्वा स० हस्ताभ्याम् । अग्नीषोमाभ्यां जुष्टं गृह्णामि ।१।१०।

५ ॐ भूताय त्वा नारातये परिशेषयामि ।१।११।

६ स चायं शेषसंबन्धेऽपि सति हविष एव संस्कारः । प्रयोजनवत्त्वात् । न च शेषेण संस्कृतेन नास्ति प्रयोजनम् । अतः स्रङ्मालापनयनवच्छेषिसंस्कारः प्रतिपत्तव्यः । तद्यथा स्रङ्माला देवदत्तीयेति कृत्वा शुचौ देशे व्यवस्थाप्यते । अपगतदेवदत्तसंबन्धाया अपि मालायाः संस्कारो देवदत्तस्यैवानिष्टपरिहारार्थो, न मालायाः, एवमिहापि । प्रयोजनं शेषिसंस्काराभिसंबन्धार्थतया सशेषं ग्रहणं कर्त्तव्यमिति ।

[प्राचीक्षणं श्रमापनोदार्थम्]

"स्व"रिति प्राङीक्षते ॥२४॥

अध्वर्युः "स्वरभिविख्येषम्" (१।११) इति पूर्वस्यां दिशि विलोकयेत् । दृष्टिनिरोधजनितश्रमापनोदार्थम्। अतो यत्र निर्वापो नास्ति तत्र श्रमाभावात् द्वारलोपान्निवर्त्तते। एतच्चेक्षणं पित्र्येष्टौ दक्षिणस्यामीक्षणम्, दिग्विपर्ययेण तस्यास्तत्र प्राचीत्वात् ॥२४॥

[हविर्गृहीत्वा शकटादवरोहणम्]

"दृꣳहन्ता"मित्यवरोहति[1] ॥२५॥

अनसोऽवतरेदध्वर्युः ॥२५॥

[गार्हपत्यस्योत्तरतो गत्वा पश्चिमे हविर्द्रव्यस्थापनम्]

गच्छ"त्युर्वन्तरिक्ष"मिति[2] ॥२६॥

अनसोऽवतीर्य यत्र हविषः सादनं क्रियते तमुत्तरदेशं प्रति गच्छेदध्वर्युः ॥२६॥

श्रपणस्य पश्चात्सादयति "पृथिव्यास्त्वे"ति[3] ॥२७॥

श्रप्यन्ते हवींष्यस्मिन्निति श्रपणो गार्हपत्योऽग्निः । तस्य पश्चात् शूर्पस्थानि हवींषि सादयेदध्वर्युः ॥२७॥

[पात्रीतो वा निर्वापः]

पात्र्यां वा स्फ्योपहितायाम् ॥२८॥

अथवा स्फ्योपरि निहितायामिडापात्र्यामेव इदमनः संबन्धि सर्वं कर्म प्रतिपत्तव्यम्। पूर्वाग्रामिडापात्रीमुदगग्र-स्फ्योपरि निधाय हविषा पूरितां ताम् अनःस्थानीयां कृत्वा तत एव निर्वापादिकं कार्यमिति भावः ॥२८॥

[पात्रीपूर्वार्द्धमभिमृश्य धूरभिमर्शनादिमन्त्राणां जपः]

इडापात्रीतो हविर्ग्रहणपक्षे धू- रीषा-ऽऽरोहणानामभावात्तदङ्गभूतानां मन्त्राणां किं प्रयोजनमित्यत आह—

धूरीषाऽऽरोहणानि पात्रीबिले जपति ॥२९॥

पात्रीतो हविर्ग्रहणपक्षे धूरीषाऽऽरोहणमन्त्रान्[4] इडापात्र्या मुखे गत अपेदध्वर्युः । इडापात्रीमुखं हस्तेन स्पृष्ट्वा मन्त्रत्रयं जपेदित्यर्थः ॥२९॥

[शकटादवरोहणस्थानीयमुत्थानम्]

इडापात्रीतो हविर्ग्रहणपक्षे अवरोहणमन्त्रेण किं कर्त्तव्यमित्यपेक्षायामाह—

"दृꣳहन्ता"मित्युत्थानम् ॥३०॥

दृꣳहन्तामिति मन्त्रेणाध्वर्युरासनादुत्तिष्ठेत् ॥३०॥

१ ॐ दृꣳहन्तां दुर्याः पृथिव्याम् ।१।११।

२ ॐ उर्वन्तरिक्षमन्वेमि ।१।११।

३ ॐ पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थेऽग्ने हव्यꣳ रक्ष ।१।११।

४ विलिङ्गानामपि मन्त्राणाम् "अनन्तरायमु तर्हि यजूꣳषि जपेत" (श० ब्रा० १।१।२।८) इति वचनसामर्थ्याद्विनियोगः ।

[पवित्रयोश्छेदनेन सम्पादनम्]

कुशौ समावप्रशीर्णाग्रावनन्तर्गर्भौ कुशैश्छिनत्ति "पवित्रे[1] स्थ" इति ॥३०॥

कुशशब्द एकतृणपरः । कुशौ=द्वे दर्भतृणे, समौ मूलादारभ्याग्रपर्यन्तं तुल्यप्रमाणौ, अप्रशीर्णाग्रौ = अग्रवन्तौ, न विद्यते अन्तर्मध्ये[2] गर्भो ययोस्तौ, गर्भे हि सति सङ्ख्यान्तरं स्यात्) कुशैश्छिनत्ति मूलच्छेदनेन प्रादेशप्रमाणौ करोति । अर्थात् अध्वर्युः कुशपत्रद्वयं वामहस्ते कृत्वा अग्रतः प्रादेशमात्रं परिमाय मूले तयोरुपरि कुशत्रयमुदगग्रं निधाय तत्कुशत्रयं तयोर्मूलभागेन प्रादक्षिण्येन परिवेष्ट्य तयोः प्रादेशमात्रमग्रभागं वामहस्ते कृत्वा अवशिष्टं मूलभागं, कुशत्रयं च दक्षिणहस्ते धृत्वा दक्षिणहस्तेन छिन्द्यात् त्रोटयेत् । अत्र पवित्रयोरेव समत्वोक्तेश्छेदनेन पवित्रे एव समे कार्ये । न तु समप्रमाणौ कुशौ छिन्द्यादित्यत्राग्रहः । भिन्नप्रमाणावपि कुशौ समौ कार्याविति तात्पर्यम् ॥३०॥

त्रीन्वा ॥३१॥

अथवा त्रीन् कुशान् कुशैस्तथैव छिनत्ति । इदं पक्षान्तरम् । अत्र "न प्रकृतावूहोऽस्ती"ति (का० श्रौ० ४।४।२१) न्यायेन मन्त्रगतस्य द्विवचनान्तपदस्य ऊहाभावेन यथाश्रुतस्य मन्त्रस्य वा पाठः क्रियताम्, अथवा मन्त्रस्य परित्याग ? इति अन्यतरस्मिन्नवश्यकर्त्तव्ये गुणभूतसङ्ख्यानुरोधेन प्रधानभूतप्रातिपदिकपरित्यागस्यान्याय्यत्वात् 'गुणे त्वन्याय्यकल्पना' (जै० ६।३।सू० १५) इति न्यायेन द्विवचनस्यैव बहुत्वे लक्षणामङ्गीकृत्य द्विवचनान्तस्यैव मन्त्रस्यानूहितस्य पाठः कर्त्तव्य इत्यवगन्तव्यम् ॥३१॥

[अग्निहोत्रहवण्यामपः कृत्वा पवित्राभ्यामुत्पवनम्]

हविर्ग्रहण्यामपः कृत्वा ताभ्यामुत्पुनाति "सवितुर्व"[3] इति ॥३२॥

हविर्गृह्यते यस्यामिति हविर्ग्रहणी अग्निहोत्रहवणी । तस्यामध्वर्युरुदकं प्रणीतमासिच्य तदुदकं हस्तद्वयस्यानामिकाङ्गुष्ठगृहीताभ्यां पवित्राभ्यां सकृदूर्ध्वं क्षिपेत् । "अग्निहोत्रहवण्यां चतुरो मुष्टीन्निर्वपति" (आप० श्रौ० १।१७।१०) इति सूत्रात् हविर्ग्रहणीशब्देन अग्निहोत्रहवणी उच्यते । तेन पयस्यादौ हविर्ग्रहणाभावेऽपि प्रोक्षणार्थतया अपां निधानमत्र भवत्येव ॥३२॥

[प्रोक्षणीषु पवित्रनिधानम्]

ताःस्थानं तयोः ॥३३॥

इत आरभ्य तयोः पवित्रयोरग्निहोत्रहवणीस्थास्ता आप एव स्थानं वेदितव्यम् । "पवित्रे निधाय प्रणीतासु"(का०श्रौ० २।७।१८) इत्यस्मात्प्राक् पवित्रयोरत्रैव निधानं कार्यमित्यर्थः ॥३३॥

[प्रोक्षणीपात्रं सव्ये कृत्वा दक्षिणेनापामूर्ध्वं चालनम्]

सव्ये कृत्वा दक्षिणेनोदिङ्गयति "देवीराप"[4] इति ॥३४॥

अध्वर्युः सव्यहस्ते अग्निहोत्रहवणीस्थाः प्रोक्षणीः = अपो निधाय सव्यहस्तस्था एव

---

१ ॐ पवित्रे स्थो वैष्णव्यौ ।१।१२।

२ यस्य एकपत्रात्मककुशस्य मध्ये कुशान्तरं नास्ति सोऽनन्तर्गर्भः । तादृशौ द्वौ दर्भौ प्रादेशमात्रावादाय यदि प्रादेशमात्रादधिकं तदा तावत्प्रमाणं छित्वा पवित्रे सम्पादयेत् ।

३ ॐ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।१।१२।

४ ॐ देवीरापो अग्रेगुवो अग्रेपुवोऽग्र इममद्य यज्ञं नयताग्रे यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुवम् । युष्मा इन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये ।१।१२-१३।

प्रोक्षणीर्दक्षिणहस्तेन मुखपर्यन्तमूर्ध्वाः कुर्यात्। समाचारादेव दक्षिणेनोदिङ्गने प्राप्ते सूत्रे दक्षिणग्रहणं सव्ये स्थितानामेव प्रोक्षणीनामपां दक्षिणेनोदिङ्गनं यथा स्यादित्येतदर्थम्। तेन सव्यहस्तस्थितानामेव उदिङ्गनं क्रियत इति। अत्र वामहस्ते प्रोक्षणीर्निधाय दक्षिणहस्तेन पवित्राभ्याम्प्रोक्षणीनामुदिङ्गनमिति केषांचिदनुष्ठानं सर्वथाऽनाकरम् ॥३४॥

[पात्रस्थानामपां तदेकदेशेन प्राणीतेन वा प्रोक्षणम्]

"प्रोक्षिता स्थे"ति तासां प्रोक्षणम् ॥३५॥

अध्वर्युः प्रोक्षिता स्थेति[1] मन्त्रेण तासां प्रोक्षणीनामपां प्राणीतेन[2] जलेन प्रोक्षणं सकृत्कुर्यात् ॥ ३५ ॥

[प्रोक्षणीभिराग्नेयादिहविःप्रोक्षणम्]

हविश्चा "ऽग्नये त्वा[3]," "ऽग्नीषोमाभ्यां[4] त्वे"ति ॥३६॥

आभ्यां मन्त्राभ्यां यथाक्रमं शूर्पस्थे हविषी प्रोक्षेत् ॥ ३६ ॥

यथादेवतमन्यत् ॥३७॥

अन्यदैन्द्राग्नादिकं हविर्यथादेवतं प्रोक्षेदध्वर्युः ॥३७॥

[प्रतिपात्रं मन्त्रावृत्त्या पृथक् पृथक् प्रोक्षणम्]

पात्राणि "दैव्याये"ति ॥३८॥

दैव्यायेति[5] मन्त्रेण प्रतिपात्रं मन्त्रावृत्त्या पृथक् पृथक् पात्राणि प्रोक्षेत्। पितृयज्ञे देवशब्दस्थाने प्रधानार्थेषु पात्रेषु शूर्पकपालादिषु पितृशब्दप्रयोगः । अङ्गप्रधानोभयार्थेषु पात्रेषु तु देवपितृशब्दप्रयोगः। केवलं देवकर्मार्थेषु पात्रेषु पितृयज्ञेऽपि दैव्यायेत्येव प्रयोगः ॥३८॥

[प्रणीताऽऽहवनीयान्तराले प्रोक्षणीनां निधानम्]

असञ्चरे प्रोक्षणीर्निधाय ॥३९॥

"नान्तरेण गच्छेयुः" (२।२४) इत्युक्ते प्रणीताहवनीयान्तराले असञ्चरे वेदिमध्ये प्रोक्षणीर्निदध्यादध्वर्युः ॥३९॥

इति कातीयश्रौतसूत्रवृत्तौ द्वितीयाध्याये तृतीया कण्डिका।

---

१ ॐ प्रोक्षिता स्थ ।१।१३।

२ "प्रोक्षितास्थेति तासां प्रोक्षणम्" (का० श्रौ० २।३।३५) इति सूत्रकारेण स्पष्टमेव प्रोक्षणविधानात्, "हविश्च" (३६) इत्युत्तरसूत्रे तदनुकर्षणाच्च मन्त्रपाठमात्रपक्षस्य सूत्रस्वरससिद्धत्वात् प्रोक्षणकर्मत्वेन तासां प्रोक्षणसाधनत्वानुपपत्तेः प्रणीतानां सर्वार्थत्वात् ताभिरेव अग्निहोत्रहवणीस्थानामपां प्रोक्षणमित्यभिप्रायेण प्राणीतेन प्रोक्षणमभिहितम्।

३ ॐ अग्नये त्वा जुष्टं प्रोक्षामि ।१।१४।

४ ॐ अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ।१।१४।

५ ॐ दैव्याय कर्मणे शुन्धध्वं देवयज्यायै यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामि ।१।१४।

[कृष्णस्य मृगविशेषस्याजिनमादद्यात्]

"शर्मासी"ति[1] कृष्णाजिनादानम् ॥ १ ॥

शर्मासीति मन्त्रेण कृष्णाजिनस्यादानं कुर्यादध्वर्युः । कृष्ण इति मृगविशेषः । तस्य अजिनं कृष्णाजिनम् । एतदादानस्य हविषोऽवघातार्थत्वात्तदभावेऽभावः ॥ १ ॥

[कृष्णाजिनं पात्राण्यतिक्रम्य नीत्वा सकृदवधूनयेत्]

अपेत्य पात्रेभ्योऽवधूनोत्यवधूतमिति[2] ॥ २ ॥

अध्वर्युस्तत्कृष्णाजिनमासादितेभ्यः पात्रेभ्यः पृथक्कृत्य उत्करे गत्वा तत्र तदवधूनोति । तल्लग्नं धूल्यादिकं कृष्णाजिनकम्पनेन उत्करे पातयतीत्यर्थः ॥२॥

[उपरिलोमप्रत्यग्ग्रीवकृष्णाजिनास्तरणम्]

प्रत्यग्ग्रीवमास्तृणा"त्यदित्यास्त्वगि"ति[3] ॥३॥

प्रतीच्यां ग्रीवा यस्य तत् प्रत्यग्ग्रीवं कृष्णाजिनमास्तृणुयादध्वर्युः ॥३॥

[वामपाणिस्पृष्टे कृष्णाजिने उलूखलनिधानम्]

सव्याशून्ये निदधात्युलूखल"मद्रिरसि,"[4] "ग्रावासी"ति[5] वा ॥ ४ ॥

वामहस्तेन स्पृष्टे कृष्णाजिने उलूखलमन्यतरमन्त्रेण[6] स्थापयति ॥ ४ ॥

"प्रति त्वे"त्युभयोः ॥ ५ ॥

'अद्रिरसि' 'ग्रावासि' इति मन्त्रद्वये 'प्रतित्वाऽदित्यास्त्वग्वेत्तु' इति मन्त्रः संयोजनीयः ॥ ५ ॥

[उलूखले हविर्द्रव्यप्रक्षेपः]

हविराप"त्यग्नेस्तनू"रिति[7] ॥ ६ ॥

उलूखले हविः प्रक्षिपेत् । अवभृथे अपां तनूरिति विपरिणामः । पितृयज्ञे पितृवीतये इति विपरिणामः ॥ ६ ॥

[उलूखले हविषः प्रक्षेपोत्तरकाले हविष्कृदाह्वानकाले वाऽध्वर्युयजमानयोर्वाग्विसर्गः]

वाचं विसृजते ॥ ७ ॥

हविर्ग्रहणकाले गृहीतां वाचमिदानीमध्वर्युर्विसृजेत् ॥ ७ ॥

यजमानश्च ॥ ८ ॥

वाचं विसृजेत ॥ ८ ॥

हविष्कृता वा ॥ ९ ॥

हविष्कृन्मन्त्रेण वा वाग्विसर्गः कार्यः । एवं च हविष्कृदेहीति मन्त्रमुच्चारयन्नेव वाचं

---

१ ॐ शर्माऽसि ।१।१५।

२ ॐ अवधूतꣳ रक्षोऽवधूता अरातयः ।१।१४।

३ ॐ अदित्यास्त्वगसि प्रतित्वाऽदितिर्वेत्तु ।

४ ॐ अद्रिरसि वानस्पत्यः प्रति त्वाऽदित्यास्त्वग्वेत्तु ।१।१५।

५ ॐ ग्रावाऽसि पृथुबुध्नः प्रति त्वाऽदित्यास्त्वग्वेत्तु ।१।१५।

६ अत्र अद्रि-ग्रावशब्दौ उलूखलं स्तोतुं प्रयुज्येते । नहीदमश्ममयमुलूखलम् । वानस्पत्य इति विरोधात् । अत उपचारवृत्त्या अद्रि-ग्रावशब्दौ ।

७ ॐ अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि ।१।१५।

विसृजेत् इति अस्मिन्काले वाग्विसर्गो, हविष्कृदाह्वानकाले वा वाग्विसर्ग इति विकल्प इति-भावः ॥ ९ ॥

[नानाबीजेषु अन्त्यहविरावपनानन्तरं वाग्विसर्गः]

यत्र विकृतौ नानाबीजानि व्रीहयो यवाश्च । तत्र एकस्य हविषः कृष्णाजिनादानादि तुषविमोकान्तं कृत्वा अपरस्य तद् भवति । तत्राऽऽद्यस्य हविष उलूखले प्रक्षेपोत्तरकाले वाग्विसर्गोऽनुष्ठेयः ? उत अन्त्यस्य हविष आवपनकाले इति संशये सिद्धान्तयति—

नानाबीजेष्वन्त्ये, सामर्थ्यात् ॥ १० ॥

नानाबीजेष्वन्त्ये हविरावपनकाले वाग्विसर्गः कार्यो, नाद्य । कुतः ? सामर्थ्यात् । हविरावपनस्य यतवाक्त्वनियमसामर्थ्यात् । हविःप्रक्षेपोत्तरकाले वाग्विसर्जनविधान-सामर्थ्यादित्यर्थः । यदि आद्यस्य हविषः प्रक्षेपोत्तरकाले एव वाग्विसर्गः क्रियेत तदा द्वितीयस्य हविष उलूखलप्रक्षेपे यतवाक्त्वनियमो भज्येत । तस्मादन्त्ये वाग्विसर्ग इति भावः ॥१०॥

[मुसलमादाय हविष्येषु अवदधाति]

"बृहद्ग्रावे"ति[1] मुसलमादत्ते ॥ ११ ॥

"स इदमि"त्यवदधाति ॥ १२ ॥

स इदमिति[2] आत्तं मुसलमुलूखले स्थापयेत् । अयं मन्त्रो देवानामसीतिवत्पितृयज्ञे एकदेवत्यायां, द्विदेवत्यायां, स्त्रीदेवतायामिष्टौ च विपरिणम्यते ॥ १२ ॥

(अवघातं कुर्वताऽध्वर्युणा पत्न्याः अग्नीधो वा ऽऽह्वानम्)

"हविष्कृदेही"ति त्रिराह्वयति ॥ १३ ॥

अध्वर्युर्हविष्कण्डनं कुर्वन् हविष्कृदेहि[3] इति मन्त्रेण त्रिवारं हविष्कर्त्री पत्नीं, हविष्कर्तारमग्नीधं वाऽऽह्वयति । अध्वर्युस्त्रिवारं मन्त्रं पठेत्, कण्डनं च त्रिवारं कुर्यात् ॥ १३ ॥

[आह्वानानन्तरं पत्न्या अग्नीधा वाऽवघातः]

अतः पत्न्यवहन्त्यन्यो[4] वा ॥१४॥

आह्वानादूर्ध्वं पत्नी वा अग्नीद्वा व्रीहीनवहन्यात् ॥ १४ ॥

[अध्वर्यौ हविष्कृदाह्वानं कुर्वति अग्नीद् दृषदुपले समाहन्यात्]

आह्वयत्याहन्त्यन्यो दृषदुपले "कुक्कुटोऽसी"ति[5] त्रिः [6]शम्यया द्विर्द-षदꣳ० सकृदुपलाम् ॥ १५ ॥

---

१ ॐ बृहद्ग्रावाऽसि वानस्पत्यः ।१।१५।

२ ॐ स इदं देवेभ्यो हविः शमीष्व सुशमि शमीष्व ।१।१५।

३ ॐ हविष्कृदेहि हविष्कृदेहि हविष्कृदेहि ।१।१५।

४ अत्र अन्यशब्देन ऋत्विजां परिक्रीतत्वात्, सन्निकर्षात्, समाख्यानुग्रहाच्च अध्वर्य्वतिरिक्तोऽग्नीद्

४ अत्र अन्यशब्देन ऋत्विजां परिक्रीतत्वात्, सन्निकर्षात्, समाख्यानुग्रहाच्च अध्वर्य्वतिरिक्तोऽग्नीद् गृह्यते, न ब्रह्मा । तस्य वेदत्रयविहितकर्मसंबन्धेन समाख्यानुग्रहाभावात् । अग्नीधस्तु अध्वर्युसमाख्यानं युज्यते । "आश्विनमध्वर्यवो भक्षयन्ति" इति प्रकृत्य "त्रय आश्विनं भक्षयन्ति अध्वर्युः प्रतिप्रस्थाताऽऽग्नीध्रश्च" (श० ब्रा० ८।४।१।२५) इति श्रुतेः ।

५ ॐ कुक्कुटोऽसि मधुजिह्व इषमूर्जमावद त्वया वयꣳ० सङ्घातꣳ० सङ्घातं जष्म ।१।१६।

६ अत्र त्रिरित्यस्य कुक्कुटोऽसीत्यत्रान्वयो न हननक्रियाम् । तत्र तु द्विर्दृषदं सकृदुपलाम् इत्यनेनैव त्रित्वसिद्धेः । त्रिर्ग्रहणाभावे "एकद्रव्ये कर्मावृत्तौ" (का० श्रौ० १।७।८) इति न्यायेन सकृन्मन्त्रवचनं स्यात् । अतो मन्त्राभ्यासार्थं त्रिर्ग्रहणम् ।

पत्नीमग्नीधं वाऽध्वर्यावाह्वयति सति अन्योऽग्नीत् शम्यया करणभूतया दृषदुपले कुट्टयति । तत्र विशेषः । त्रिर्दृषदं सकृदुपलां शम्ययाऽऽहन्यात् । कुक्कुटोऽसीति मन्त्रस्तु त्रिः प्रयोज्यः । न तु "एकद्रव्ये कर्मावृत्तौ" (का० श्रौ० १।७।८) इति सकृन्मन्त्रवचनमिति भावः । अत्राहन्त्यन्य इति वचनादाहनने ऽग्नीधः कर्तृत्वं भवति, नतु विरोधात् । तेन पश्चादाग्र-ष्यापृते ऽध्वर्यौ अग्नीध एवावहननम् । आहननस्यादृष्टोपकारकत्वाद्यावदुक्तं निवृत्तिः ॥१५॥

[अग्नीच्छूर्पमादाय तस्मिन् हविरुद्वपेत्]

"वर्षवृद्धमसी"ति[1] शूर्पमादत्ते ॥ १६ ॥

अवहननकर्त्ता अग्नीत्, पत्नी वा ॥ १६ ॥

"प्रतित्वे"ति[2] हविरुद्वपति ॥ १७ ॥

अवहतं हविरुलूखलादादाय शूर्पे प्रक्षिपेत् ॥ १७ ॥

[अग्नीत् निष्पूय तण्डुलान् कणांश्च पृथक् करोति]

"परापूतमि"ति[3] निष्पुनाति ॥ १८ ॥

शूर्पचालनोत्थेन वायुना तुषान्पृथक्कृत्याधः पातयेदग्नीत् । विविक्तान् तुषान् अध्वर्यवे समर्पयेत् । ऊर्ध्वशूर्पेण निष्पवनम् ॥१८॥

अध्वर्युर्विवेकीकरणानन्तरं तुषान्निरस्येत्]

"अपहतमि"ति तुषान्निरस्यति ॥ १९ ॥

अपहतमिति[4] मन्त्रेण अग्नीधा समर्पितान् तुषानध्वर्युरुत्करे निरस्येत् । अस्य प्रतिपत्तित्वात्तुभावे निरसनस्याप्यभावः । इदं च तुषनिरसनं वायुर्व इति वक्ष्यमाणे विवेकीकरणे कृते ज्ञेयम् । विवेकीकरणं च तण्डुलानां कणानां च पृथक्करणम् । तुषेषु पृथग्भूतेषु तन्निरसनं युक्तं, सामर्थ्यात् । अतश्च पाठक्रमार्थक्रमयोर्विरोधे अर्थक्रमस्य बलीयस्त्वात् पूर्वं विवेकीकरणं, ततस्तुषनिरसनमिति क्रमोऽवसेयः ॥ १९ ॥

"वायुर्व"[5] इति विविनक्ति ॥ २० ॥

तण्डुलान् कणांश्च वितुषीकरणाय पृथक्करोति अग्नीत् । तिर्यक्शूर्पेण विवेचनम् । अवघातश्च कृष्णाजिनादानादितुषविमोकान्तः । नानाबीजेष्ट्यां हविरावपन-मुसलयोजन-हविरुद्वपन-निष्पवन-विवेकीकरणानि भेदेन मन्त्रवन्ति कार्याणि । शेषं तन्त्रेण ॥ २० ॥

[पात्र्यां हविष्यान् कृत्वा मन्त्रं पठन्ननामिकया स्पृशेत्]

"देवो व"[6] इति पात्र्यामोप्याभिमन्त्रयते ॥ २१ ॥

तण्डुलान् तूष्णीमिडापात्र्यां शूर्पेण प्रक्षिप्य देवो व इति अनामिकाग्रेण स्पृशन्नभिमन्त्रयेताध्वर्युः । नानाबीजेष्ट्यां तन्त्रेणाऽभिमन्त्रणम् । आभिमुख्येन मन्त्रपाठोऽभिमन्त्रणम् ॥२१॥

---

१ ॐ वर्षवृद्धमसि ।१।१६।

२ ॐ प्रति त्वा वर्षवृद्धं वेत्तु ।१।१६।

३ ॐ परापूतꣳ रक्षः परापूता अरातयः ।१।१६।

४ ॐ अपहतꣳ रक्षः १।१७।

५ ॐ वायुर्वो विविनक्तु ।१।१६।

६ ॐ देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना ।१।१६।

[त्रिः फलीकरणम्]

त्रिःफलीकरोति, "देवेभ्यः शुन्धध्वं देवेभ्यः शुन्धध्व"मित्येके ॥२२॥

उलूखले हविष्करणं, कण्डन, मुद्गापो, निष्पवनं, विवेचनं, कणनिष्काशनमिति फलीकरणम्। तच्च वारत्रयं कार्यम्। अर्थात् यदवहननादि एकवारं मन्त्रैरनुष्ठितं तदेव वारद्वयं पुनस्तूष्णीमावर्त्तनीयम्। तद्यथा—तूष्णीं त्रिः कण्डनम् शूर्पादानं, हविरुद्वपनं, निष्पवनम्, विवेकीकरणं, कणनिधानम् इति।

एके आचार्याः "देवेभ्यः शुन्धध्वम्" इत्यावृत्तेन मन्त्रेण कण्डनमिच्छन्ति। अन्यत् शूर्पादानादिकं तु सर्वं तूष्णीमिच्छन्ति। तत्र कण्डनत्रये देवेभ्यः शुन्धध्वमिति मन्त्रस्यावृत्तिः कार्या, न तु "एकद्रव्ये कर्मावृत्ता"विति (का० श्रौ० १।७।८) न्यायोऽत्र प्रवर्त्तते। एतन्न्याय-बाधनार्थमेव देवेभ्य इति वीप्साकरणम्। पितृयज्ञे पितृभ्यः शुन्धध्वमिति विपरिणामः ॥२२॥

[फलीकृत्य फलीकृत्य कणनिधानम्]

फलीकृत्य कणान्निदधाति ॥ २३ ॥

फलीकृत्य फलीकृत्य प्रतिफलीकरणं कुत्रचित्पात्रे कणनिधानं कार्यम् ॥ २३ ॥

[अध्वर्य्वग्नीधोर्युगपत्पेषणोपधानानुष्ठानम्]

पेषणोपधाने युगपत् ॥२४॥

तण्डुलानां पेषणं, कपालानामुपधानं च एकस्मिन्नेव काले सहैवानुष्ठेयम्। तत्रान्त-रङ्गत्वात्पेषणमध्वर्युः,[1] बहिरङ्गत्वाच्चोपधानमग्नीत् कुर्यात् ॥ २४ ॥

[उपवेषाख्यं काष्ठमादाय तेन गार्हपत्याङ्गारान् प्राच्यां प्रेरयेत्]

कपालोपधानमुपदिशति—

"धृष्टिरसी"त्युपवेषमादाय "ऽपाग्न" इत्यङ्गारानप्राचः करोति ॥ २५ ॥

अङ्गारापोहमसमर्थं हस्ताकृतिकाष्ठमुपवेषः। तच्च धृष्टिरिति[2] मन्त्रेणाऽऽदाय तेन गार्हपत्यखरस्थान् अपरभागीयानङ्गारान् खरस्य पूर्वभागे अपाग्न[3] इति प्रेरयेत्। खर-स्यापरार्द्धे कपालोपधानविधानात् अपरार्द्धरिक्तीकरणायैतदङ्गारापोहनम्। तेन चर्विष्टर्यां धानाभर्जने च नाङ्गारापोहनं, किन्तु अपरार्द्धे अङ्गारेष्वेव चर्वादीनामधिश्रयणम् ॥ २५ ॥

आदावष्टाकपालोपधानक्रममाह—

[गार्हपत्यस्य दक्षिणभागेऽङ्गारं निधाय कपालेनाऽवच्छादयेत्]

"आदेवयज"मित्यङ्गारमाहृत्य कपालेनावच्छादयति "ध्रुवमसीति" ॥२६॥

आदेवयजमिति[4] मन्त्रेण पूर्वस्यां दिशि अपोढानामङ्गाराणां मध्ये एकमङ्गारमुपवेषेण

---

१ अध्वर्योः पेषणकार्ये व्यापृतत्वात्। ततश्च यत्र विरोधो नास्ति यथा वरुणप्रघासेषु अध्वर्यो र्मेषकरणे, प्रतिप्रस्थातुश्च करम्भपात्र-मेषीकरणे, (का० श्रौ० ५।३।२।६) तत्रोभयोर्यथास्वं स्वयमेव कर्परोपधानं, नाग्नीधः।

२ ॐ धृष्टिरसि ।१।१७

३ ॐ अपाग्ने अग्निमामादं जहि निष्क्रव्यादꣳ० सेध ।१।१७।

४ ॐ आ देवयजं वह १।१७।

पुरोडाशश्रपणस्थाने आनीय स्थापयित्वा ध्रुवमसीति[1] मन्त्रेण तस्याङ्गारस्योपरि एकं कपालं[2] स्थापयेदग्नीत्। धानाभर्जने,[3] चरुस्थाल्यां च नैतद्भवति। पितृयज्ञे च आपितृयजं वहेत्यादि विपरिणामः पूर्ववद्बोध्यः ॥२६॥

अमुष्येति द्विषच्छब्दे ऽभिचरन् ॥२७॥

वैरिमरणानुकूलो व्यापारो ऽभिचारः। तं फलत्वेनाऽभिलपन् ध्रुवमसीति मन्त्रमध्ये वैरिवाचकस्य भ्रातृव्यशब्दस्य स्थाने षष्ठ्यन्तस्य शत्रुनाम्न उच्चारणं कार्यम्। अभिचाराभावे तु भ्रातृव्यस्य वधायेति यथोक्तमेव प्रयोगः ॥२७॥

अन्यत्रापि ॥२८॥

न केवलमत्रैव द्विषच्छब्दे शत्रुनामोच्चारणम्। किन्तु अन्यत्रापि "द्विषतो वधोऽसि" (१।२८) इत्यादौ यत्र यत्र द्विषच्छब्दः श्रूयते तत्र सर्वत्रापि द्विषच्छब्दमपनीय शत्रुनाम गृह्णीयादभिचरन् ॥२८॥

[वामाङ्गुलिस्पृष्टे कपाले ऽङ्गारनिधानम्]

सव्याङ्गुल्या ऽशून्ये ऽङ्गारं निदधा''त्यग्ने[4]ब्रह्मे''ति ॥२९॥

वामहस्तस्यानामिकाङ्गुल्या स्पृष्टे कपाले अङ्गारं निदध्यादग्नीत्। अङ्गारनिधानं च कपालसंस्कारकम्। अतः प्रतिकपालं तदावर्त्तनीयम्। मन्त्रोऽपि तदङ्गत्वादावर्त्तनीयः। धानाभर्जने (का० श्रौ० ५।८।१६) धानानामुपरि अङ्गारनिधानम्, अदृष्टार्थत्वात्। कपालस्थानापन्नत्वाभावात् न चरौ कपालधर्माणां प्रवृत्तिः ॥ २९ ॥

[मध्यमकपालात्पश्चाद् द्वितीयकपालोपधानं, तत्राङ्गारनिधानं च]

''धरुणमि''ति पश्चात् ॥ ३० ॥

धरुणमिति[5] मन्त्रेण मध्यमस्य कपालस्य पश्चात् द्वितीयं कपालं प्रथमोपहितेन कपालेन संश्लिष्टमुपदध्यात् ॥ ३० ॥

[मध्यकपालात्पूर्वस्यां, दक्षिणस्यां च क्रमेण तृतीय — चतुर्थयोः कपालयोरुपधानम्]

पुरस्ता''द्धर्त्रमि''ति ॥ ३१ ॥

अग्नीन्मध्यमस्य कपालस्य पुरस्ताद्[6] धर्त्रमिति तृतीयं कपालं संश्लिष्टमुपदध्यात् ॥३१॥

''विश्वाभ्य''[7] इति दक्षिणतः ॥ ३२ ॥

प्रथमकपालस्य दक्षिणभागे संश्लिष्टं चतुर्थं कपालमुपदध्यात् ॥ ३२ ॥

---

१ ॐ ध्रुवमसि पृथिवीं दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युप दधामि भ्रातृव्यस्य वधाय ।१।१७।

२ ''तं मध्यमेन कपालेनाभ्युपदधाति'' (श० ब्रा० १।१।५।६) इति वचनात् मध्यमस्य कपालस्यायं धर्मो न कपालमात्रस्येति ।

३ अभ्यूहनस्य कपालसन्तापनार्थत्वात् धानाभर्जनस्य (का० श्रौ० ५।८।१६) (कर्परस्य) नाह्नाभ्यूहनम्। प्रसिद्ध्यभावात्। अधस्ताद्धि तस्य तापनं प्रसिद्धम्।

४ ॐ अग्ने ब्रह्म गृभ्णीष्व ।१।१८।

५ ॐ धरुणमस्यन्तरिक्षं दृꣳह ब्रह्म० य ।१।१८।

६ ॐ धर्त्रमसि दिवं दृꣳह ब्रह्मव० य ।१।१८।

७ ॐ विश्वाभ्यस्त्वाशाभ्य उपदधामि ।१।१८।

[मध्यकपालस्य दक्षिणत उत्तरतश्च प्रदक्षिणक्रमेणोपदध्यात्]

समं विभज्य द्वे दक्षिणत, एवमुत्तरत "श्चितस्थे"ति ॥३३॥

अष्टसु कपालेषु चतुर्णामुपहितत्वात् अवशिष्टानि चत्वारि समं विभज्य द्वे दक्षिणतो, द्वे उत्तरतश्चितस्थेति[1] मन्त्रावृत्त्या प्रादक्षिण्येनोपदध्यात्। तत्र एकं चतुर्थात्पूर्वम्, अपरं चतुर्थादपरम्। तत उत्तरतः पश्चादेकं, ततः पूर्वं द्वितीयमिति ॥३३॥

तूष्णीं वा ॥३४॥

अथवा चतुर्भ्यो ऽधिकानि सर्वाणि कपालानि तूष्णीमेवोपधेयानि, न चितस्थेति मन्त्रेण ॥ ३४ ॥

[अग्नीषोमीये एकादशानां कपालानामुपधानमेवमेव]

अथैकादशकपालोपधानक्रममाह—

एवमेकादशाग्नीषोमीयस्य ॥ ३५ ॥

अग्नीषोमीयस्य पुरोडाशस्य एकादश कपालानि उक्तेनैव प्रकारेणोपधेयानि ॥३५॥

इयांस्तु विशेषः—

अधिकं दक्षिणतः ॥ ३६ ॥

अष्टाकपालोपधानवत् चतुर्णां कपालानामुपधानानन्तरमवशिष्टानां सप्तकपालानां समशो विभागे क्रियमाणे यदधिकं सप्तमं विभक्तुं न शक्यते तस्य दक्षिणत उपधानं कर्त्तव्यम्। तेन चतुर्णामुपधानानन्तरं चत्वारि दक्षिणे, त्रीण्युत्तरत उपधेयानि। एवमेकादश कपालान्युपधेयानीति भावः ॥३६॥

[उपहितानां कपालानामङ्गारैस्तापनम्]

"भृगूणामि"[2] त्यङ्गारैरभ्यूहति ॥३७॥

अङ्गारैः कपालान्याच्छादयेदग्नीत्। एककपाले तप्यस्व, द्विकपाले तप्येथामित्यूहः ॥३७॥

इति कातीयश्रौतसूत्रवृत्तौ द्वितीयाध्याये चतुर्थी कण्डिका ॥४॥

[पिष्टसंयवनार्थानामपां गार्हपत्ये ऽधिश्रयणम्]

उपसर्जनीरधिश्रयति ॥१॥

उपसर्जनीः पिष्टसंयवनार्था अपो ऽग्नीद्गार्हपत्ये ऽधिश्रयेत्। अत्र उपधानानन्तरं पेषणमविधाय उपसर्जन्यधिश्रयणं विदधत्सूत्रकारो ज्ञापयति उपसर्जन्यधिश्रयणस्य पेषणसमकालतैव यथा स्यादिति। तेन तदानीं पेषणेऽध्वर्योर्व्यापृतत्वादुपसर्जन्यधिश्रायणस्य आग्नीध्रकर्त्तृकत्वं प्राप्नोति। यत्र तु चर्विष्ट्यादौ पेषणं नास्ति तत्राध्वर्योर्व्यापारान्तराभावादुपसर्जन्यधिश्रयणमध्वर्युरेव कुर्यादिति ॥१॥

१ ॐ चितः स्थोर्ध्वचितः ।१।१८।

२ ॐ भृगूणामङ्गिरसां तपसा तप्यध्वम् ।१।१८।

पिष्टसंयवनार्था आपः

[पेषणार्थमपि कृष्णाजिनादि कार्यम्]

पेषणप्रकारमाह—

कृष्णाजिनमादत्ते, पूर्ववत्प्रतिकृष्णाजिनम् ॥२॥

अध्वर्युः फलीकरणानन्तरमेव कृष्णाजिनमादत्ते। कृष्णाजिनं प्रति पूर्ववत् अवहनन इव आदानं, अवधूननं, आस्तरणं, सञ्याशून्यकरणं चेत्येतेषां विधिर्भवति। तच्चैतत्पेषणार्थत्वा-दपेषणे न भवति ॥२॥

[कृष्णाजिने शिलानिधानम्]

तस्मिन्दृषदं "धिषणाऽसी"ति[1] ॥३॥

सञ्याशून्ये तस्मिन् कृष्णाजिने दृषदं स्थापयेदध्वर्युः ॥३॥

[शिलायाः पश्चादधस्तादुदगग्रां शम्यां प्रेरयेत्]

पश्चाच्छम्यामुपोहत्युदीचीं "दिव" इति ॥४॥

दिव[2] इति मन्त्रेण दृषदः पश्चाद्भागे उदगग्रां शम्यां द्वादशाङ्गुलां दृषदोऽधस्तात्प्र-वेशयेदध्वर्युः। तेन पश्चाद्भागे उच्चा अग्रतो निम्ना दृषद्भवति ॥४॥

[शिलायां शिलापुत्रकस्य निधानम्]

दृषद्युपलां "धिषणाऽसी"ति[3] ॥५॥

पेषणार्थं दृषद उपरि उपलां स्थापयेत् ॥५॥

[शिलायां तण्डुलावापपूर्वकं तेषां पेषणम्]

[4]"धान्यमसी"ति[5] तण्डुलानोप्य पिनष्टि "प्राणाय त्वे"ति[6] प्रतिमन्त्रम् ॥६॥

---

१ ॐ धिषणाऽसि पर्वती प्रति त्वाऽदित्यास्त्वग्वेत्तु ।१।१९।

२ ॐ दिव स्कम्भनीरसि ।१।१९।

३ ॐ धिषणाऽसि पार्वतेयी प्रति त्वा पर्वती वेत्तु १।१९।

४ अत्र धान्यशब्दो लक्षणया तण्डुलवाचकः। (तण्डुलशब्देन ओदनो यवाश्च गृह्यन्ते) अतो यवपेषणे-ऽपि मन्त्रोऽयं प्रवर्त्तते। एवम् अस्ति कश्चन सत्रविशेषः षट्त्रिंशत्संवत्सरसाध्यः शाक्त्यानामयनसंज्ञकः। तत्र प्रतिदिनं गृहपतिसंज्ञको यजमानो मृगयार्थं गच्छति। तत्र तेन ये हता मृगाः, तेषां मांसमानीय तेन सवनीयाः पुरोडाशाः सम्पादनीया इत्युक्तमापस्तंबसूत्रे—"संस्थिते ऽहनि गृहपतिर्मृगयां याति तत्र यान् मृगान् हन्ति तेषां तरसमयाः सवनीयाः पुरोडाशा भवन्ति" (आप० श्रौ० २३।११।१३) (का० श्रौ० २४।६।१९) इति। तत्र पुरोडाशप्रकृति-भूतानां मांसानां तण्डुलस्थानापन्नत्वात् पेषणमपि प्राप्नोति। तदङ्गत्वाच्च धान्यमसीति मन्त्रस्यापि प्राप्तौ सत्याम् धान्यपदं परित्यज्य तत्स्थाने तरसपदं प्रक्षेपणीयम्। प्रकृतौ यद्यपि धान्यशब्दः सतुषद्रव्यपरो लक्षणया तण्डुले प्रयुक्तस्तथापि विकृतौ न लाक्षणिकस्य मृगशब्दस्य प्रयोगः समुचितः। 'स्वाधीने शब्दप्रयोगे किमिति लाक्षणिकं प्रयुज्महे' (शब० भा० टुप्टी० ९।१।३) इति न्यायात्। अतो धान्यपदस्थाने तरसशब्दः प्रयोक्तव्यः।

वस्तुतस्तु पिष्टपिण्डरूपस्य पुरोडाशस्य मांसेन कर्त्तुमशक्यत्वात् तदर्थस्य पेषणस्य तत्र प्राप्तिरेव नास्तीति दूरे तदङ्गभूतमन्त्रप्रवृत्तिः। तथापि कृत्वा चिन्तेयम्। न्यायव्युत्पादनार्थमिदमित्युक्तं पूर्वमीमांसायां तृतीयाध्याये ऽष्टमपादे द्वात्रिंशे ऽधिकरणे। केचित्तु केवलेन मांसेन पुरोडाशकरणासंभवेऽपि तण्डुलमिश्रितेन पुरोडाशः सम्पादयितुं शक्यते। अतश्च तण्डुलमिश्रितस्य मांसस्य पुरोडाशार्थं पेषणं भवत्येव। तदर्थं च मन्त्रस्य प्राप्तिस्तत्र भवतीति तत्र पदान्तरप्रक्षेपरूप ऊहो ऽस्त्येवेति वदन्ति।

५ ॐ धान्यमसि धिनुहि देवान् १।२०।

६ ॐ प्राणाय त्वा पिनज्मि ।१।२०। ॐ उदानाय त्वा पिनज्मि ।१।२०।१७ ॐ व्यानाय त्वा पिनज्मि ।१।२०।

दृषद उपरि तण्डुलान्प्रक्षिप्य पिंष्यादध्वर्युः। देवम्, देवौ इति यथायथमूहो विकृतौ। पितृयज्ञे च पितॄनित्यूहः। पेषणमन्त्रेषु पिनष्मीत्यध्याहर्त्तव्यं, साकाङ्क्षत्वात् ॥६॥

[शिलायां पिष्टानि प्रक्षिप्य कृष्णाजिने प्रक्षिप्य ईक्षेत]

"दीर्घा"मिति[1] कृष्णाजिने प्रोहति ॥७॥

पिष्टानि हवींषि उपलया कृष्णाजिनोपरि पातयेदध्वर्युः। नानाबीजेषु कृष्णाजिनादानादि प्रोहणान्तमेकत्र कृत्वा ततोऽपरत्र कर्त्तव्यम् ॥७॥

"चक्षुषे त्वे"तीक्षते ॥८॥

ईक्षे इत्यध्याहृतेन चक्षुषे त्वा[2] इति मन्त्रेण पिष्टानि पश्येदध्वर्युः। चर्विष्ट्यां तण्डुलानामपीक्षणम् ॥८॥

[पिष्यमाणेषु तण्डुलेषु ब्रह्माऽऽज्यस्थाल्यामाज्यं निर्वपेत्]

पिष्यमाणेषु निर्वपत्यन्यो "महीना"मित्याज्यम् ॥९॥

तण्डुलेषु पिष्यमाणेषु अन्यो ब्रह्मा गृहीतवेदः पात्रान्तरादाज्यस्थाल्यामाज्यं क्षिपेत्। अत्र अन्यशब्देन परिक्रीतत्वादृत्विक्ष्वन्यतमोऽभिधेयः। तत्र अध्वर्य्वग्नीधोः पेषणादौ व्यापृतत्वात् ब्रह्मैवान्यशब्देनाभिधीयते ॥९॥

[सपवित्रायां पात्र्यां संयवनार्थं पिष्टावापः]

पात्र्या सपवित्रायां पिष्टान्यावपति "देवस्य [4]त्वे"ति ॥१०॥

अध्वर्युः प्रोक्षणीतः पवित्रे आदाय इडापात्र्यामुदगग्रे निधाय तदुपरि कृष्णाजिनस्थानि पिष्टानि कृष्णाजिनेनैव पातयेत्।

पात्र्यामावपनं संयवनार्थम्। अतश्चर्विष्ट्यां संयवनाभावात् तण्डुलानां न पात्र्यामावपनम्। सपवित्रता तु चरावपि प्रवर्त्तते, अदृष्टार्थत्वात् ॥१०॥

[अध्वर्युर्गार्हपत्यस्य पश्चादुपविशेत्]

श्रपणस्य पश्चादुपविशत्यन्तर्वेदि वा ॥ ११॥

सपवित्रां पात्रीमादाय गार्हपत्यस्य पश्चादुपविशति। अथवा वेदेः पश्चात्संलग्नः सपवित्रां पात्रीं वेदिमध्ये आसाद्योपविशेदध्वर्युः ॥ ११ ॥

(आग्नीध्रस्तप्ता अपः संयवनार्थमानयेत्)

उपसर्जनीरानयत्यन्यः ॥१२॥

आग्नीध्रस्तप्ता उपसर्जनीरुद्धास्य पात्रीस्थपिष्टानामुपरि निनयेत्। आनयतिरत्र निनयनार्थकः। तप्ते पयसि दध्यानयतीतिवत् ॥ १२ ॥

[अध्वर्युरानीता अपो मन्त्रेण गृहीत्वा पिष्टेषु मिश्रयेत्]

पवित्राभ्यां प्रतिगृह्णाति "समाप" इति ॥ १३ ॥

---

१ ॐ दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना ।१।२०।

२ ॐ चक्षुषे त्वा ईक्षे ।१।२०।

३ ॐ महीनां पयोऽसि ।१।२०।

४ ॐ देवस्य त्वा स० भ्याम्। संवपामि ।१।२०।

अग्नीधाऽऽनीयमानास्ता उपसर्जनीः समाप[1] इति मन्त्रान्तेऽध्वर्युः पवित्राभ्यां प्रतिगृह्णीयात् । उपसर्जन्यानयनं चरावपि भवति । उदककार्यस्य विद्यमानत्वात् । समाप इति मन्त्रो गृहमेधीयादौ (का० श्रौ० ५ ६।६-२५) सम्पय इति विपरिणम्यते । एवं दध्नि घृते च विपरिणामो बोध्यः ॥१३॥

संयौति "जनयत्यै त्वे"ति[2] ॥ १४ ॥

पिष्टान्यद्भिः सम्यक् श्रुतावदानेन मिश्रयति ॥ १४ ॥

[पिण्डद्वयं समं सम्पाद्य 'इदमग्नेः' 'इदमग्नीषोमयोः इत्यालभते]

समं विभज्यासंꣳहरिष्यन्नालभत' 'इदमग्ने'' 'रिदमग्नीषोमयो''रिति ॥१५॥

संयुतानि पिष्टानि द्वौ पिण्डौ कृत्वा तयोः पुनर्मिश्रणमकरिष्यन् क्रमेणैतौ पिण्डौ मन्त्रद्वयेनालभेत । आलम्भस्तु देवतानिर्देशरूपदृष्टप्रयोजनार्थः । तेन यत्र देवतानेकत्वं तत्रैव तत्तद्देवतानिर्देशार्थं विभागस्य आलम्भनस्य चावश्यकत्वम् । अतश्च यत्र एकैव देवता न तत्र विभागो, नापि देवतानिर्देशः । असंहरिष्यन्निति वचनाद्विभागानन्तरं यदा पुनर्मिश्रीकरणस्य प्रसङ्गो नापतेत्, तदानीमेवालम्भः कार्यो, न ततः पूर्वम् । एवं च चरौ नावघातानन्तरमेव विभागः कार्यः । तदा पुनः फलीकरणार्थं मिश्रणस्य कर्त्तव्यत्वापातात् । अतश्च पुरोडाशैः सह चरूणां विभागे अवघातादिफलीकरणान्तं कृत्वा अनन्तरमेव चरूणां निर्देशः । चरूणां परस्परं विभागे तु ईक्षणान्ते निर्देशः । पौष्णस्यावेक्षणान्ते, पुरोडाशानां संयवनान्ते निर्देशः ॥ १५ ॥

यथादेवतमन्यत् ॥१६॥

अन्यदैन्द्राग्नादिकं हविर्यथादेवतं नामोच्चारणेनाऽऽलभेत ॥ १६ ॥

[ब्रह्माऽऽज्यमधिश्रयेत्]

"इषे[3] त्वे"त्याज्यमधिश्रयत्यन्यः ॥ १७ ॥

अत्राधिश्रयामीत्यध्याहारः, साकाङ्क्षत्वात् । अन्यो ब्रह्मा । अध्वर्योः पुरोडाशाधिश्रयणे व्यापृतत्वात् । तेनाव्यापृतेऽध्वर्यौ अध्वर्युरेवाज्याधिश्रयणं विकृतौ ॥ १७ ॥

[पत्न्यां रजस्वलायामाहवनीयश्रापिण आहवनीये आज्याधिश्रयणम्]

अपत्नीकस्याऽऽहवनीये तच्छ्रापिणः ॥ १८ ॥

रजोदोष-प्रसवादिना असन्निहितपत्नीकस्य आहवनीये हविःश्रपणं कुर्वतो यजमानस्याहवनीये आज्याधिश्रयणं कार्यम् आहवनीयश्रापिणोऽपि सन्निहितायां पत्न्यां गार्हपत्ये एवाज्याधिश्रयणम् । अपत्नीकाऽविद्यमानपत्नीक इति इति तु नार्थः । तस्याधिकाराभावादिति कर्कः ॥ १८ ॥

[अध्वर्य्वग्नीधौ युगपद् आग्नेयाग्नीषोमीयौ पुरोडाशावधिश्रयेताम्]

"घर्मोऽसी"ति[4] पुरोडाशौ युगपत् ॥१९॥

---

१ ॐ समापऽ ओषधीभिः समोषधयो रसेन । सꣳ रेवतीर्जगतीभिः पृच्यन्ताꣳ सम्मधुमतीर्मधुमतीभिः पृच्यन्ताम् ।१।२१।

२ ॐ जनयत्यै त्वा संयौमि ।१।२२।

३ ॐ इषे त्वाऽधिश्रयामि ।१।२२।

४ ॐ घर्मोऽसि विश्वायुः ।१।२२।

तत्राध्वर्युराग्नेयमधिश्रयति । अग्नीषोमीयमग्नीत् । बह्वृहविष्कायामिष्टौ अन्यैरप्यधिश्रयणं कार्यम् ॥१९॥

[आग्नेयाग्नीषोमीयपुरोडाशयोरध्वर्य्वग्नीद्‌भ्यां प्रथनम्]

"उरु-प्रथा"[1] इति प्रथयति यावत्कपालमनतिपृथुम् ॥२०॥

अधिश्रितं पुरोडाशं यावत्परिमाणानि कपालानि तावत् पृथुं कुर्यात्, नातिविपुलम् । यावत्कपालमित्यनेनैवानतिपृथुत्वे सिद्धे पुनरनतिपृथुग्रहणं कपालानां श्रुत्युक्तं परिमाणं ज्ञापयितुम् । श्रुतौ हि "तन्न सत्रा पृथुं कुर्यादश्वशफमात्रं कुर्यादित्यु हैक आहुः" (श० १।२।२।६-१०) इत्युक्तम् । चरौ न प्रथनम् । यः पुरोडाशो येनाधिश्रितः तेनैव तस्य प्रथनं, वक्ष्यमाणमभिमर्शनं च कर्त्तव्यम् ॥२०॥

[तयोरेवाद्भिरभिमर्शनम्]

"अग्निष्ट"[2] इत्यद्भिरभिमृशति सकृत्, त्रिर्वा ॥२१॥

पुरोडाशं सोदकेन हस्तेन सर्वतः स्पृशेत् । चरौ नाभिमर्शनम् । अभिमर्शनानन्तरमनुक्तमपि पाण्यङ्गुलिप्रक्षालनं, पिष्टलेपापनयनं च "पाण्यङ्गुलिप्रक्षालनमाप्त्येभ्यो निनयति" (२।५।२६) "पिष्टलेपाञ्जुहोति" (३।८।१) इति सूत्राभ्यामग्रे प्रतिपत्तिविधानात्कर्त्तव्यम्, उत्पत्तिमन्तरा प्रतिपत्यसंभवात् ॥२१॥

[पुरोडाशमाज्यं च परितो ज्वलदङ्गारभ्रामणम्]

पर्यग्निकरो"त्यन्तरितꣳ रक्षोऽन्तरिता अरातय" इति सहाज्यम् ॥२२॥

आज्यसहितौ पुरोडाशौ उल्मुकेन पर्यग्निकुर्यात् । पुरोडाशसंयोगेन पर्यग्निकरणस्य विहितत्वात् पुरोडाशाज्यानि परित उल्मुकं भ्रामयेत् । सान्नाय्ये पर्यग्निकरणाभावः ॥२२॥

[पुरोडाशोपरि अग्निं दद्यात्]

देवस्त्वेति[3] श्रपणम् ॥२३॥

पुरोडाशस्य धानानां चोपरि अङ्गाराग्निदध्यात् । चरुपात्रस्य तु अधस्तादङ्गारनिधानम् ॥२३॥

[शृताशृतज्ञानार्थमालभते पुरोडाशौ]

"मा भे"रित्यालभते[4] ॥२४॥

मा भेरिति मन्त्रावृत्या पुरोडाशावालभेत । अभिमर्शनस्य शृताशृतज्ञानार्थत्वाच्चरावपि प्रवृत्तिः, न धानासु । तत्र दर्शनात्पाकज्ञानसंभवात् ॥२४॥

[शृतौ पुरोडाशौ भस्मना ऽऽच्छादयेत्]

"अतमेरु"रिति[5] शृतावभिवासयति भस्मना वेदेनोपवेषेण वा ॥२५॥

शृतौ पुरोडाशौ अतमेरुरिति मन्त्रावृत्या वेदेन उपवेषेण वा भस्म गृहीत्वा तेन भस्मना ऽऽच्छादयेत् । चरौ न भस्मनाऽभिवासनं, विरोधात् ॥२५॥

---

१ ॐ उरु-प्रथा उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम् ।१।२२।

२ ॐ अग्निष्टे त्वचं मा हिꣳसीत् ।१।२२।

३ ॐ देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाके ।१।२२।

४ ॐ मा भेर्मा संविक्थाः ।१।२३ ।

५ ॐ अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात् ।१।२३।

[पात्र्यङ्गुलिप्रक्षालनजलमाप्त्येभ्यो निनयेत्]

पात्र्यङ्गुलिप्रक्षालनमाप्त्येभ्यो निनयत्यभितप्य प्रत्यगसंस्यन्दमानं "त्रिताय त्वे"ति प्रतिमन्त्रम् ॥ २६ ॥

पिष्टलिप्तपात्रीप्रक्षालनजलं पिष्टलिप्ताङ्गुलिप्रक्षालनजलं च पात्रीस्थमेव गार्हपत्यादाहृतेनोल्मुकेन तापयित्वा पूर्वत आरभ्य प्रत्येक्संस्थमुत्करसमीपे भूमौ परस्परमसंलग्नमाप्त्येभ्यस्तिसृभ्यो देवताभ्यो निनयेदध्वर्युस्त्रिताय त्वेति[1] प्रतिमन्त्रम् । आप्त्यानां देवतात्वात्तदुद्देशेन त्यागश्च कार्यः । अत्र त्रिष्वपि मन्त्रेषु निनयामीत्यध्याहारः ॥ २६ ॥

[अन्वाहार्यमोदनं दक्षिणाग्नावधिश्रयेत्]

अन्वाहार्यं दक्षिणाग्नावधिश्रयति ॥ २७ ॥

अन्वाहार्य इति दर्शपूर्णमासयोर्दक्षिणार्थस्यौदनस्य संज्ञा । अन्वाहार्यसंज्ञकं दक्षिणार्थमोदनं चतुर्णामृत्विजां तृप्तिक्षमं दक्षिणाग्नावधिश्रयेदध्वर्युः । अयं च प्रणीतेन लौकिकेन वोदकेन पच्यते । प्राशित्रप्रहरणपात्रप्रक्षालनं, अध्वर्युपाण्योरवनेजनं च प्रणीतेनोदकेनैव कर्त्तव्यं, तस्य सर्वार्थत्वात् ॥ २७ ॥

अत्र वा व्रतोपायनम् ॥ २८ ॥

इति कात्यायनश्रौतसूत्रवृत्तौ द्वितीयाध्याये पञ्चमी कण्डिका ॥ ५ ॥

[वेदिखननप्रकारः]

अपरेणाऽऽहवनीयं वेदिं खनति[2] त्र्यङ्गुलखातां, व्याममात्रीं पश्चात्, त्र्यरत्निं प्राचीमपरिमितां वा, प्राक्प्रवणामुदग्वा, मध्यसङ्गृहीता, मग्निमभितोंऽसौ ॥ १ ॥

अरत्निमात्रं चतुरस्रमाहवनीयखरं द्वादशाङ्गुलोच्च—चतुरङ्गुलविस्तीर्णमेखलं पूर्वस्यां निर्माय तत्पश्चिमतः त्र्यङ्गुलखातां, अरत्नित्रयप्रमाणेन पूर्वापरायतां, पश्चिमभागे चतुर्भिररत्निभिर्दक्षिणोत्तरायतां, पूर्वभागे अरत्नित्रयप्रमाणेन दक्षिणोत्तरायतां, (त्रयः पुरस्तात् (५।३।१२) इत्यग्रे वक्ष्यमाणत्वात्) विषमचतुरस्राम्, अथवा उक्तप्रमाणव्यतिरेकेण यजमानकल्पितप्रमाणाम्[3], पूर्वभागे उत्तरभागे वा किञ्चिन्निम्नां, "अखातौ सङ्ग्रहौ मतौ" इति परिशिष्टवचनात्

---

१ ॐ त्रिताय त्वा निनयामि १।२३। ॐ द्विताय त्वा निनयामि १।२३। ॐ एकताय त्वा निनयामि १।२३

२ खनतिरत्र करोत्यर्थः । अग्रे (का० श्रौ० २।६।२२) खननस्य पृथग्विधानात् ।

३ यद्यपि अन्यत्र अपरिमितशब्दः पूर्वोक्तप्रमाणापेक्षया अधिकप्रमाणे रूढः । तथापि अत्र नञ् समासेन विग्रहीतव्यः, न परिमिता अपरिमिता इति । कुतः । "नात्र मात्रास्ति यावतीमेव स्वयं मनसा मन्येत तावतीं कुर्यात्" (श० १।२।३।१४) इति श्रुतेः । एवम् "अपरिमितेष्टको वा" इत्यत्रापि तथैव । "अपरिमितेष्टको वा" इत्युपक्रम्य "न वै मे सर्वाणि रूपाण्युपधत्ताति वैव रेचयथ न वा ऽभ्यापयथ" (श० ब्रा० १०।४।३।६) इति अनवाप्तिरपरिमाणपक्षे एवोपपद्यते । अन्यथा व्यतिरेक एव स्यात् । एवं च श्रौते एतत्स्थलद्वये एव अपरितशब्दे नञ्समासः । अन्यत्र "द्वादश दीक्षा अपरिमिता वा" (का० श्रौ० ७।१।२४) इत्यादौ "अपरिमितं प्रमाणाद् भूयः" (का० शु० प० १।२३) इति वचनबलात् उक्तप्रमाणादधिके ऽर्थे अपरिमितशब्दो रूढ इत्यवगन्तव्यम् ।

मध्ये अखातसङ्ग्रहवतीं वेदिं कुर्यादध्वर्युः। अग्निमभितोऽंसौ च कुर्यात्। आग्नेयैशकोणौ वंसौ (आप. श्रौ० २।३।१)। अर्थात् आहवनीयखरस्य दक्षिणभागे उत्तरभागे च वेदिमभिव्याप्य यौ भूप्रदेशौ तावंसौ, तयोरपि वेदिशब्दवाच्यत्वात्तत्रापि त्र्यङ्गुलं खातं विधाय तावपि वेद्यां संयोज्याविति भावः।

सङ्ग्रहशब्देन यजतिस्थानं जुहोतिस्थानं चोच्यते। सङ्ग्रहौ च दक्षिणे उत्तरे च नैर्ऋत्य-वायव्यकोणयोः दशाङ्गुलमितां भूमिं परित्यज्य एकोनविंशत्यङ्गुलकर्काटकभ्रामणेनार्द्धवृत्तेन सम्पादनीयौ। तौ चाखातौ भवत इत्युक्तम्। उभयत्र दशाङ्गुलमिता अवशिष्टा भूमिः श्रोणिशब्दवाच्या (आप. श्रौ० २।३।१)भवति[1] ॥ १ ॥

खनने प्रकारान्तरमाह—



---

१ गार्हपत्यमध्यादाहवनीयस्य मध्यपर्यन्तं मध्ये ऽन्तरमष्टौ, एकादश, द्वादश वा पदानि। गार्हपत्यमध्यत्वेन कल्पितं स्थानं केन्द्रं परिकल्प्य सार्द्धत्रयोदशाङ्गुलमितरज्ज्वा वृत्तं कार्यम्। इदं गार्हपत्याग्नेः स्थानम्। आहवनीयस्थानमायामतो विस्तारतश्च हस्तमितम्। गार्हपत्याहवनीयान्तरस्य द्वादशपदपरिमितत्वपक्षे तदन्तरस्य षड्ढस्तात्मकत्वात् षड्ढस्तां रज्जुं तदीयषष्ठभागेन हस्तात्मकेन संयोज्य, अर्थात् सप्तहस्तां रज्जुं गृहीत्वा तस्या अन्तयोः पाशौ कृत्वा, मध्ये च तृतीये तृतीये भागे चिन्हं कृत्वा एकं पाशं गार्हपत्यमध्यशङ्कौ आसज्य

आमूलोच्छेदनादोषधीनाम् ॥२॥

यस्मिन् देशे वेदिः परिमीयते तत्र रूढानामोषधीनां मूलं यावता खननेन उच्छिद्येत तावत् खातव्यम् । अयं पक्षः पूर्वोक्तेन त्र्यङ्गुलखातेन विकल्प्यते । त्र्यङ्गुलखात-मूलोच्छेदनयोः समुच्चयासंभवात् । अतश्च अनुक्तो ऽपि विकल्पः सामर्थ्यादाश्रयणीय एव । न च दर्शपूर्णमासयोर्वेद्यां मूलानामभावात् तदुच्छेदनस्य सुतरामसम्भव इति वाच्यम् । ओषधिमूलोत्पाटने यावत्परिमाणं खननमुचितं भवेत्, तावत्खननमित्यर्थस्यात्र विवक्षितत्वात् ॥ २ ॥

ओषधीनां मूलान्युच्छेत्तवै ब्रूयात् ॥ ३ ॥

ओषधिमूलोच्छेदनखातपक्षे 'ओषधीनां मूलान्युच्छेत्तवै' इति प्रैषमध्वर्युं प्रति आग्नीध्रो ब्रूयात् ॥ ३ ॥

[पशुकामस्य पुरीषान्तराहरणम्]

आहार्यपुरीषां पशुकामस्य ॥ ४ ॥

पशुकामस्य यजमानस्य वेदिमाहार्यपुरीषां कुर्यात् । अर्थात् वेदिपुरीषमपनीय अन्यत्पुरीषं तत्र प्रक्षिपेत् । पुरीषं खाता मृत् ॥ ४ ॥

[अग्नीद्वेदिं परिसमुह्य वेदेः पूर्ववितृतीये उत्करं कुर्यात्]

वेदिं परिसमुह्य वितृतीये ऽग्नीदुत्तरत उत्करं करोति ॥ ५ ॥

अग्नीद् वेदिं कुशैः परिसमुह्य आहवनीयादुत्तरतः पूर्ववितृतीये[२] देशे सङ्ग्रहे त्र्यङ्गुलवृत्तं षडङ्गुलविस्तारमेकाङ्गुलगर्त्तमुत्करं पांस्वादिप्रक्षेपस्थानं कुर्यात् ॥५॥

(वामहस्तस्थितं सतृणं स्फ्यं दक्षिणेनालभ्य इन्द्रस्येत्यादि अग्नीजपेत्)

"देवस्य त्वे"ति स्फ्यमादाय सतृणꣳ सव्ये कृत्वा दक्षिणेनालभ्य जपती"न्द्रस्य बाहु"रिति ॥ ६ ॥

द्वितीयपाशमाहवनीयमध्यशङ्कौ आसञ्जयेत् । रज्जुमध्यवर्त्तिनोर्द्वयोश्चिन्हयोः पश्चिमचिह्नस्थाने रज्जुं गृहीत्वा दक्षिणत आकर्षयेत्, यत्र तच्चिन्हं पतति तत्र तच्चिह्नं कृत्वा तस्मात्स्थानात् उत्तरतः सार्द्धनवाङ्गुलव्यवहिते देशे शङ्कुर्देयः । शङ्कुस्थानं केन्द्रत्वेन परिकल्प्य यवाधिकोनविंशत्यङ्गुलमितरज्ज्वा वृत्तं कार्यम् । वृत्तमध्ये केन्द्रसंलग्ना परिधिपूर्वभागमादाय परिधिपश्चिमं यावत् सरलरेखा कार्या । रेखात उत्तरभागस्य त्यागः कार्यः । वृत्तस्य दक्षिणार्धं दक्षिणाग्निस्थानम् । पूर्वोक्तयोश्चिन्हयोः पूर्वचिन्हस्थाने रज्जुं गृहीत्वा उत्तरत आकर्पणे यत्र चिह्नं पतति तदुत्करस्थानम् । आहवनीयमध्यशङ्कुसकाशात् पश्चिमतस्त्र्यरत्निव्यवहिते देशे शङ्कुर्देयः । आहवनीयप्राचीशङ्कुसकाशात् सार्द्धारत्निव्यवहिते देशे दक्षिणत उत्तरतश्च शङ्कुर्देयः । चतुर्षु कोणस्थशङ्कुषु सूत्रार्पणाद् विषमचतुरस्रं भवति । प्राचीशङ्कुमारभ्य पश्चिमशङ्कुपर्यन्तं कोणद्वयवेष्टनेन सूत्रं प्रदेयम् । तत्सूत्रार्धपरिमितेन सूत्रेण प्राचीशङ्कुमारभ्य दक्षिणकोणस्थशङ्कुवेष्टनेन दक्षिणतः, उत्तरकोणस्थशङ्कुवेष्टनेन उत्तरतश्च शङ्कुर्देयः । ताभ्यां शङ्कुभ्यां पूर्वोक्तसूत्रार्द्धचतुर्थांशेन वेदिमध्ये सङ्ग्रहौ कार्यौ । द्वादशाङ्गुलं पदम् । अष्टयवमङ्गुलम् । चतुर्विंशत्यङ्गुलो हस्तः । इति वेद्यादिसाधनप्रकारः (का० शु० प० १।२६-३०) ।

२ वितृतीये इत्यस्यायमर्थः । गार्हपत्याहवनीयान्तरस्य द्वादशपदपरिमितत्वपक्षे तदन्तरस्य षड्ढस्तात्मकत्वात् षड्ढस्तां रज्जुं तदीयषष्ठभागेन हस्तात्मकेन संयोज्य अर्थात् सप्तहस्तां रज्जुं गृहीत्वा तस्या अन्तयोः पाशौ कृत्वा मध्ये च तृतीये तृतीये भागे चिन्हं कृत्वा एकं पाशं गार्हपत्यमध्यशङ्कौ आसज्य द्वितीयपाशमाहवनीयमध्यशङ्कौ आसञ्जयेत् । रज्जुमध्यवर्तिनोर्द्वयोश्चिन्हयोः पूर्वस्थाने रज्जुं गृहीत्वा उत्तरत आकर्पणे यत्र चिन्हं भवति स वितृतीयो देशः, तदुत्करस्थानम् (का० शु० प० १।३०) इति ।

देवस्य[1] त्वेति मन्त्रेण सतृणं स्फ्यमादाय तं वामहस्ते निधाय वामहस्तस्थमेव सतृणं स्फ्यं दक्षिणेन स्पृष्ट्वा इन्द्रस्येति[2] जपेत्। पितृयज्ञे देवपितृभ्य इति विपरिणामः। एतत्स्फ्यादानं, जपश्च स्तंबयजुर्हरणार्थत्वात्तदभावे न भवति। प्रहरणादिपुरीषनिवपनान्तं वक्ष्यमाणं कर्म स्तंबयजुर्हरणशब्देनोच्यते ॥ ६ ॥

[स्तंबयजुर्हरणात्प्राक् वज्रेण पृथिवीमात्मानं च न स्पृशेत्]

नोपस्पृशेत्पृथिव्यात्मानौ तेन स्तंबयजुर्हरिष्यन् ॥ ७ ॥

स्तंबयजुर्हरणं करिष्यन्नध्वर्युस्तेन वज्रेण पृथिवीमात्मानं च नोपस्पृशेत् ॥ ७ ॥

[वेद्यामुदगग्रं तृणं निदध्यात्]

स्तंबयजुर्हरणप्रकारमाह—

वेद्यां तृणं निदधात्युदक् 'पृथिव्यै वर्मासी'ति ॥८॥

वेदिरिति भावि संज्ञामादाय। यस्मिन्देशे वेदिः निर्मापयिष्यते तस्मिन्देशे वेद्याम-ध्वर्युरुदगग्रं तृणं स्फ्येन सहगृहीतं निदध्यात् ॥ ८ ॥

[निहिते तृणे प्रहरेद्वज्रेण]

"पृथिवि देव-यजनी"ति[3] तृणे ऽन्तर्हिते प्रहरति ॥ ९ ॥

तृणेनान्तर्हितायां भूमौ वज्रेण (आप० श्रौ० २।१।५) प्रहारं कुर्यात्। तृणे एव प्रहरण-मिति सम्प्रदायः ॥ ९ ॥

[वज्रोद्धृतपुरीषादानम्]

"व्रजं गच्छे"ति[4] पुरीषमादत्ते ॥ १० ॥

वज्रेणोद्धृतां मृदं गृह्णीयात् ॥ १० ॥

[वेदिं प्रेक्ष्य आत्तं पुरीषमुत्करे प्रक्षिपेत्]

"वर्षतु त"[5] इति वेदिं प्रेक्षते ॥ ११ ॥

"बधाने"त्युत्करे[6] करोति ॥ १२ ॥

गृहीतां मृदमुत्करे क्षिपेत् ॥ १२ ॥

प्रहरणशेषो वाऽविशेषोपदेशात् ॥१३॥

प्रहरणशब्देन प्रहरणाङ्गभूतो मन्त्र उच्यते। स च पृथिवि देव—यजनीत्यादिः। तस्यैव व्रजं गच्छेत्यादि मन्त्रत्रयमपि शेषभूतमित्यर्थः। कुतः? अविशेषात्, वाजसनेयिशाखायां शतपथब्राह्मणे (१।२।२।१६) प्रहरणे एव अविशेषेणोपदेशात्। अयं भावः। पृथिवि देवयजनी

---

१ ओं देवस्य त्वा स० म्। आददेऽध्वरकृतं देवेभ्यः १।२४।

२ ओं इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजा द्विषतो वधः १।२४।

३ ओं पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳसिषम् ।१।२५।

४ ओं व्रजं गच्छ गोष्ठानम् १।२५।

५ ओं वर्षतु ते द्यौः १।२५।

६ ओं बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् १।२५।

त्यत्र मन्त्रचतुष्टयमस्ति । तत्र प्रथममन्त्रः प्रहरणे, द्वितीयः पुरीषाऽऽदाने, तृतीयो वेदिप्रेक्षणे, चतुर्थ उत्करे पांसुनयने विनियुक्तः । अस्मिन्पक्षे सर्वोऽपि पृथिवि देवयजनीत्यारभ्य मा मौगित्यन्तो मन्त्रः एकस्मिन्नेव प्रहरणे विनियुज्यते । तथैव शतपथे अविशेषेणोपदेशात् । पुरीषादानादिकं तु तूष्णीमेव कार्यम् ।

वस्तुतस्तु स्वशाखायामविशेषोपदेशेऽपि शाखान्तरे (तै० ब्रा० ३।२।९।) विशेषोपदेशसत्वात् विशेषे प्रवृत्तेरुचितत्वात् "सामान्यविधिरस्पृष्टः संह्रियेत विशेषतः" (तन्त्रवा० ३।४।४७) इति न्यायेन अवयवश एव मन्त्रस्य विशेषे विनियोगः ॥१३॥

[प्रहरणादि उत्करे पुरीषप्रक्षेपान्तं द्वितीयवारं कर्त्तव्यम्]

"अपाररु"मिनि[1] द्वितीयं प्रहरणादि ॥ १४ ॥

प्रहरणमारभ्य उत्करे करोतीत्यन्तं पुनः पूर्ववत्कुर्यात् । पितृयज्ञे देवपितृयजनाद्वध्यासमिति प्रयोगः ॥ १४ ॥

[अग्नीदुत्करं हस्तद्वयेनाभिन्यसेत्]

अभिन्यस्यत्यग्नीदुत्कर"मररो दिव"मिति[2] ॥ १५ ॥

अग्नीत् हस्तद्वयेन उत्करमभिमृशेत् ॥ १५ ॥

[प्रहरणादि पूर्वोक्तं तृतीयवारं कार्यम्]

"द्रप्सस्त" इति[3] तृतीयम् ॥ १६ ॥

तृतीयवारं प्रहरणादि उत्करकरणान्तं कार्यम् ॥ १६ ॥

[सतृणं पुरीषं चतुर्थवारं तूष्णीमुत्करे प्रक्षिपेत्]

तूष्णीं चतुर्थꣳ सतृणम् ॥ १७ ॥

चतुर्थवारं प्रहरणाद्युत्करकरणान्तं सर्वं कर्म तूष्णीं कुर्यात् । पुरीषं च तृणेन सहैव चतुर्थवारं क्षिपेत् ॥ १७ ॥

[वेदेर्दक्षिणतः पश्चादुत्तरतश्चाध्वर्युः स्फ्येन परिग्रहं कुर्यात्]

पूर्वं परिग्रहं परिगृह्णाति दक्षिणतः, पश्चादुत्तरतश्च स्फ्येन "गायत्रेणे"ति[4] प्रतिमन्त्रम् ॥ १८ ॥

वेदेरियत्तां निश्चेतुं दक्षिणादिदिक्त्रये स्फ्येन रेखाकरणं पूर्वः परिग्रहः (आप. श्रौ. २।३।७) । तं कुर्यादध्वर्युः ॥ १८ ॥

[अध्वर्युर्वेद्यां त्रिरुल्लिख्य 'हर त्रिः' इति प्रैषमन्त्रं पठेत्]

वेद्यां त्रिरुल्लिख्याऽऽह "हर त्रि"रिति ॥ १९ ॥

अध्वर्युर्वेद्यां प्रागायतास्तिस्रो रेखाः स्फ्येन कृत्वा 'हर त्रिः' इति प्रैषमग्नीधं प्रति ब्रूयात् । हर त्रिरिति त्रिशब्दघटित एव मन्त्रो विवक्षितः शतश्च वरुणप्रघासेषु यत्र वेदि-त्रि

1 ॐ अपाररुं पृथिव्यै देवयजनाद्वध्यासम् १।२६।
2 ॐ अररो दिवं मा पप्तः १।२६
3 ॐ द्रप्सस्ते द्यां मा स्कन् १।२६।
4 ॐ गायत्रेण त्वा च्छन्दसा परिगृह्णामि १।२७ ॐ त्रैष्टुभेन त्वा च्छन्दसा प० १।२७।
ॐ जागतेन त्वा च्छ० १।२७।

एवं तत्र त्रिशब्दमविपरिणमय्यैव 'हर त्रिस्त्रिः' इति मन्त्रः पठनीयो, न तु त्रिशब्दस्थाने षट्कृत्व इत्यूहः ॥ १९ ॥

[यथोल्लिखिताभ्यो लेखाभ्यः पांसूनुद्धृत्याग्नील्लेखाः संमृशेत्]

हृत्वाऽग्नील्लेखाः संमृशति ॥ २० ॥

अग्नीत्ताभ्यो लेखाभ्यः पांसून् त्रिर्हृत्वा उत्करे प्रक्षिप्य लेखाः संमृशति संमर्शनेन समीकरोति जलं प्रक्षिप्य लेपयतीत्यर्थः ॥ २० ॥

पितृयज्ञाग्निचित्ययोर्वा, तत्र दर्शनात् ॥ २१ ॥

अथवा लेखाहरणं संमर्शनं च पितृयज्ञे अग्निचयने च कर्त्तव्यं, नात्र। कुतः? तत्रोभयत्रैव दर्शनात्, विधानादित्यर्थः। "लिखति, हरति यत् हार्यं भवति" (श० ब्रा० २।६।१।१२) इति पितृयज्ञे, "लिखित्वाऽऽह हर त्रिरिति, हरति त्रिराग्नीध्र" (श० ब्रा० ७।२।२।१) इति चयने च तयोर्विधानम्। कर्काचार्यास्तु यद्यपि लेखाहरण-संमर्शने श्रुतौ नात्र विहिते, तथापि विकृतौ तयोर्दर्शनात्प्रकृतौ तयोरुपदेशो ऽनुमीयते। अतः प्रकृतौ ते भवत एवेत्याहुः ॥२१॥

[प्रकारद्वयेनोक्तं वेदिखननमधुना कार्यम्]

अत्र वेदिकरणं यथोक्तम् ॥ २२ ॥

प्रकारद्वयेनोपदिष्टं वेदिखननमस्मिन्काले कार्यम् ॥ २२ ॥

[पूर्ववद् वेदिखननं पुनः कुर्यात्]

उत्तरं परिग्रहं परिगृह्णाति "सुक्ष्मा" "स्योनो" "र्जस्वती" ति[1] प्रतिमन्त्रं पूर्ववत् ॥२३॥

वेदिकरणानन्तरं स्फ्येन पूर्ववद्दिक्त्रये रेखाकरणमुत्तरः परिग्रहः। तं कुर्यादध्वर्युः ॥२३॥

[वज्रेण वेदिं समीकुर्यात्]

"पुरा क्रूरस्ये" त्यनुमार्ष्टि[2] ॥ २४ ॥

वज्रेण वेदिं समीकुर्यादध्वर्युः पुरेति मन्त्रेण ॥ २४ ॥

[वेदेरुपरि प्रोक्षणीर्धारयेत्]

अध्यधिवेदि प्रोक्षणीर्धारयति ॥ २५ ॥

अध्वर्युर्वेदेरुपरि समीपे एव हस्तद्वयेन प्रोक्षणीर्धारयेत् ॥ २५ ॥

[धार्यमाणासु प्रोक्षणीषु अग्नीत् वज्रमुद्यम्य प्रोक्षणीरासादयेत्यादीन् सर्वान् प्रैषान् युगपत्पठेत्]

अग्नीदथ स्फ्यमुद्यम्याह—"प्रोक्षणीरासादय, इध्मं बर्हिरुपसादय, स्रुचः संमृड्ढि, पत्नीꣳ सन्नह्याज्येनोदेही" ति यदीच्छेत् ॥ २६ ॥

अग्नीदध्वर्युं प्रति प्रैषचतुष्टयं निरवसानं दद्यात्। यदीच्छेदित्यनेन प्रैषकरणस्य विकल्पः। प्रैषचतुष्टयस्य निरवसानतासिद्ध्यर्थं, प्रोक्षणीधारण—वज्रोद्यमनयोरेककालतासिद्ध्यर्थं च अत्राथशब्दग्रहणम्। इध्म-बर्हिःशब्दौ वरुणप्रघासेषु न विपरिणम्येते। जातिवाचित्वात्।

---

१ ॐ सुक्ष्मा चासिशिवा चासि १।२७ ॐ स्योना चासि सुषदा चासि १।२७। ॐ ऊर्जस्वती चासि पयस्वती च १।२७।

२ ॐ पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम्। यामैरयंश्चन्द्रमसि स्वधाभिस्तामु धीरासो अनुदिश्य यजन्ते १।२८।

गृहमेधीयादौ (का० श्रौ० ५।८।६-२५) स्रुगेकत्वे स्रुचं सम्मृड्ढीत्यादि विपरिणामः। वरुणप्रघासेषु प्रोक्षणीरासादयतमिति विपरिणामः। पत्नीबहुत्वेऽपि पत्नीशब्दस्य न विपरिणामः।

अत्र मन्त्रगत आज्यशब्दः आज्यजातिवाचकः। तेन अग्रे वरुणप्रघासादौ यत्र आज्यानेकत्वं तत्रापि आज्येनोदेहीत्येव मन्त्रः प्रयुज्यते, न तु द्विवचनान्तेन विपरिणम्यते ॥२६॥

[प्रैषार्थकर्तृत्वमग्नीध इति पूर्वपक्षः]

प्रैषेषु "प्रोक्षणीरासादय" (शु. य. १।२८) इत्यादिषु, तदर्थेषु च प्रोक्षण्यासादनादिषु उभयत्रापि अध्वर्युकर्त्तृकत्वे विरोधात् प्रैषमन्यः कुर्यात्, प्रैषार्थं चान्य इति प्राप्ते आह—

यथाप्रेषितमन्यः, पराऽधिकारात् ॥२७॥

अत्रान्यशब्दो ऽग्नीद्वाचकः। कुतः? प्रैषसामर्थ्यादेव अन्यकर्तृकत्वस्य सिद्धेः। अतोऽन्यः करोति अग्नीत्करोतीत्यर्थः। अस्य प्रैषस्य निकृष्टविषयत्वात् अग्नीधा च प्रैषानुष्ठाने, अध्वर्युणा प्रैषार्थकरणे निकृष्टप्रेषणरूपप्रैषत्वविरोधापत्त्या अध्वर्युः प्रेषयेत्। अग्नीच्च प्रैषार्थमनुतिष्ठेत् ॥ २७ ॥

[प्रैषार्थकर्तृत्वमध्वर्योरन्तरङ्गत्वादिति सिद्धान्तः]

एवं प्राप्त आह—

स्वयं वाऽविरोधात् ॥ २८ ॥

वाशब्दः पक्षं व्यावर्त्तयति। स्वयमेवाध्वर्युः प्रैषार्थं कुर्यात्। कुतः? विरोधाभावात्। प्रैषत्वे सति हि विरोधः स्यात्। नायं प्रैषः। किन्तु अध्येषणीयम्। अध्येषणा च उत्कृष्टविषया। एवं च निकृष्टेनाग्नीधा उत्कृष्टं प्रति अध्येषणायां कृतायामपि विरोधो नास्तीति कृत्वा प्रैषार्थानुष्ठाने अध्वर्युरेव कर्त्ता ॥ २८ ॥

हेत्वन्तरमाह—

सम्प्रैषावचनाच्च ॥ २९ ॥

यथा "अग्नीदग्नीन्विहर" (श० ब्रा० ४।२।५।११) इत्यादौ संप्रैषवचनमस्ति, न तथा प्रोक्षणीरासादयेत्यादौ। अत एतादृशेषु प्रैषेषु अध्वर्युः कर्त्ता। न च प्रैषस्य अध्वर्युकर्त्तृकत्वे प्रैषार्थस्य अग्नीत्कर्त्तृकत्वे उभयत्रापि साक्षात्परम्परया वा कर्तृत्वं संभवति। तेन आध्वर्यवसमाख्यापि अनुगृहीता भविष्यति। अतश्च प्रैषे अध्वर्युकर्तृकत्वमेव कुतो न स्यादिति वाच्यम्। एवं तर्हि प्रैषार्थेषु अध्वर्योः साक्षात्कर्त्तृत्वं न स्यात्। अन्यस्य साक्षात्कर्त्तुराग्नीध्रस्य तत्र सत्वात्। न च परम्परया कर्त्तृत्वसिद्धिरस्त्येवेति वाच्यम्। मुख्यकर्त्तृत्वस्यैवात्राभिप्रेतत्वात्। परम्पराकर्तृत्वं तु कर्त्तृत्वातिदेशरूपत्वात् गौणमेव भवतीति कृत्वा न समाख्यानुग्राहकं भवति तत्। अतः प्रैषे ऽग्नीत्, प्रैषार्थे चाध्वर्युः कर्त्तेत्येव समुचितम् ॥ २९ ॥

प्राक् स्तरणाद्वेदिं नाऽवमृशेत् ॥३०॥

वेद्यां बर्हिस्तरणात्प्राक् तस्याः स्पर्शो न कार्यः ॥३०॥

शृतानि च हवींष्यप्रचरणात् ॥३१॥

प्रधानयागावदानात्पूर्वं पक्वहविषां च स्पर्शो न कार्यः ॥३१॥

[काष्ठेन हस्तेन वा पुरोडाशमवद्यति]

अङ्गुष्ठाङ्गुलिभ्यां मांससंसृष्टाभ्यामवद्यन्त्येके ॥३२॥

मांससंबद्धाभ्याम् = अनखसंलग्नाभ्याम् अर्थात् काष्ठादिकं विना साक्षादेव अङ्गुष्ठाङ्गु-

लिभ्यां केचिदवदानं कुर्वन्ति । एके इत्यनेन पक्षान्तरमपि विहितं भवति । तथा चोक्तम् । "सामर्थ्यात्स्वधितिर्मांसे द्रवद्रव्ये स्रुवः स्मृतः । हस्तकाष्ठे पुरोडाशमवदातुं प्रकल्पिते" (जै० १।४।१६) इति ।

[स्तरणकाले तृणकाष्ठादेर्वेदितो निरसनम्]

आपन्नथं स्तृणन् निरस्येत् ॥३३॥

स्तृणन् स्तरणं कुर्वन्नध्वर्युः वेद्यां पतितं तृणकाष्ठादिकं निरस्येत् । वेद्यां पतितमपि तृणादिकं स्तरणकाले एव निरसनीयं, न ततः प्राक् इति भावः ॥३३॥

[स्फ्यमुदगग्रं प्रहरेत्]

"द्विषतो वध"[1] इति स्फ्यमुदञ्चं प्रहरति ॥३४॥

प्रैषार्थमुद्यतं वज्रमध्वर्युरुदगग्रमुत्करे क्षिपेत् ॥३४॥

[पाणी प्रक्षाल्य प्रणीतानामपरतः स्फ्यनिधानम्]

अवनिज्य पाणी, अपरेण प्रणीता स्फ्यं निदधाति ॥३५॥

अध्वर्युः हस्तौ प्राणीतेन जलेन प्रक्षाल्य प्रणीतानां पश्चिमत उदगग्रं स्फ्यमासादयेत् ॥३५॥

[प्रणीताऽऽहवनीयान्तरालेनाहृत्य प्रणीताताः पश्चात्पूर्वमिध्मं निधाय बर्हिर्निदध्यात्]

इध्मा-बर्हिश्च ॥३६॥

इध्मं बर्हिश्च प्रणीतानां पश्चादासादयति ॥३६॥

समासोक्त्योः क्रमापरिज्ञाने सत्याह—

पूर्वमिध्मम् ॥३७॥

आदौ इध्मं, ततो बर्हिरित्येवं क्रमेण उदक्संस्थं प्रागग्रमुभयमप्यासादयेत् ॥३७॥

प्रणीता दक्षिणेन वाऽऽहृत्य ॥३८॥

अथवा प्रणीतानां दक्षिणेन अर्थात् प्रणीतानामाहवनीयस्य चान्तरालेन प्रदक्षिणमिध्माबर्हिरानीय निदध्यात् ॥३८॥

[स्रुवस्य, स्रुचां, प्राशित्रहरणादीनां च प्रतपनपूर्वकं वेदाग्रैः संमार्जनं कृत्वा अग्नीधे समर्पणम्]

स्रुवं प्रतप्य पूर्ववद्वेदाग्रै, रन्तरतः प्राक्संमा "र्ष्ट्यनिशित" इति, विपर्यस्य बहिर्मूलैः प्राङुत्क्रम्य ॥३९॥

अध्वर्युः गार्हपत्यस्य पश्चादुपविश्य पूर्ववत् प्रत्युष्टं निष्टप्तमिति वा मन्त्रेण स्रुवं प्रतप्य उपविष्ट एव किंचिदिव प्राग्देशं गत्वा स्रुवं वामहस्ते कृत्वा वेदाग्रैः अग्रे (सू०४३) वेदाग्राणां प्रतिपत्तिविधानाच्छेदनेन वेदात्पृथग्भूतैः मूलादारभ्य मुखपर्यन्तमुपरिदेशे स्रुवं संमाष्ट्यनिशित इति[2] मन्त्रेण । अध्वर्युः पुनः किंचित् प्राङ् गत्वा बहिर्बाह्यतः स्रुवस्य पृष्ठदेशे विपर्यासेन अग्रादारभ्य मूलपर्यन्तं वेदमूलैरनिशित इति संमृज्यात् । इदं चोत्क्रमणं सम्मार्गार्थमेव कर्त्तव्यं, न तु प्रतपनार्थमपि । "तस्मादु तथैव संमृज्याद्यथा ऽग्निं नाभिव्युत्क्षेत्प्राङि वैवोत्क्रम्य" (श० १।२।४।१०) इति श्रुतौ उत्क्रमणस्य संमार्गार्थतताया एव श्रवणात् ॥३९॥

---

१ ॐ द्विषतो वधोऽसि १ । २८ ।

२ ॐ अनिशितोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै संमार्ज्मि १ । २९ ।

प्रतप्य प्रतप्य प्रयच्छति ॥४०॥

अध्वर्युः प्रत्युष्टमिति पुनः स्रुवं प्रतप्य अग्नीधे प्रयच्छेद्वेद्यां निधानार्थम् । इदं च प्रतपनमध्वर्युणा स्वस्थाने प्रत्यागत्य कार्यं, संमार्गमात्रे प्रागुत्क्रमणविधानात् । वीप्सा च स्रुगादिविषया । तेन स्रुगादीनां संमार्गोत्तरं प्रपनं कार्यम् । पूर्वं प्रतपनं तु स्रुवस्यैव । स्रुवं प्रतप्य पूर्ववदिति विशेषविधानात् ॥४०॥

"अनिशिते"ति[1] स्रुचः ॥४१॥

जुहूपभृद्ध्रुवास्तथैव स्रुववत्संमृज्यात् ॥४१॥

तूष्णीं प्राशित्रहरणं, शृतावदानं, पात्रीं च ॥४२॥

तूष्णीं सम्मार्गः, तूष्णीं प्रतपनं चैतेषां भवति । प्रागुत्क्रमणं च नात्र । तस्य मन्त्रसंयोगेन विधानात् । पात्रीशब्देनाविशेषात् पुरोडाशपात्र्योरिडापात्र्याश्च ग्रहणम् ॥४२॥

[संमार्जनानां वेदाग्राणामुत्करे प्रासनम्]

संमार्जनान्यपास्यति ॥४३॥

संमार्जनसाधनानि वेदाग्राणि उत्करे क्षिपेत् ॥४३॥

आहवनीये प्रासनमेके ॥४४॥

एके वेदाग्राणामाहवनीये ऽग्नौ प्रक्षेपं वदन्ति ॥४४॥

इति कातीयश्रौतसूत्रवृत्तौ द्वितीयाध्याये षष्ठी कण्डिका ॥ ६ ॥

[त्रिवृता मुञ्जयोक्त्रेण पत्नीसन्नहनम्]

पत्नीꣳ सन्नह्यति प्रत्यग्दक्षिणत उपविष्टां गार्हपत्यस्य, मुञ्जयोक्त्रेण त्रिवृता, परिहरत्यधीवासो "ऽदित्यै रास्ने"ति[2] ॥१॥

अध्वर्युर्गार्हपत्यस्य निर्ऋतिकोणे पूर्वतः समुपविष्टामीशानाभिमुखीं यजमानस्य पत्नीं त्रिगुणितेन मुञ्जतृणविशेषनिर्मितेन योक्त्रेण नाभेरधः कटिप्रदेशे बध्नाति अदित्यै इति मन्त्रेण । तद्योक्त्रं परिहितस्य वाससो बहिरुपरि परितो वेष्टयेत् । एतत्पत्नीसन्नहनं तत्संस्कारात्प्रतिपत्नि कर्त्तव्यम् ॥१॥

[दक्षिणं पाशमुत्तरे प्रतिमुच्य उत्तरमुत्तरत आनीयोद्गूहेत्, न ग्रन्थिं कुर्यात्]

दक्षिणं पाशमुत्तरे प्रतिमुच्योर्ध्वमुद्गूहति "विष्णोर्वेष्प" इति[3] ॥२॥

अध्वर्युः योक्त्रस्य दक्षिणाग्रस्थितं पाशमुत्तराग्रस्थितस्य पाशस्य मध्ये उपरितः प्रवेश्य अध आकृष्य शङ्कुस्थानीये प्रोतयित्वा (ततः सामर्थ्यात् पाशं द्विगुणं वेष्टयित्वा) दक्षिणं

१ ॐ अनिशितोऽसि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै संमार्ज्मि १ । २९ ।
२ ॐ अदित्यै रास्नाऽसि १ । ३० ।
३ ॐ विष्णोर्वेष्पोऽसि । १।३० ।

पाशमूर्ध्वमुद्गूहति योक्त्रमध्ये एव प्रेरयति। ऊर्ध्वं योक्त्रमध्ये गूहनसामर्थ्याद् द्विर्वेष्टनम्। एकवेष्टने उद्गूहनस्याशक्यत्वादिति देवयाज्ञिकः[1] ॥२॥

न ग्रन्थिं करोति ॥३॥

[आज्यमुद्वास्याध्वर्युणाऽध्येषिता पत्नी मन्त्रेणाऽऽज्यमवेक्षते]

"ऊर्जेत्वे" त्याज्यमुद्वास्य पत्नीमवेक्षय "त्वदब्धेने" ति ॥४॥

उद्वासयामीत्यध्याहृतेन ऊर्जेत्वेति[2] मन्त्रेण अध्वर्युराज्यमुद्वास्य पत्नीमवेक्षयेत्। णिजन्तोपदेशात् 'पत्न्याज्यमवेक्षस्व' इत्यध्येषणा। अनेकपत्नीकेऽपि परार्थत्वादेकैवाज्यावेक्षणं कुर्यात्, द्रव्यसंस्कारत्वात्। पत्न्यभावे पितृयज्ञे, रजस्वलायां प्रोषितायां वाऽध्वर्युरेवावेक्षेत ॥ ४ ॥

[वेद्यामासादिताभ्यः प्रोक्षणीभ्यः पश्चादाज्यासादनम्]

वेद्यां करोत्यपरं प्रोक्षणीभ्यः ॥ ५ ॥

अध्वर्युस्तदाज्यं प्रोक्षणीनां पश्चाद्वेद्यां स्थापयेत् ॥ ५ ॥

[आहवनीयश्रापिण आहवनीये आज्याधिश्रयणम्]

आहवनीये वा कृत्वा तच्छ्रापिणः ॥ ६ ॥

आहवनीयश्रापिणो यजमानस्य पत्न्यवेक्षणानन्तरं आज्यमाहवनीयेऽधिश्रित्य पुनरुद्वास्य प्रोक्षणीभ्योऽपरं वेद्यां निदध्यात् ॥ ६ ॥

[आज्यस्य प्रोक्षणीनां चोत्पवनम्]

"सवितुस्त्वे" त्याज्यमुत्पुनाति प्रोक्षणीश्च पूर्ववत् ॥ ७ ॥

अध्वर्युः पवित्राभ्यामाज्यं प्रोक्षणीश्चोत्पुनाति सवितुस्त्वा[3], सवितुर्व[4] इति मन्त्राभ्यां, प्रतिमन्त्रम् ॥ ७ ॥

[अध्वर्योर्यजमानस्य वाऽऽज्यावेक्षणम्]

आज्यमवेक्षते "तेजोसी" ति[5] यजमानो वा ॥ ८ ॥

[जुह्वां स्रुवेण चतुर्वारमाज्यग्रहणम्]

स्रुवेणाज्यग्रहणं चतुर्जुह्वां "धामनामे" ति[6] सकृन्मन्त्रः ॥ ९ ॥

---

१ विष्णोर्वेष्प इत्यत्र 'विष्लृ व्याप्तौ (जुहो० १३) इति धातोः "पा-नी-विपिभ्यः पः" (३१०) इत्यौणादिकसूत्रेण पप्रत्यये वेष्प इति रूपं निष्पद्यते। अत्र वेष्य इति पाठकल्पनम् एतदौणादिकसूत्राज्ञानमूलकम्। पवर्गीयघटितपाठस्य आसेतुहिमाचलं संप्रदायसिद्धत्वात्। अन्तस्थघटितलेखस्य लेखकप्रमादेन भाष्यादिपुस्तकेषु च सञ्जातत्वात्। एतद्व्युत्पादनं च लखनऊमुद्रितभाष्ये स्पष्टमुपलभ्यते इति ततो निरसनीयः संशयः सन्दिहानैरिति।

२ ॐ ऊर्जे त्वा ऽदब्धेन त्वा चक्षुषाऽव पश्यामि। अग्नेर्जिह्वासि सुहूर्देवेभ्यो धाम्ने धाम्ने मे भव यजुषे यजुषे १। ३०।

३ ॐ सवितुस्त्वा प्रस० रश्मिभिः १। ३१।

४ ॐ सवितुर्वः प्रस० भिः १। ३१।

५ ॐ तेजोऽसि शुक्रमस्यमृतमसि १। ३१।

६ ॐ धाम नामाऽसि प्रियं देवानामनाधृष्टं देवयजनमसि १। ३१।

स्रुवेण जुह्वां चतुर्वारमाज्यं गृह्णीयात्, चतुरः स्रुवान् पूर्णान् गृह्णीयादित्यर्थः। तत्र मन्त्रः प्रथमस्रुवग्रहण एव प्रयोज्यः ॥ ९ ॥

[उपभृति अष्टकृत्व आज्यद्रव्यकानुयाजसहिते कर्मणि स्रुवेणाज्यग्रहणम्]

अष्टावुपभृत्यल्पीयोऽनुयाजाश्चेत् ॥ १० ॥

चेद्यदि अनुयाजाः स्युस्तदा उपभृत्यष्टौ स्रुवान् अपूर्णान् गृह्णीयात्। दर्शपूर्णमासयोरनुयाजानामवैकल्पिकत्वाच्छ्रुत्यर्थश्चेच्छब्दः ॥ १० ॥

"यदष्टौकृत्व उपभृति गृह्णाति प्रयाजानुयाजेभ्यस्तद् गृह्णाति" (तै० ब्रा० ३।३।५) इति श्रुतेरौपभृतस्याज्यस्य प्रयाजानुयाजोभयार्थत्वात् उपभृति अष्टगृहीतमाज्यमर्द्धं प्रयाजेषूपयुज्यते, अर्द्धमनुयाजेषु। तेन यत्रानुयाजानामभावः, यत्र वा द्रव्यान्तरेण पृषदाज्यादिना अनुयाजा विहिताः, तत्र च किमुपभृति चतुर्गृहीतं ग्राह्यम् उताष्टौ कृत्व ? इति संशये सिद्धान्तमाह—

चतुरन्यत्र, प्रतिविभागात् ॥ ११ ॥

अनुयाजाभाववति, अन्यद्रव्यानुयाजके च कर्मणि विकृतौ चतुर्गृहीतमेवाज्यं ग्राह्यम्। कुतः ? प्रतिविभागात्। औपभृतस्याज्यस्य प्रयाजेष्वनुयाजेषु च विभागेनोपयोगात्। अत औपभृतस्योभयार्थत्वम्, तेनाऽनुयाजाभावे प्रयाजार्थमेव चतुर्गृहीतं कर्त्तव्यमिति भावः ॥११॥

हेत्वन्तरमप्याह—

पश्वातिथ्ययादर्शनाच्च ॥ १२ ॥

पशौ अन्यद्रव्यकेष्वनुयाजेषु, आतिथ्यायामननुयाजके कर्मणि च उपभृति चतुर्गृहीतस्याज्यस्य दर्शनाच्चायमर्थो गम्यते, यदनुयाजाभावे प्रयाजार्थमेव चतुर्गृहीतं ग्राह्यम्। पशौ तावत् "जुह्वां चोपभृति च चतुर्गृहीतं गृह्णाति (आप० श्रौ० ७।१।९) इति शास्त्रम्। आतिथ्यायां "सर्वाण्येव चतुर्गृहीतान्याज्यानि गृह्णाति न ह्यत्रानुयाजा भवन्ति" (श० ब्रा० १।३।२।९) इति श्रुतिः ॥१२॥

अत्र प्रतिपक्षी पुनः प्रत्यवतिष्ठते—

न, कृत्स्नोपदेशात् ॥ १३ ॥

यदुक्तमौपभृतस्याज्यस्योभयार्थतेति, तन्न। कुतः ? कृत्स्नोपदेशात्। "अथ यदष्टौ कृत्व उपभृति गृह्णाति अनुयाजेभ्यो हि तद् गृह्णाति" (श० ब्रा० १।३।२।९) इति श्रुतौ उपभृति अष्टगृहीतस्याज्यस्य कृत्स्नस्य अनुयाजार्थत्वेनोपदेशादित्यर्थः। यदुक्तं प्रतिविभागादिति अर्द्धस्य प्रयाजेषूपयोगोऽर्द्धस्यानुयाजेष्विति। अनुयाजार्थमेवाष्टगृहीतस्याज्यस्य वचनात्प्रयाजेषूपयोगः। यथा प्रयाजार्थं जुह्वां गृहीतस्याज्यस्य वचनादुत्तराघारे विनियोगो भवति ॥१३॥

[पश्वातिथ्ययोर्वचनादुपभृति चतुराज्यग्रहणम्]

यदुक्तं पश्वातिथ्ययोर्दर्शनादिति, तत्रोच्यते—

पश्वातिथ्ययोर्वचनात् ॥ १४ ॥

यदा "अनुयाजेभ्यो हि तद् गृह्णाति" (श० ब्रा० १।३।२।९) इति वाक्येन सकलस्यौपभृतस्यानुयाजार्थत्वं, तदा यत्र पशौ द्रव्यान्तरेणानुयाजाः, यत्र चातिथ्यादौ अनुयाजाभावो वा (श० ब्रा० १।४।१।१४) तत्र सर्वत्रापि उपभृत्यग्रहणे प्राप्ते वचनाच्चतुर्गृहीतं विधीयते। अतो विधानमेतत्, न दर्शनम्। प्राप्तिपूर्वकं हि दर्शनं भवति। न चेह प्राप्तिरस्तीत्यतो वचनमिदम्।

एवं प्राप्ते सिद्धान्तयन्ति भाष्यकाराः "यद्द्वौ कृत्व उपभृति गृह्णाति प्रयाजानुयाजेभ्यस्तद् गृह्णाति" (तै० ब्रा० ३।३।८) इति शाखान्तरवचनात् औपभृतस्याज्यस्य उभयार्थविधानमेवाङ्गीकार्यम्। "अनुयाजेभ्यो हि तद् गृह्णाति" (श० ब्रा० १।३।२।६) इति त्वनुवादः। अतः कृत्स्नस्यानुयाजार्थत्वेनोपदेशाभावात् उभयार्थतैवौपभृतस्य। पश्वातिथ्ययोरपि वचनं तदैव स्याद्यदा औपभृतस्योभयार्थता न स्यात्। अस्ति तूभयार्थता। एवं सिद्धायामुभयार्थतायां प्राप्तिपूर्वकत्वाद्दर्शनमेव तत्, न विधानम्। तेन अनुयाजाभावे, अन्यद्रव्यानुयाजके कर्मणि च उपभृति चतुर्गृहीतमेव ग्राह्यमिति सिद्धम् ॥ १४ ॥

[ध्रुवायां च चतुराज्यग्रहणम्]

ध्रुवायां च जुह्वत् ॥१५॥

ध्रुवायामुपभृति च सकृन्मन्त्रेणाज्यग्रहणम्। ग्रहणत्रयं तु तूष्णीं कार्यम् ॥१५॥

[इध्म-वेदि-बर्हिषां प्रोक्षणम्]

इध्मं प्रोक्षति विस्रᳬस्य, वेदिं च, बर्हिः प्रतिगृह्य वेद्यां कृत्वा पुरस्ताद्ग्रन्थि "कृष्णोऽसी"ति (१) प्रतिमन्त्रम् ॥१६॥

अध्वर्युरिध्मं तत्रस्थमेव विस्रंस्य कृष्णोऽसीति प्रोक्षेत्। वेदिरसीति वेदिं प्रोक्षेत्। अग्नीधा समर्पितं बर्हिर्हस्तेनादाय वेद्यां पुरस्ताद्ग्रन्थि यथा स्यात्तथोदगग्रमासाद्य बर्हिरसीति प्रोक्षेत्। अन्यभावे अवभृथेष्ट्यां परिश्रित्सु च नेध्मस्य प्रोक्षणम्। एवं गृहमेधीये (का० श्रौ० ५।८।८।२५) बर्हिस्तरणाभावे वेदेर्न प्रोक्षणम्। अत्र स्रुग्भ्य इति बहुवचनं स्रुगृद्धित्वादौ विपरिणम्यते ॥ १६ ॥

[प्रोक्षणीशेषेण बर्हिर्मूलोपसेचनम्]

शेषं मूलेषूपसिञ्च"त्यदित्यै व्युन्दन"मिति (२) ॥१७॥

प्रोक्षणीशेषं बर्हिर्मूले निनयेदध्वर्युः ॥ १७ ॥

[पवित्रे प्रणीतासु निधाय बर्हिषः पुरस्तात्प्रस्तरग्रहणम्]

पवित्रे निधाय प्रणीतासु, बर्हिर्विस्रᳬस्य पुरस्तात्प्रस्तरग्रहणं "विष्णो" रिति (३) ॥१८॥

अध्वर्युर्हस्तेन प्रणीतासु पवित्रे निधाय बर्हिर्विस्रंस्य बर्हिषः पूर्वभागात्प्रस्तरस्य कुशमुष्टेर्ग्रहणं कुर्यात्। पूलकात्प्रस्तरस्य पृथक्करणे मन्त्रोऽयम्। तेन यत्र पितृयज्ञे प्रस्तरस्य पृथक्करणं नास्ति तत्र "प्रस्तर उपसन्नद्धः" (का० श्रौ० ५।२।२०) इति वक्ष्यमाणत्वादादितो बद्ध एव प्रस्तरो गृहीतो भवति। अतस्तत्र मन्त्रस्य निवृत्तिः ॥१८॥

[वेद्यां बर्हिषा त्रिवृत् स्तरणम्]

ब्रह्मणे प्रदाय, सन्नहनं विस्रᳬस्य दक्षिणस्यां वेदिश्रोणौ निधायान्यैरवच्छाद्य वेदिᳬ स्तृणा"त्यूर्णम्रदस"मिति (४) त्रिवृत् ॥१९॥

---

(१) ओं कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामि २।१। ॐ वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि २।१। ॐ बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि २।१।

(२) ॐ अदित्यै व्युन्दनमसि २।२।

(३) ॐ विष्णो स्तुपोऽसि २।२।

(४) ॐ ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यः २।२।

स्रुवेण जुह्वां चतुर्वारमाज्यं गृह्णीयात्, चतुरः स्रुवान् पूर्णान् गृह्णीयादित्यर्थः। तत्र मन्त्रः प्रथमस्रुवग्रहण एव प्रयोज्यः ॥ ९ ॥

[उपभृति अष्टकृत्व आज्यद्रव्यकानुयाजसहिते कर्मणि स्रुवेणाज्यग्रहणम्]

अष्टावुपभृत्यल्पीयोऽनुयाजाश्चेत् ॥ १० ॥

चेद्यदि अनुयाजाः स्युस्तदा उपभृत्यष्टौ स्रुवान् अपूर्णान् गृह्णीयात्। दर्शपूर्णमासयोरनुयाजानामवैकल्पिकत्वाद्विकृत्यर्थश्चेच्छब्दः ॥ १० ॥

"यदष्टौकृत्व उपभृति गृह्णाति प्रयाजानुयाजेभ्यस्तद् गृह्णाति" (तै० ब्रा० ३।३।५) इति श्रुतेरौपभृतस्याज्यस्य प्रयाजानुयाजोभयार्थत्वात् उपभृति अष्टगृहीतमाज्यमर्द्धं प्रयाजेषूपयुज्यते, अर्द्धमनुयाजेषु। तेन यत्रानुयाजानामभावः, यत्र वा द्रव्यान्तरेण पृषदाज्यादिना अनुयाजा विहिताः, तत्र च किमुपभृति चतुर्गृहीतं ग्राह्यम् उताष्टौ कृत्व ? इति संशये सिद्धान्तमाह—

चतुरन्यत्र, प्रतिविभागात् ॥ ११ ॥

अनुयाजाभाववति, अन्यद्रव्यानुयाजके च कर्मणि विकृतौ चतुर्गृहीतमेवाज्यं ग्राह्यम्। कुतः ? प्रतिविभागात्। औपभृतस्याज्यस्य प्रयाजेष्वनुयाजेषु च विभागेनोपयोगात्। अत औपभृतस्योभयार्थत्वम्, तेनाऽनुयाजाभावे प्रयाजार्थमेव चतुर्गृहीतं कर्त्तव्यमिति भावः ॥११॥

हेत्वन्तरमप्याह—

पश्वातिथ्यादर्शनाच्च ॥ १२ ॥

पशौ अन्यद्रव्यकेष्वनुयाजेषु, आतिथ्यायामननुयाजके कर्मणि च उपभृति चतुर्गृहीतस्याज्यस्य दर्शनाच्चायमर्थो गम्यते, यदनुयाजाभावे प्रयाजार्थमेव चतुर्गृहीतं ग्राह्यम्। पशौ तावत् "जुह्वां चोपभृति च चतुर्गृहीतं गृह्णाति (आप० श्रौ० ७।१।९) इति शास्त्रम्। आतिथ्यायां "सर्वाण्येव चतुर्गृहीतान्याज्यानि गृह्णाति न ह्यत्रानुयाजा भवन्ति" (श० ब्रा० ३।३।२।९) इति श्रुतिः ॥१२॥

अत्र प्रतिपक्षी पुनः प्रत्यवतिष्ठते—

न, कृत्स्नोपदेशात् ॥ १३ ॥

यदुक्तमौपभृतस्याज्यस्योभयार्थतेति, तन्न। कुतः ? कृत्स्नोपदेशात्। "अथ यदष्टौ कृत्व उपभृति गृह्णाति अनुयाजेभ्यो हि तद् गृह्णाति" (श० ब्रा० १।३।२।९) इति श्रुतौ उपभृति अष्टगृहीतस्याज्यस्य कृत्स्नस्य अनुयाजार्थत्वेनोपदेशादित्यर्थः। यदुक्तं प्रतिविभागादिति अर्द्धस्य प्रयाजेषूपयोगोऽर्द्धस्यानुयाजेष्विति। अनुयाजार्थमेवाष्टगृहीतस्याज्यस्य वचनात्प्रयाजेषूपयोगः। यथा प्रयाजार्थं जुह्वां गृहीतस्याज्यस्य वचनादुत्तराघारे विनियोगो भवति ॥१३॥

[पश्वातिथ्ययोर्वचनादुपभृति चतुराज्यग्रहणम्]

यदुक्तं पश्वातिथ्ययोर्दर्शनादिति, तत्रोच्यते—

पश्वातिथ्ययोर्वचनात् ॥ १४ ॥

यदा "अनुयाजेभ्यो हि तद् गृह्णाति" (श० ब्रा० १।३।२।९) इति वाक्येन सकलस्यौपभृतस्यानुयाजार्थत्वं, तदा यत्र पशौ द्रव्यान्तरेणानुयाजाः, यत्र चातिथ्यादौ अनुयाजाभावो वा (श० ब्रा० ३।४।१।१४) तत्र सर्वत्रापि उपभृत्यग्रहणे प्राप्ते वचनाच्चतुर्गृहीतं विधीयते। अतो विधानमेतत्, न दर्शनम्। प्राप्तिपूर्वकं हि दर्शनं भवति। न चेह प्राप्तिरस्तीत्यतो वचनमिदम्।

एवं प्राप्ते सिद्धान्तयन्ति भाष्यकाराः "यद्दष्टौ कृत्व उपभृति गृह्णाति प्रयाजानुयाजेभ्यस्तद् गृह्णाति" (तै० ब्रा० ३।३।८) इति शाखान्तरवचनात् औपभृतस्याज्यस्य उभयार्थविधानमेवाङ्गीकार्यम्। "अनुयाजेभ्यो हि तद् गृह्णाति" (श० ब्रा० १।३।२।६) इति त्वनुवादः। अतः कृत्स्नस्यानुयाजार्थत्वेनोपदेशाभावात् उभयार्थतैवौपभृतस्य । पश्चातिथ्ययोरपि वचनं तदैव स्याद्यदा औपभृतस्योभयार्थता न स्यात्। अस्ति तूभयार्थता। एवं सिद्धायामुभयार्थतायां प्राप्तिपूर्वकत्वाद्दर्शनमेव तत्, न विधानम्। तेन अनुयाजाभावे, अन्यद्रव्यानुयाजके कर्मणि च उपभृति चतुर्गृहीतमेव ग्राह्यमिति सिद्धम् ॥ १४ ॥

[ध्रुवायां च चतुराज्यग्रहणम्]

ध्रुवायां च जुहूवत् ॥१५॥

ध्रुवायामुपभृति च सकृन्मन्त्रेणाज्यग्रहणम्। ग्रहणत्रयं तु तूष्णीं कार्यम् ॥१५॥

[इध्म-वेदि-बर्हिषां प्रोक्षणम्]

इध्मं प्रोक्षति विस्रᳬस्य, वेदिं च, बर्हिः प्रतिगृह्य वेद्यां कृत्वा पुरस्ताद्ग्रन्थि "कृष्णोऽसी"ति (१) प्रतिमन्त्रम् ॥१६॥

अध्वर्युरिध्मं तत्रस्थमेव विस्रंस्य कृष्णोऽसीति प्रोक्षेत्। वेदिरसीति वेदिं प्रोक्षेत्। अग्नीधा समर्पितं बर्हिर्हस्तेनादाय वेद्यां पुरस्ताद्ग्रन्थि यथा स्यात्तथोदगग्रमासाद्य बर्हिरसीति प्रोक्षेत्। अन्यभावे अवभृथेष्ट्यां परिश्रित्सु च नेध्मस्य प्रोक्षणम्। एवं गृहमेधीये (का० श्रौ० ५।८।८।२५) बर्हिस्तरणाभावे वेदेर्न प्रोक्षणम्। अत्र स्रुग्भ्य इति बहुवचनं स्रुग्द्वित्वादौ विपरिणम्यते ॥ १६ ॥

[प्रोक्षणीशेषेण बर्हिर्मूलोपसेचनम्]

शेषं मूलेषूपसिञ्च"त्यदित्यै व्युन्दन"मिति (२) ॥१७॥

प्रोक्षणीशेषं बर्हिर्मूले निनयेदध्वर्युः ॥ १७ ॥

[पवित्रे प्रणीतासु निधाय बर्हिषः पुरस्तात्प्रस्तरग्रहणम्]

पवित्रे निधाय प्रणीतासु, बर्हिर्विस्रᳬस्य पुरस्तात्प्रस्तरग्रहणं "विष्णो" रिति (३) ॥१८॥

अध्वर्युर्हस्तेन प्रणीतासु पवित्रे निधाय बर्हिर्विस्रंस्य बर्हिषः पूर्वभागात्प्रस्तरस्य कुशमुष्टेर्ग्रहणं कुर्यात्। पूलकात्प्रस्तरस्य पृथक्करणे मन्त्रोऽयम्। तेन यत्र पितृयज्ञे प्रस्तरस्य पृथक्करणं नास्ति तत्र "प्रस्तर उपसन्नद्धः" (का० श्रौ० ५।२।२०) इति वक्ष्यमाणत्वादादितो बद्ध एव प्रस्तरो गृहीतो भवति। अतस्तत्र मन्त्रस्य निवृत्तिः ॥१८॥

[वेद्यां बर्हिषः त्रिवृत् स्तरणम्]

ब्रह्मणे प्रदाय, सन्नहनं विस्रᳬस्य दक्षिणस्यां वेदिश्रोणौ निधायान्यैरवच्छाद्य वेदिᳬ स्तृणा"त्यूर्णम्रदस"मिति (४) त्रिवृत् ॥१९॥

---

(१) ओं कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामि २ । १ । ॐ वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामि २ । १ । ॐ बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि २ । १ ।

(२) ॐ अदित्यै व्युन्दनमसि २ । २ ।

(३) ॐ विष्णो स्तुपोऽसि २ । २ ।

(४) ॐ ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यः २ । २ ।

अध्वर्युः प्रस्तरं ब्रह्मणे समर्प्य बन्धनरज्जुं विस्रंस्य रज्जुरूपत्वं परित्याज्य दक्षिणस्यां वेदिश्रोणावुदगग्रं निधाय अन्यैस्तृणैः सन्नहनावच्छादनैः सन्नहनं प्रच्छाद्य ऊर्णम्रदसमिति मन्त्रावृत्या त्रिवृत् = त्रिधातु प्रागग्रं वेदिमाच्छादयेत् । धातवस्तृणमुष्टिप्रक्षेपाः पितृयज्ञे देवपितृभ्य इत्यूहः ॥१९॥

उपपत्या वा बहुलम् ॥२०॥

अथवा न त्रिवृत् स्तृणाति, किन्तु यावतीभिरावृत्तिभिर्वेदेः स्तरणं भवेत् तावतीभिर्घनं यथा स्यात्तथा स्तरणं कर्त्तव्यम् ॥२०॥

[मूलानि अधस्तात् कृत्वा पश्चादपवर्गं स्तृणाति]

अधरमूलम् ॥२१॥

अधराणि मूलानि यस्य तदधरमूलं स्तृणीयात् । पूर्वस्तृतस्य बर्हिषो मूलानि पश्चात्स्तीर्यमाणबर्हिषोऽग्रैः प्रच्छादनीयानीत्यर्थः ॥ २१ ॥

पश्चादपवर्गम् ॥२२॥

पश्चादपवर्गः समाप्तिर्यस्य । वेदेः पूर्वभागादारभ्य पश्चिमे यथा समाप्तिर्भवेत्तथा स्तृणीयात् । अयमेकः पक्षः ॥२२॥

[प्रागपवर्गं निष्कृष्य निष्कृष्य स्तरणम्]

पक्षान्तरमाह—

प्रबृहं वा ॥२३॥

बृह उद्यमे । प्रबृहमिति णमुल् । सौत्रो गुणाभावः । तेनाभीष्टार्थलाभः । श्रुतौ तु "प्रबर्हं स्तृणीयात्" (श० ब्रा० १।२।५।१०) इति गुणघटित एव प्रयोगो दृश्यते । अथवा न पश्चादपवर्गं स्तृणीयात्, अपि तु प्रागपवर्गमित्यर्थः । प्रागपवर्गपक्षे पूर्वपूर्वस्तृतबर्हिषोऽग्रैः पश्चात्स्तीर्यमाणमूलानामाच्छादनं कार्यम् । पूर्वस्तृतबर्हिषोऽग्राणि यष्ट्यादिना ऊर्ध्वमुत्थापयन् तेषामग्राणामधस्ताद् द्वितीयमुष्टेरग्राणि स्तृणीयात् । एवं च प्रागपवर्गमेव स्तरणं सम्पन्नमिति भावः ॥ २३ ॥

[आहवनीयकल्पनात्पूर्वं हविषामुद्वासनम्]

अत्रोद्वासनमाहवनीयश्रापिणः ॥२४॥

आहवनीयश्रापिणो यजमानस्यास्मिन् काले हविषामुद्वासनम् । यदि इदानीमुद्वासनं न क्रियेत तदाऽऽहवनीयकल्पने सति हवींषि दह्येरन् । अत एव कपालोद्वासनमप्यत्रैव कार्यम् । गार्हपत्यश्रापिणस्त्वग्रे (२।८।१४) वक्ष्यते ॥ २४ ॥

[आहवनीयस्य समित्प्रक्षेपेण समर्थीकरणम्]

इध्मात्समिधमादायाहवनीयं कल्पयत्युपर्युपरि प्रस्तरं धारयन् ॥२५॥

इध्मादेकां समिधमादाय ब्रह्मणः सकाशात्प्रस्तरं चार्थादादाय आहवनीयोपरिष्टात्समीपे एव प्रस्तरं धारयन् समिधा समिदाघातेन इन्धनादिकं ज्वलनसमर्थं करोति । एतत्समर्थीकरणं दृष्टार्थत्वादग्नेरेव, न तत्कार्यापन्नानामपां परिश्रितां वा । अतः अप्सु परिश्रित्सु च न भवति ॥२५॥

[अनुयाजार्थमुल्मुकयोराहवनीयान्निष्काशनम्]

उल्मुके उदूहत्यनुयाजार्थेत् ॥२६॥

यदि अनुयाजा अनुष्ठीयन्ते तदाऽनुयाजार्थं द्वे उल्मुके आहवनीयात्पृथक् स्थापयेत्

अनुयाजानुष्ठानकाले पुनस्ते आहवनीये प्रक्षिप्यानुयाजाननुतिष्ठेत्। आतिथ्या (का० श्रौ० ८।१।१) गृहमेधीयादा (का० श्रौ० ५।८।८।२५) वनुयाजाभावे उल्मुकोदूहनस्याप्यभावः। अवभृथेष्टावुदकेऽपि उल्मुकोदूहनमदृष्टसंस्कारकत्वाद् भवति ॥ २६ ॥

इति कातीयश्रौतसूत्रवृत्तौ द्वितीयाध्याये सप्तमी कण्डिका ॥७॥

[आहवनीयस्य पश्चिमे, दक्षिणे, उत्तरे च क्रमेण परिधिपरिनिधानम्]

परिधीन्परिदधात्यार्द्रानेकवृत्तीयान् बाहुमात्रान् पालाश-वैकङ्कत-कार्ष्मर्य-बैल्वान्पूर्वालाभे पूर्वालाभ उत्तरान् खादिरौदुम्बरान्वा मध्यम दक्षिणोत्तरान् "गन्धर्व" इति प्रतिमन्त्रम् ॥ १ ॥

गन्धर्वं(१)इत्यादिमन्त्रत्रयेण आर्द्रान् एकवृद्धोद्भवान् बाहुप्रमाणान् पलाशादिवृक्षीयान् पूर्वपूर्वालाभे उत्तरान् मध्यमे दक्षिणे उत्तरे च इत्येवंक्रमेण त्रीन्परिधीन्परिदध्याद्ध्वर्युः।

अत्र त्वाशब्दस्य परिध्येकवाक्यतया परिधिपरत्वात् अवभृथेष्टौ अग्निस्थानापन्नानामपां बोधनाय युष्मानिति न विपरिणामः। इन्द्रस्य बाहुरसि दक्षिण (शु. य. २।३) इति मन्त्रे न दक्षिणदिक्स्थत्वाद्दक्षिणत्वम्। किंतु इन्द्रदक्षिणबाहुत्वमौपचारिकम्। तेन पितृयज्ञे पश्चिम इत्येवं न विपरिणामः। मित्रावरुणौ त्वोत्तरत इति मन्त्रे पितृयज्ञे पूर्वत इति विपरिणामः। समवेतार्थत्वात् ॥ १ ॥

प्रथमं परिधिꣳ समिधोपस्पृश्य "वीतिहोत्र"मित्यादधाति (२) ॥ २ ॥

अग्निकल्पनार्थं गृहीतया समिधा प्रथमं परिधिमुपस्पृश्य उत्थाय तां समिधमाहवनीये प्रक्षिपेत्। उपस्पर्शनस्य अवभृथेऽपि प्रवृत्तिः। अग्नौ समिदाधानस्य तु दृष्टार्थत्वात् न तत्र प्रवृत्तिः। अतोऽवभृथेष्टौ उपस्पर्शनमात्रं कार्यम्, नाप्सु समित्प्रक्षेपः ॥२॥

अनुपस्पृश्य द्वितीयाꣳ "समिदसी"ति (३) ॥ ३ ॥

इध्माद् द्वितीयां समिधमादाय अनुपस्पृश्याहवनीये प्रक्षिपत्यध्वर्युः ॥ ३ ॥

[आहवनीयमीक्षमाणः सूर्यस्त्वेति जपेत्]

"सूर्यस्त्वे"ति (४) जपत्याहवनीयमीक्षमाणस्तद्वचनत्वात् ॥ ४ ॥

सूर्यस्त्वेति मन्त्रस्याहवनीयपरत्वात् आहवनीयं विलोकयन्नमुं मन्त्रं संहितास्वरेण पठेदध्वर्युः। त्वाशब्दोऽग्निपरत्वादवभृथे विपरिणम्यते। पुरस्ताच्छब्दश्च दिक्परत्वात्पितृयज्ञे विपरिणम्यते ॥ ४ ॥

---

(१) ॐ गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडितः २।२। ॐ इन्द्रस्य बाहुरसि दक्षिणो विश्व० तः २।३। ॐ मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्व० तः २।३।

(२) ॐ वीतिहोत्रं त्वा कवे द्युमन्तꣳ० समिधीमहि। ॐ अग्ने बृहन्तमध्वरे २।४।

(३) ॐ समिदसि २।५।

(४) ॐ सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्यै २।५।

[उदगग्रयोर्विधृत्योर्वेद्यां निधानम्]

आवृत्य वेदिं बर्हिषस्तृणे तिरश्ची निदधाति "सवितु"रिति (१) ॥ ५ ॥

अध्वर्युर्वेदिं प्रत्यागत्य स्तृतस्य बर्हिष उपरि उदगग्रे द्वे तृणे निदध्यात् ॥ ५ ॥

[अप्रकृतयोस्तृणयोर्निधानम]

तृणे निदधातीत्युक्तं, ते तृणे किं वेदेर्ग्राह्ये उत अन्ये इति संशये आह—

अन्ये वाऽयुक्तत्वात् ॥ ६ ॥

वाऽवधारणे। अन्ये एव तृणे उपादेये, न वेदिसंबन्धिनी। कुतः ? अयुक्तत्वादन्येषाम्। न च विनियुक्तं वचनमन्तरेणार्थान्तरे विनियोगमर्हति। तस्मादन्ये तृणे आदाय वेद्यां निदध्यादिति सूत्रार्थः ॥ ६ ॥

अन्यत्रापि तृणार्थे ॥ ७ ॥

अतोऽन्यत्रापि पवित्र-पशूपाकरण-ग्रहोपस्पर्शनाग्निमन्थनादौ तृणकार्ये अन्यान्येव तृणानि ग्रहीतव्यानि, न वेदिसंबन्धिनी ॥ ७ ॥

[यूपाञ्जनं स्थालीस्थाज्यान्येनाज्येन कार्यम्]

यूपाञ्जने च सर्पिः ॥ ८ ॥

यूपाञ्जनं घृतमन्यदेव लौकिकं ग्राह्यं, न स्थाल्यमाज्यम् ॥ ८ ॥

[पुरोडाश–पयस्या–धानानां संस्कृतानां लौकिकानां वोपादानम्]

पुरोडाश–पयस्या–धानासु चेच्छन् ॥ ९ ॥

"पुरोडाशमात्रामैन्द्रवायवे प्रास्यति, पयस्यां मैत्रावरुणे, आश्विने धानाः" (का० श्रौ० ९।११।२५) इति ज्योतिष्टोमे पुरोडाशादीनामैन्द्रवायवादिग्रहेषु प्रक्षेप उक्तः। ते च पुरोडाशादयः इच्छया लौकिका ग्राह्याः, इच्छया प्राकृता इति विकल्पः ॥ ९ ॥

[विधृत्योरुपरि प्रस्तरस्तरणम्]

तयोः प्रस्तरꣳ स्तृणा"त्यूर्णम्रदस"मिति (२) ॥१०॥

तयोर्विधृत्योरुपरि प्रागग्रं प्रस्तरं स्थापयेत्। पितृयज्ञे देवपितृभ्य इत्यूहः ॥१०॥

[प्रस्तरं पाणिद्वयेनाभिन्यसेत्]

अभिनिदधा"त्यात्वा वसव" (३) इति ॥११॥

अध्वर्युर्हस्तद्वयेन प्रस्तरं पीडयेत् ॥११॥

[प्रस्तरं सव्येन स्पृशन्नेव तस्मिन् जुहूं प्रतिगृह्य निदध्यात्]

सव्याशून्ये जुहूं प्रतिगृह्य निदधाति "घृताची"ति (४) ॥१२॥

अध्वर्युरग्नीधा समर्पितां जुहूमादाय सव्यहस्तेन अविमुक्ते प्रस्तरे प्रागग्रामासादयीत (५) ॥१२॥

---

(१) ॐ सवितुर्बाहू स्थः २ । ५ ।

(२) ॐ ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यः २ । ५ ।

(३) ॐ आ त्वा वसवो रुद्रा आदित्याः सदन्तु २ । ५ ।

(४) ॐ घृताच्यसि जुहूर्नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद आसीद २ । ६ ।

(५) गृहमेधीये (का० श्रौ० ५।६।६–२५) आज्यरहितजुह्वासादने घृताच्यसीति पदद्वयं न प्रयोज्यम्। घृतमच्यते निधीयते यस्यामिति व्युत्पत्त्या घृताचीशब्दस्य समवेतार्थत्वात्।

[जुह्वपेक्षया नीचामुपभृतं, ततो नीचां ध्रुवां स्थापयेत्]

एवमितरे उत्तराभ्यां प्रतिमन्त्रं (१) बर्हिष्युपभृतं, ध्रुवां चावकृष्टेऽनुपूर्वम् ॥१३॥

एवं प्रतिगृह्य जुह्वा इतरे द्वे स्रुचौ उपभृतं ध्रुवां च बर्हिषि अनुक्रमेण अवकृष्टे देशे जुह्वपेक्षया अधोदेशे उपभृतं, उपभृदपेक्षया अधो ध्रुवां चोत्तराभ्यां मन्त्राभ्यां प्रतिमन्त्रमासादयेत् ॥१३॥

[पाद्यां स्थानद्वये घृतेनोपस्तीर्य, पुरोडाशौ घृतेनाभिघार्योद्वुद्वासयोपस्तीर्णे निधाय घृतेनानक्ति]

पुरोडाशावभिघार्योद्वास्योपस्तीर्णे निधायाऽनक्ति "यस्ते प्राणः पशुषु प्रविष्टो देवानां विष्ठामनु यो वितस्थे। आत्मन्वान् सोम घृतवान्हि भूत्वाऽग्निं गच्छ स्वर्यजमानाय विन्दे"ति ॥१४॥

अध्वर्युर्गार्हपत्यसमीपे गत्वा पुरोडाशौ घृतेनाभिघार्योद्वास्य पूर्वतरमुपस्तीर्णयोः पुरोडाशपात्रयोर्निधाय यस्त इति मन्त्रेणाऽऽवृत्याऽनक्ति। पुरोडाशपदं हविर्मात्रस्योपलक्षकम् ॥१४॥

यथादेवतमन्यत् ॥१५॥

अग्निं गच्छेत्यस्य 'स्थाने अग्नीषोमौ गच्छ' 'इन्द्राग्नी गच्छ'इत्यादि यथादेवतं प्रयोज्यम् ॥१५॥

[कपालानां प्रत्येकं समन्त्रकममन्त्रकं वा घृतेनैपदञ्जनम्]

प्रत्यनक्ति कपालानि "यानि घर्मे कपालान्युप चिन्वन्ति वेधसः। पूष्णस्तान्यपि व्रत इन्द्रवायू विमुञ्चता"मिति ॥१६॥

उपधानक्रमेण मन्त्रावृत्त्या प्रत्येकमञ्जनं कार्यम्। बहुवचनं पूजार्थम् ॥१६॥

तूष्णीं वा ॥१७॥

तूष्णीं वा कपालाञ्जनं, न मन्त्रेणेति विकल्पः ॥१७॥

सङ्ख्ययोद्वासयति ॥१८॥

प्रथममुद्वासयामि, द्वितीयमुद्वासयामि, तृतीयमु० इत्येवं सर्वेषां कपालानां सङ्ख्ययोद्वासनं कुर्यात्। एककपालेऽपि प्रथममुद्वासयामीति प्रयोगः प्रवर्त्तत एवेति कर्कादयः ॥१८॥

[हवींषि मुख्यक्रमेण निधायाऽऽलभेत]

"प्रियेण धाम्ने"ति हवीꣳषि वेद्यां कृत्वा "ध्रुवा असद"न्निति सर्वाण्यालभते ॥१९॥

प्रियेणेति मन्त्रेण (२) आवृत्या आज्यपुरोडाशादीनि हवींषि ध्रुवाया उत्तरतो वेद्यामासाद्य ध्रुवा (३) इति मन्त्रावृत्या आज्यस्थालीस्थाज्यस्य, जुह्वपभृद्ध्रुवास्थस्याज्यस्य, पुरोडाशयोश्च उपयोगक्रमेणाऽऽलम्भनं कुर्यात् ॥१९॥

---

(१) ॐ घृताच्यस्युपभृन्नाम्ना से० द २। ६। ॐ घृताच्यसि ध्रुवा नाम्ना से० द २। ६।

(२) ॐ प्रियेण धाम्ना प्रियꣳ० सद आसीद। २। ६।

(३) ॐ ध्रुवा असदन्नृतस्य योनौ ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिम् २। ६।

20000

[अध्वर्युरात्मसंस्कारार्थमात्मानमालभेत]

"पाहि मा"मित्यात्मानम् (१) ॥२०॥

अध्वर्युरात्मानमालभेत । हृदयं स्पृशेदित्यर्थः ॥२०॥

अत्र वा व्रतोपायनमत्र वा व्रतोपायनम् ॥२१॥

अस्मिन्नवसरे वा व्रतग्रहणं भवति पूर्वत्र वेति विकल्पः ॥२१॥

इति कात्यायनश्रौतसूत्रे वृत्तौ द्वितीयोऽध्यायः ॥२॥

---

(१) ॐ पाहि मां यजन्यम् २ । ६ ।

लिङ्गातो: भट्ट व्याख्या

तृतीयोऽध्यायः ।

[वेद्या उत्तरश्रोणेरुत्तरतो होतृषदनं कुशास्तीर्णं संस्थाप्य समिधमादाय सामिधेन्यनुवचनार्थं होतारं प्रेष्येत्]

होतृषदनं कृत्वाऽपरेण वेदिꣳ श्रोणिं चोत्तरेणेध्मात्समिधमादायाऽ "ग्नये समिध्यमानायानुब्रूही" त्याह ॥ १ ॥

अध्वर्युर्वेदेः पश्चिमभागे वेदिश्रोणेरुत्तरभागे (१) वा होतुरुपवेशनार्थमुदगग्रं वारणादिवृक्षजं पीठं स्थापयित्वा इध्मादेकां समिधमादाय "अग्नये(२) समिध्यमानायानुब्रूहि" इति होतारं ब्रूयात् । होता सीदति यस्मिन् तद्धोतृषदनम् । करोतिरत्र स्थापनार्थो, न तूत्पादनार्थः । अपरेण वेदिमित्यनेन प्रदेशमात्रनिर्देशावगमात् । मध्ये क्रियान्तरकरणे प्रकरणविहितपदार्थानां पौर्वापर्यविच्छेदापत्तेश्च ॥ १ ॥

होतरिति चैके ॥ २ ॥

'अग्नये समिध्यमानाय होतरनुब्रूहि' इति प्रैषमेके वदन्ति ॥ २ ॥

[स्विष्टकृतः प्राक् ऋचां निगदानां च प्रथमस्वरेण पाठः]

(३) प्रथमस्थानेन प्राक् स्विष्टकृतः ॥ ३ ॥

स्विष्टकृद्यागानुष्ठानात्पूर्वं सर्वे ऋङ्मन्त्रा, निगदमन्त्राश्च उपांश्वपेक्षया(३) किञ्चिदुच्चैर्वक्तव्याः ॥ ३ ॥

[स्विष्टकृतः प्रभृति इडान्तं तेषां मध्यमेन पाठः]

मध्यमेनेडायाः ॥ ४ ॥

स्विष्टकृत्प्रभृति इडान्तं सर्वे मन्त्रा मध्यमेन स्वरेण प्रयोज्याः ॥ ४ ॥

[इडात उत्तरं तेषामुत्तमेन पाठः]

शेषमुत्तमेन ॥ ५ ॥

इडाप्रभृति कर्मसमाप्त्यन्तं सर्वे मन्त्रा उत्तमेन स्वरेण प्रयोज्याः ॥ ५ ॥

[यजमानः "सन्तनिव" इति मन्त्रं पठेत्]

"सन्तन्वन्निव मेऽनुब्रूही" त्याह यजमानः ॥ ६ ॥

यजमानोऽनेन मन्त्रेण होतारं प्रेषयेत् । प्रोषिते यजमाने अध्वर्युणाऽयं प्रैषो वाच्यः । सत्रेषु चैक एव वदेत् । एकैनैव प्रयुक्तेन होतृसंबोधनरूपस्य कार्यस्य प्रयुक्तत्वात् ॥ ६ ॥

---

(१) अपरेण वेदिम् इत्यस्य "एष वां लोक इत्युदङ्ङेजति" (श० ब्रा० १।५।१।२५) इति प्रकृत्य "अन्तरा वा एतदाहवनीयं च गार्हपत्यं चास्ते" (श० ब्रा० १।५।१।२५) इति लिङ्गावगतत्वात्, श्रोणेरुत्तरभागस्य च श्रुत्यवगतत्वात् श्रुत्या लिङ्गं बाधित्वा वेदिश्रोणेरुत्तरत एव होतृषदनं स्थापनीयमिति कर्काशयः ।

(२) अत्र मन्त्रगतोऽग्निशब्दः अग्नित्वजातिवाचकः । अतो वरुणप्रघासादौ यत्र समिध्यमानाग्न्यनेकत्वं, तत्रापि अग्नये समिध्यमानायेत्येव मन्त्रः प्रयुज्यते । एवम् 'अग्निं संमृड्ढि' (का० श्रौ० २।१।१२) इत्यादौ सर्वत्रापि द्रष्टव्यम् ।

(३) उपांश्वपेक्षया किञ्चिदुच्चैः स्वरेणोच्चारणं प्रथमस्थानम् । उपांशुलक्षणं च—"जिह्वोष्ठौ चालयेत् किञ्चिद्देवतागतमानसः । निजश्रवणयोग्यः स्यादुपांशु स जपः स्मृतः" इति ।

[पाद्याभ्यामङ्गुष्ठाभ्यां भ्रातृव्यावबाधनं क्रत्वर्थम्]

अङ्गुष्ठाभ्यां चावबाधते पाद्याभ्यां वेदमहममुमवबाध इति द्वेष्यम् ॥७॥

यजमान इदमहमिति मन्त्रेण पादयोरङ्गुष्ठाभ्यां (शत्रुं मनसा स्मृत्वा) भूमिं पीडयेत् । वा ऽवधारणे । अमुमित्यस्य स्थाने शत्रुनामोच्चार्यम् । सत्रे त्वेकः कुर्यात्(१) ॥ ७ ॥

[द्वेष्याभावे भ्रातृव्यपदप्रयोगेणावबाधनम्]

अभावे द्विषन्तं भ्रातृव्यमिति वा ॥८॥

द्वेष्यस्याभावे द्विषन्तमवबाधे, भ्रातृव्यमवबाध इति वा प्रयुञ्ज्यात् ॥ ८ ॥

[सामिधेनीसङ्ख्यां ज्ञात्वा तत्सङ्ख्यापूरणप्रत्ययान्तं पञ्चदशेनेत्यादिकमवबाधनमन्त्रे प्रयोज्यम्]

यावत्सामिधेनि वेदेदमहं तावतिथेन वज्रेणेति ॥ ९ ॥

यावत्यः सामिधेन्योऽस्मिन्कर्मणि इति यावत्सामिधेनि । अनुष्ठेयकर्मणि सामिधेनीगता सङ्ख्या यावती अस्ति इति जानाति अर्थात् सामिधेन्य ऋचः यावत्सङ्ख्याकाः सन्ति तावत्सङ्ख्यावाचकं पदमिदमहमित्यनन्तरमुच्चारयेत् । अयं भावः—इष्टिविशेषेषु क्वचित्पञ्चदश, क्वचिदेकविंशति सामिधेन्यः इति संख्याविशेषाः श्रूयन्ते । तत्र यत्र कर्मणि या सङ्ख्या, तद्वाचकं पदं तस्मिन्मन्त्रे संयोज्य उच्चारयेत् । यथा दर्शपूर्णमासेष्टौ इदमहं पञ्चदशेन, पश्वाद्यौ इदमहं सप्तदशेन, प्राजापत्यपशौ इदमहमेकविंशेन, इष्टकापशौ इदमहं चतुर्विंशेनेति प्रयोगः । सूत्रे च तावतिथशब्देन तत्सङ्ख्याबोधकपूरणप्रत्ययान्तपदोच्चारणमभिप्रेतम् । अतः यत्र यत्र पिण्डयेष्टौ (आश्व० श्रौ० २।१९) सामिधेनीत्रयम् , यत्र वा उपसत्सु सामिधेनीनवकं (आश्व० श्रौ० ४।८) तत्रापि तृतीयेन, नवमेनेत्येव यथाक्रमं प्रयोगः ।

इदमहमित्यस्यापि क्रत्वर्थत्वात् एकेनैव करणेऽपि क्रतूपकारस्य जायमानत्वात् , पुरुषाभिलषितफलजनकत्वाभावाच्च एकः अविपरिणमय्यैव कुर्यात् ॥ ९ ॥

[सामिधेन्यन्ते होत्रा क्रियमाणप्रतिप्रणवप्रयोगकालेऽध्वर्युरिध्माधानं कुर्यात्]

प्रतिप्रणवमाधानम् ॥१०॥

होता सामिधेनीर्ऋचः पठन् एकैकस्या ऋचः अन्ते प्रणवं ब्रवीति । यदा स पठति तदा तदा अध्वर्युणा अग्नौ इध्माधानं कर्त्तव्यम् (२) ॥१०॥

["समिद्धो अग्न आहुत" इत्येतत्सामिधेन्यनुवचनात्पूर्वम् अनुयाजघटितेष्टौ एकवर्जमिध्मजातमग्नावभ्यादध्यात]

समिद्ध इति प्रागतः सर्वमिध्ममेकवर्जमनुयाजाश्चेत् ॥११॥

समिद्ध इति प्रतीकात्प्राग्यः प्रणवस्तस्मिन्प्रणवे एकमिध्मकाष्ठं वर्जयित्वा अवशिष्टं सर्वमिध्ममाहवनीये प्रक्षिपेत् । पञ्चदशसामिधेनीपक्षे "प्रवो वाजा" (का०हौ० प० १।३) इत्यादयः एकादश सामिधेनीमन्त्रा भवन्ति । आद्यन्तमन्त्रयोस्त्रिस्त्रिरावृत्तिर्भवति । तेन पञ्चदश मन्त्राः

---

(१) यद्यपि माध्यन्दिनीयशाखायां "यं द्विष्यात्तमङ्गुष्ठाभ्यामवबाधेत" (श० ब्रा० १।२।५।७) इति सामान्यत उक्तं, तथापि कण्वशाखायाम् "पाद्याभ्यामङ्गुष्ठाभ्यामवबाधेत" (का० ब्रा० २।३।३।५) इति विशेषस्मरणात् सामान्यस्य विशेषे सङ्कोचस्यावश्यकत्वात् पाद्याभ्यामङ्गुष्ठाभ्यामेव द्विषतोऽवबाधनं कर्त्तव्यम् । अतश्च सूत्रस्थो वाशब्दो न विकल्पबोधकः । किन्तु अवधारणार्थ इति बोध्यम् ।

(२) इदं च सामिधेन्यनुवचनं,समिदाधानं च अग्न्यर्थम् । अतो न परस्परमङ्गाङ्गिभावः । अग्न्यर्थयोरनयोरत्र एककालिकत्वं विधीयते । अतश्च मानुपादपचारादनुक्तायां सामिधेन्यां सर्वेषु काष्ठेषु प्रक्षिप्तेष्वपि सामिधेन्यनुवचनं कर्त्तव्यमेव । अग्नीन्धनार्थत्वाच्चानयोः यत्राग्नीन्धनाभावोऽवभृथादौ, तत्रोभयोर्निवृत्तिः ।

सम्पद्यन्ते। अत्र वीतिहोत्रमिति (का० श्रौ० २।८।२) क्षिप्ता प्रथमा समित्, द्वितीया समिदसीति (२।८।३) प्रक्षिप्ता। ततो दशभिः सामिधेनीभिर्दश समिधः क्षिप्त्वा समिद्ध इति द्वादश्या ऋचा पञ्चेध्मानि प्रक्षिपेत्, एकं चानुयाजार्थमवशेषयेत्। इत्थमष्टादशानामिध्मानां (१) विनियोगः कार्य इति भावः। समिद्धो अग्न आहुतेति ऋचं यदा होता पठितुमारभते ततः पूर्वमेव अनुयाजार्थमेकां समिधमवशेष्य अवशिष्टान् सर्वानपि इध्मानग्नौ प्रक्षिपेदध्वर्युः। प्रकृतौ अनुयाजानां विकल्पाभावात् चेदिति शब्दो विकृतिविषयः।

यत्र च सामिधेनीविवृद्धिस्तत्र विवृद्धसङ्ख्यापूरणार्थमग्निदेवताकानामृचामानयनं क्रियते। आनीतानामृचां द्वादश-त्रयोदशमन्त्रयोर्मध्य एव पाठः। द्वादशो मन्त्रः समिध्यमानपदघटितः। त्रयोदशो मन्त्रः समिद्धपदघटितः। अतस्तयोः समिध्यमान-समिद्धवती इति संज्ञा। "समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युः" (तै० सं० ५।३।४।५।३।३) इति वचनात् ॥११॥

[सामिधेन्यनुवचनान्ते वेदेनाहवनीयस्य त्रिरुपवाजनमदृष्टार्थं, स्रुवेण पूर्वाघारः, अग्निसंमार्गश्च]

अनुवचनान्ते वेदेनाहवनीयं त्रिरुपवाज्य स्रुवेण पूर्वमाघारमाघार्याऽऽहा'ऽग्निमग्नीत्संम्मृड्ढी'ति ॥१२॥

सामिधेन्यन्ते वेदेन व्यजनस्थानापन्नेनाहवनीयमग्निं त्रिरुपवाज्य स्रुवेण प्रथमाघारं हुत्वा "अग्निमग्नीत्सम्मृड्ढि" इति प्रैषमग्नीधं प्रति ब्रूयात्। उपवाजनस्यादृष्टार्थत्वादवभृथे अलादावपि प्रवृत्तिः। अपोऽग्नीत्समड्ढीति तत्र प्रैषः। एवं यावदुक्तेऽपि प्रवृत्तिः। यावदुक्तस्वरूपं पूर्वमुक्तम् (२।२१ टिप्पण्याम्) संस्कारकत्वाच्चोपवाजनं यावदुक्ते प्रवर्त्तते। अत्र च प्रजापतिर्देवता। साऽपि त्यागमात्र एव। स्वाहाकारोऽत्र न भवति। "न स्वाहा" (श०ब्रा० १।४।५।५) इति निषेधात्। प्रधानकर्मत्वात्पूर्वाघारो यावदुक्ते न भवति ॥१२॥

[इध्मसन्नहननदर्भैः परिक्रम्य परिक्रम्य परिधिमनुलक्ष्याग्निं प्रदक्षिणक्रमेण त्रिस्त्रिरग्नीत्संमार्ष्टि]

इध्मसन्नहनैरनुपरिधि सम्मा"ष्ट्यग्ने वाजजि"दिति(२) त्रिस्त्रिः परिक्रामम् ॥१३॥

इन्ध्मबन्धनार्थैस्तृणैरग्नीत् पूर्वेण परिक्रम्य यजतिस्थानस्थः संमार्ज्य द्विस्तूष्णीं मार्जयेत्। ततोऽप्रादक्षिण्येन यजतिस्थानमागत्य पश्चिमपरिधिमुदक्संस्थं सकृन्मन्त्रेण द्विस्तूष्णीं संमार्जयेत्। ततः पुनः प्रदक्षिणं परीत्य जुहोतिस्थानमागत्य उत्तरपरिधि सन्निधावग्निं प्राक्संस्थं तथैव सम्मार्जयेत्। पुनरप्रादक्षिण्येन परिक्रम्योत्तरतः स्थित्वा मध्ये तूष्णीं त्रिः संमार्जयेत् (३)। यावदुक्तेऽप्ययं सम्मार्गः, आहवनीयसंस्कारत्वात्। अदृष्टार्थत्वादबादावपि भवति। तत्र आपो वाजजितो वाजं वः सरिष्यन्तीर्वाजजितः सम्मार्ज्मीत्यूहः। अनुपरिधीति परिधिसमीपे इत्यर्थः। अग्निं संमृड्ढि इति प्रैषबलात्, सूत्राच्च अयं सम्मार्गः केवलमग्निसंस्कारक एव। न तु कल्पान्तरवत् परिधिसंस्कारकोऽपि। आपस्तंबस्तु "अग्नीत्परिधींश्चाग्निं च त्रिस्त्रिः संमृड्ढीति संप्रेष्यति" (२।१२।१०) इति परिधीनां संस्कारकत्वमप्यभिप्रैति। एवमग्रेऽपि (३।५।४) सकृत्सम्मार्गोऽग्नेरेव द्रष्टव्यः ॥१३॥

---

(१) अत्र ऋग्विवृद्धावपि काष्ठवृद्धेर्निष्प्रमाणकत्वात्, सामिधेनीनामिध्मकाष्ठस्य च परस्परमङ्गाङ्गिभावाभावाच्च 'समिद्धो अग्न' इत्यतः प्रागेव सर्वेषां काष्ठानामग्नौ प्रक्षेपणमिति।

(२) ॐ अग्ने वाजजिद्वाजं त्वा सरिष्यन्तं वाजजितꣳ संमार्ज्मि २।७।

(३) "तूष्णीमुपरि" इति वक्ष्यमाण सूत्रे "परिक्रामम्" इति णमुल्वचनानुवृत्तिसामर्थ्यात्परिक्रम्येत्यत्रापि भवति इति कर्काकूत्या त्रिवारं परिक्रमणं बोधयते।

[मध्ये तूष्णीं संमार्गः]

तूष्णीमुपरि ॥१४॥

पुनरप्रादक्षिण्येन परिक्रम्य उत्तरतः स्थित्वा मध्ये तूष्णीं त्रिः प्राक्संस्थं सम्मार्जयेत् ॥१४॥

[आहवनीयस्य पश्चिमतो देवेभ्यः पुटाञ्जलिं करोति, दक्षिणतः पितृभ्य उत्तानं सव्येनैव]

अपरमाहवनीयादञ्जलिं करोति 'नमो देवेभ्यः' 'स्वधा पितृभ्य' इति दक्षिणत उत्तानम् ॥१५॥

अध्वर्युर्जुहूपभृतोः पुरस्तादाहवनीयस्य पश्चात् "ओं नमं देवेभ्यः" (शु० य० २।७) "ॐ स्वधा पितृभ्यः (७।२) इति अञ्जलिपुटं निदधाति। तस्मादञ्जलिकरणस्थानाद्दक्षिणतो द्वितीयमञ्जलिमुत्तानं करोति। "स स्रु चोत्तरमाघारमाघारयिष्यन् पूर्वेण स्रुचावञ्जलिं निदधाति" (श० ब्रा० १।४।४।?) इति श्रुतेरञ्जलिकरणद्वयस्यापि उत्तराघारार्थत्वावगमात् यत्र उत्तराघाराभावः, तत्र अञ्जलिकरणस्याप्यभावः ॥१५॥

[जुहूपभृतावादाय जुहूमुत्तरां कृत्वा होमार्थं यागस्थानं गच्छेत्]

अप(१) उपस्पृश्य "सुयमे (२) म" इति(३) जुहूपभृतावादायोत्तरां जुहूं कृत्वा दक्षिणाऽतिक्राम"त्यङ्घ्रिणा विष्ण"विति(४) ॥ १६ ॥

प्रथमं हस्ताभ्यां जुहूमादाय उपभृत उपरि निधाय ततः सुयमे म इति मन्त्रान्ते जुहूपभृतौ सहैव दक्षिणेन गृहीत्वा दक्षिणस्यां दिशि यजतिस्थानं गच्छेत् ॥ १६ ॥

[सर्वहोमार्थं परिधिपश्चिमतो गच्छेत्]

परिधीनपरेण सञ्चरो होष्यतः ॥ १७ ॥

परिधीनां पश्चात् स्रुचां पूर्वेण होमं करिष्यतोऽध्वर्योर्गमनागमनमार्गो वेदितव्यः॥१७॥

[यागदेशं गच्छन् सव्येन पादेनाऽतिक्रामेत्, प्रत्यागच्छन् दक्षिणेन पादेनातिक्रामेत्]

सव्येनेतो, दक्षिणेनामुतः ॥१८॥

इतो जुहोतिस्थानाद्यजतिदेशं गच्छन्नध्वर्युः सव्येन पादेन गच्छेत्। अमुतो यजतिदेशात्प्रत्यागच्छन्दक्षिणेन पादेनाऽऽगच्छेत्। एकैकेन पादेन गन्तुमशक्यत्वात् तस्य प्रथमप्रवृत्तिर्विवक्षिता। उत्तरतो जुहोतिस्थानम्, दक्षिणतो यजतिस्थानं भवति ॥ १८ ॥

[अवस्थायैवोत्तराघारं जुहुयात्]

"वसुमती"मित्यवस्थाय(५) ॥ १९ ॥

यजतिदेशे ईशानाभिमुखस्तिष्ठेदध्वर्युः ॥१९॥

इति कातीयश्रौतसूत्रवृत्तौ तृतीयाध्याये प्रथमा कण्डिका ॥१॥

---

(१) पित्र्यत्वादेव प्राप्तस्य अपामुपस्पर्शनस्य विधानमपसव्यादिनिवृत्त्यर्थम्। तेन पित्र्यञ्जलिकरणं सव्यादिनैव भवति।

(२) "सुयमे मे" इति मन्त्रेण स्रुगादानमुत्तराघारावान्तरप्रकरणात्तदर्थमेव। एवम् "अङ्घ्रिणा विष्णो" इति मन्त्रेण दक्षिणातिक्रमणं "वसुमतीम्" इत्यवस्थानं च उत्तराघारार्थमेव। तदीयावान्तरप्रकरणात्। ततश्च अन्यकर्मणि स्रुगादानं, दक्षिणातिक्रमणम्, अवस्थानं च अमन्त्रकमेव भवतीति बोध्यम्।

(३) ॐ सुयमे मे भूयास्तमस्कन्नमद्य देवेभ्य आज्यर्ठ० संभ्रियासम् २। ७.८।

(४) ॐ अङ्घ्रिणा विष्णो मा त्वाऽवक्रमिषम् २। ८।

(५) ॐ वसुमतीमग्ने ते च्छायामुपस्थेषं विष्णो स्थानमसि २। ८।

"इत इन्द्र" इति जुहोत्युत्तराघारम् ॥ १ ॥

अत्र च देवता इन्द्रः। 'इत इन्द्र' इति (१) मन्त्रे इन्द्रस्यैव विधानात्। अतो दर्विहोमेषु इन्द्राय स्वाहेति प्रयोगः। दर्विहोमेषु स्थाल्याज्यादेव एकगृहीतेन स्रुवेण होमः। अयमपि अदर्थत्वाद्यावदुक्ते न भवति (२) ॥ १ ॥

[उत्तराघारमाघार्य स्रुचौ परस्परमसंस्पर्शयन् यागस्थानादेत्य ध्रुवां जुहूस्थितेनैवाज्येन समनक्ति]

आघार्यासꣳस्पर्शयन् स्रुचावेत्य जुह्वा ध्रुवाꣳ समनक्ति "सञ्ज्योतिषे"ति(३)॥२॥

आघारानन्तरं जुहूप्रभृतोः परस्परं स्पर्शमकुर्वन्नेव यजतिस्थानाद्वेदेः पश्चादागत्य जुहूस्थेनाज्येन ध्रुवास्थमाज्यं जुह्वैव समञ्ज्यात्। ध्रौवाज्यमध्ये जुह्वा ऽऽज्यबिन्दुं पातयेदित्यर्थः। अत्र गच्छतामित्यध्याहारः। यद्यपि [illegible] ध्रुवासंस्कारः, तथापि उत्तराघारे सत्येव प्रवर्त्तते। उत्तराघारलोपे तु तल्लोप एव ॥ २ ॥

[इध्मसन्नहनायादायाध्वर्युराश्रावयेत्]

निधायेध्मसन्नहनान्यादा 'योश्रावये'त्याह ॥ ३ ॥

स्रुचौ स्वस्थाने निधाय अध्वर्युर्होतारमुत्तरेण गत्वा उत्करस्य पश्चात्प्राङ्मुखः स्थित इध्मसन्नहनानि गृहीत्वा 'ओ३श्रा३वय' इति ब्रूयात् ॥ ३ ॥

[अग्नीत्प्रत्याश्रावयेत्]

'अस्तु श्रौष'डित्यग्नीत् ॥ ४ ॥

अध्वर्योरुत्तरतो दक्षिणामुखः स्थितोऽग्नीत् अस्तु श्रौ३षट् इति ब्रूयात् ॥ ४ ॥

[वेदिबर्हिरादाय वा, इध्मशकलमपच्छिद्याऽऽदाय वा ऽऽश्रावयेत्]

वेदिबर्हिरिध्मशकलमपच्छिद्यैके ॥ ५ ॥

एके आचार्याः वेद्यां स्तृतं बर्हिर्गृहीत्वा आश्रावयेत्, अथवा इध्मशकलमपच्छिद्य गृहीत्वा वा आश्रावयेदिति वदन्ति ॥ ५ ॥

[सर्वत्राऽऽश्रावणमध्वर्युः प्रत्याश्रावणमग्नीत्कुर्यात्]

एवꣳ सर्वत्राऽऽश्रुत—प्रत्याश्रुतेषु ॥ ६ ॥

एवं सर्वत्राऽऽश्रावणमध्वर्युः, प्रत्याश्रावणमग्नीत्कुर्यात्। उपग्रहद्रव्याणि इध्मसन्नहनादीनि तु होतृवरणे एव ग्राह्याणीति कर्कः ॥ ६ ॥

[गृहीतेध्मसन्नहन एवाध्वर्युराश्रावण-प्रत्याश्रावणोत्तरं होतृसंस्काराय प्रवृणीते अग्निर्दैव इत्यादिना]

अथ प्रवृणीते "ऽग्निर्देवो दैव्यो होता देवान्यक्षद्विद्वांश्चिकित्वान्मनुष्वद्भरतवत् ॥ ७ ॥

---

(१) ॐ इत इन्द्रो अक्रीर्यमकृणोदूर्ध्वोऽध्वरऽ आस्थात्। अग्ने अवेर्होत्रं वेर्दूत्यमव तां त्वां द्यावापृथिवीऽअव त्वं द्यावापृथिवी स्विष्टकृद्देवेभ्यऽ इन्द्रऽ आज्येन हविषा भूत्स्वाहा २। ८-९।

(२) "चतुर्गृहीतं वा एतदभूत्तस्याघारमाघार्य त्रिरितः प्राचीनं प्रयाजान्यजति" (आप० श्रौ० ३।५।१) "स यच्चतुर्जुह्वां गृह्णाति प्रयाजेभ्यो हि तद् गृह्णाति" (श० ब्रा० १।३।२।८) इति वचनात् प्रयाजार्थद्रव्यादेव आघारस्य क्रियमाणत्वावगमात् यत्र तदभावस्तत्र आघारस्य परमवश्यकर्त्तव्यत्वात् स्थाल्याज्यादेव सकृद्गृहीतेन होमः।

(३) ॐ सं ज्योतिषा ज्योतिः गच्छताम् २। ९।

अध्वर्युः अग्निर्देव इति मन्त्रेण होतारं वृणुयात् । अग्निर्देव इत्यत्र मानुषस्यैव होतु स्तुतये देवतात्वारोपो, न तु प्रधानाग्नेः स्विष्टकृदग्नेर्वा तत्रोपादानम् । यष्टुरग्नेरग्निसादृश्या संभवात् । ततश्च सौर्यादौ अवभृथेष्टौ च अविकृतस्यैव पाठः ॥ ७ ॥

[यजमानार्षेयाणि वृणीते ऽध्वर्युः]

अमुवदमुवदिति यजमानार्षेयाण्याह परस्तादर्वाञ्चि त्रीणि ॥ ८ ॥

अध्वर्युर्भरतवत् इत्यन्तं पूर्वमन्त्रमुक्त्वा अमुवदित्यस्य स्थाने यजमानसंबन्धीनि पूर्वजभूतानि परस्तात्पितृस्थानीयादर्वाञ्चि पितृ-तत्पुत्र-तत्पौत्ररूपाणि त्रीणि ऋषेरपत्यानि वृणुयात् । अर्थात् ये यस्य यजमानस्य मन्त्रकृतस्तेषां मध्ये त्रयाणां नाम गृहीत्वा वरणं कुर्यात् । यथा गोतमगोत्रिणो यजमानस्य गोतमवत् भरतवत् अङ्गिरोवत् इत्युच्चार्य ब्रह्मण्वदा च वक्षदिति वक्ष्यमाणं मन्त्रं ब्रूयात् ॥ ८ ॥

यावन्तो वा मन्त्रकृतः ॥ ९ ॥

अथवा यजमानस्य कुले यावन्तो मन्त्रद्रष्टारः प्रवराध्याये श्रुतास्तेषां सर्वेषां नाम वृणुयात् , न त्रीण्येवेति नियमः॥ मन्त्रकृतश्च केषांचिदेकः, केषांचिद् द्वौ, केषांचित् त्रयः, केषांचित्पञ्चेत्यादि । तेन यस्य यावन्त उक्तास्तावन्तो वरणीयाः ।

अयं भावः । आर्षेयप्रकरणे "आर्षेयं वृणीते" इत्याम्नाय अनन्तरं "एकं वृणीते, द्वौ वृणीते, त्रीन् वृणीते, न चतुरो वृणीते, न पञ्चातिवृणीते" (आप० श्रौ० २।१६।८) इति श्रूयते। तत्र त्रीन् वृणीत इत्यस्यैव यदि विधायकत्वमङ्गीक्रियेत तर्हि त्रयाणामेव वरणं प्राप्तमिति कृत्वा पूर्वसूत्रं प्रवृत्तम् । यदा तु आर्षेयं वृणीते इत्यस्यैव विधायकत्वमङ्गीक्रियते तदा एकं वृणीत इत्यादीनामर्थवादत्वमङ्गीकार्यम्। एवं च सर्वेषां मन्त्रदृशां वरणं प्राप्तमिति कृत्वा उत्तर-सूत्रं प्रवृत्तम् ॥९॥

[राज्ञः स्वार्षेयेण पुरोहितार्षेयेण वा वरणम्]

पुरोहितार्षेयेण वा ॥ १० ॥

अध्वर्युः राज्ञो यजमानस्य पुरोहितार्षेयाणि वा, राज्ञः आर्षेयाणि वा वृणुयात् ॥१०॥

क्षत्रियवैश्ययोश्च नित्यम् ॥११॥

अभिषेकक्रियारहितस्य क्षत्रियस्य वैश्यस्य च नित्यं पुरोहितार्षेयेण वरणम् ॥११॥

[सर्वेषां ब्राह्मणादीनां मनुवदिति वा वरणम्]

मनुवदिति वा सर्वेषाम् ॥ १२ ॥

अथवा सर्वेषां ब्राह्मणादीनामार्षेयस्थाने मनुवत् इत्येतत्पदं सकृत्प्रयोज्यम् ॥१२॥

[यजमानार्षेयप्रवरणान्ते "ब्रह्मण्वत" इत्यादिकं होतृनामग्रहणान्तं मन्त्रं ब्रूयात्]

"ब्रह्मण्वदा च वक्षद् ब्राह्मणा अस्य यज्ञस्य प्रावितारोऽसौ मानुष" इति होतृनामग्रहणम् ॥१३॥

आर्षेयोच्चारणानन्तरं ब्रह्मण्वदित्यादि मन्त्रशेषं ब्रूयात् । असौ मानुष इत्यस्य स्थाने अमुकशर्मा होता मानुष इति ब्रूयात् ॥१३॥

[उपांशु वा होतुर्नाम गृह्णीयात्]

उपाꣳशु वा ॥१४॥

होतृनामग्रहणमुपांशु उच्चैर्वा कुर्यात्। होतृवरणं होतुरदृष्टसंस्कारः। अतो याव-दुक्तेऽपि प्रवर्त्तते ॥१४॥

[होत्रा संमृष्टौ अध्वर्य्वग्नीधौ उपविशतः]

सम्मृष्टा उपविशतः ॥१५॥

वरणानन्तरं होता अध्वर्युमग्नीधं चांसदेशे संमृशति। तौ चाध्वर्य्वग्नीधौ होत्रा सम्मृष्टौ सन्तौ उपविष्टौ भवेताम् ॥१५॥

[अग्निर्होतेति स्रुगादापनमन्त्रस्य अवान्तरप्रकरणरूपसन्निधेः प्रयाजाङ्गत्वम्]

अग्निर्होतेति स्रुगादापनं प्रयाजेषु, सन्निधेः ॥१६॥

"अग्निर्होता" (का० हौ० प० १।४) इति मन्त्रे होत्रा पठ्यमाने अध्वर्युणा स्रुचोरादानं कार्यम्। अन्यत्र तु तूष्णीमेव स्रुगादानं न मन्त्रपाठ इति भावः। कुतः ? प्रयाजसन्निधौ स्रुगादापनस्य पाठात्। अतः पशावेकादशप्रयाजोत्कर्षे(१) पुनरुच्चारणम् ॥१६॥

[घृतवतीमिति मन्त्रे होत्रा पठिते अध्वर्युः स्रुचावादायातिऽऽक्रम्याऽऽश्राव्य 'समिधो यज' इति प्रैष्य होत्रा वषट्कृते समिद्धतमे जुहुयात्]

घृतवतीमित्युक्ते स्रुचावादायाऽतिक्रम्याऽऽश्राव्याह 'समिधो यजे'ति पञ्च प्रयाजान्त्समिद्धतमे ॥१७॥

होत्रा "घृतवतीम" (का० हौ० प० १।४) इति मन्त्रे उक्ते अध्वर्युः स्रुचौ गृहीत्वा यजतिदेशं गत्वा श्रौश्रावय इत्युक्त्वा समिधो यज इति होतारं ब्रूयात्। पञ्च(२)प्रयाजान् पुरोऽनुवाक्या (३) रहितान् सकृदतिक्रान्त एव समिद्धतमेऽग्नौ जुहुयात् ॥१७॥

[द्वितीयादिप्रयाजेषु यज यजेत्येव प्रैषः]

यज यजेति शेषम् ॥१८॥

द्वितीयप्रभृतिप्रयाजेषु यज यज इत्येव प्रैषं होतारं प्रति ब्रूयात् ॥१८॥

[एकत्रैव तिष्ठन् समिद्धतमे पञ्चापि प्रयाजान् जुहुयात्]

ध्रुवस्तिष्ठन् ॥१९॥

एकस्मिन् स्थाने स्तंभ इव तिष्ठन् पञ्च प्रयाजान्यजेत। अपक्रमकारणे सत्यपि नापक्रामेदित्यर्थः ॥१९॥

---

(१) अयं मन्त्रः प्रयाजसन्निधानात्प्रयाजाङ्गभूतस्रुगादानार्थ एव। अतश्च अन्यत्र तूर्ष्णीं स्रुगादानम्। पशुयागे च एकादश प्रयाजा विहिताः (का० श्रौ० ६।४।७)। तत्र प्रथमतो दश प्रयाजानिष्ट्वा (का० श्रौ० ६।४।९) एकादशप्रयाजार्थं जुह्वामाज्यमवशिष्य स्थापनीयम्। स च एकादशः प्रयाजो वपाभिधारणानन्तरं कर्त्तव्यः (का० श्रौ० ६।७।१८)। तदर्थं च पूर्वं स्थापिता जुहूर्ग्रहीतव्या। तद्ग्रहणकालेऽपि अग्निर्होतेति मन्त्रः पठनीयः।

(२) "समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहा यजति" (तै० सं० २।६।१) इति पञ्च प्रयाजाः। अत्र तनूनपान्नाराशंसयोर्विकल्पः। शतपथे विशेषाश्रवणेऽपि का० होत्र परिशिष्टे (१।४) विशिष्य विधानात्।

(३) "अथ यदपुरोऽनुवाक्यकाः प्रयाजा भवन्ति" (श० ब्रा० ११।२।१।१२) इति श्रुतेः।

पक्षान्तरमाह—

पूर्वं पूर्वं वा ऽभिक्रामम् ॥२०॥

अथवा प्रतिप्रयाजमाहवनीयसम्मुखं गत्वा गत्वा पूर्वं पूर्वं प्राक्संस्थपङ्क्त्या। पञ्चापि प्रयाजान् पृथक्पृथक्स्थाने प्राक्संस्थान् जुहुयात् ॥२०॥

[जह्वां चतुर्गृहीतेन त्रीन् प्रयाजान् हुत्वा चतुर्थ पञ्चमप्रयाजार्थं जुह्वामुपभृत आनयति]

उपभृतो जुह्वामानयत्यनवमृशंश्चतुर्थम् ॥ २१ ॥

उपभृति गृहीतस्य मध्ये, अर्द्धाज्यस्य प्रयाजार्थत्वाच्चतुर्थप्रयाजं प्रति उपभृतः सकाशादर्धमाज्यं जुह्वामासिञ्चेत् उपभृता जुह्वाः स्पर्शमकुर्वन् ॥२१॥

[प्रयाजवृद्धौ चतुर्थे चतुर्थे उपभृतः समानयनम्]

एवं प्रवृद्धौ ॥२२॥

एवं प्रयाजवृद्धौ चतुर्थे समानीय चतुर्थमारभ्य पुनश्चतुर्थे = सप्तमे, पुनश्च सप्तममारभ्य चतुर्थे = दशमे समानयनं कार्यम् ॥२२॥

[अनुयाजवृद्धौ च चतुर्थे चतुर्थे समानयनम्]

अनुयाजेषु च ॥२३॥

अनुयाजवृद्धावपि चतुर्थ-सप्तम-दशमेषु समानयनं कार्यम् ॥२३॥

[जुहूमध्युह्याध्युक्ष्य प्राचीमवतार्य सर्वत्र जुहुयात्]

उत्तरां जुहूमध्युह्य प्राचीमवहृत्य जुहोति ॥२४॥

उपभृत उपरि स्थितां जुहूमुपभृदग्रेणावतार्य प्रथमं प्रयाजमिष्ट्वा पुनस्तेनैव मार्गेण उपभृत उपरि निधाय पुनस्तथैव अवहृत्योत्तार्य द्वितीयं जुहुयात्। एवं प्रति प्रयाजमध्युह्याध्युह्य जुहुयात्, न सकृदवतारितया होम इत्यर्थः। अध्यूहनमुपभृत उपरि निधानम्। अवहरणमुत्तारणम् ॥२४॥

एवठं० सर्वत्र ॥२५॥

न प्रयाजमात्रे एवैतदवतारणमध्यूहनं च, किन्तु होममात्रे ॥२५॥

इति कातीयश्रौतसूत्रवृत्तौ तृतीयाध्याये द्वितीया कण्डिका ॥२॥

[जुहूपभृतोः सर्वहोमेषु नाभिदेशे धारणम्]

नाभिदेशे धारणम् ॥ १ ॥

सर्वत्र होममात्रे जुहूपभृतोर्नाभिदघ्ने देशे धारणं कार्यम् ॥१॥

प्रयाजानुमन्त्रण "मेको ममैका तस्य योऽस्मान्द्वेष्टि यं च वयं द्विष्म" इति ॥२॥

कुर्यादिति शेषः। प्रथमे प्रयाजे इष्टे यजमानः एको ममेति पठेत् ॥२॥

एवं मिथुनैर्यथासङ्ख्यम् ॥३॥

एवं मिथुनैः = द्वौ मम द्वे तस्येत्यादिभिर्यथासङ्ख्यमनुमन्त्रयेत्। द्वितीय-तृतीय-चतुर्थप्रयाजेषु इष्टेषु क्रमेण द्वौ मम द्वे तस्य योऽस्मा० ष्मः, त्रयो मम तिस्रस्तस्य यो०, चत्वारो मम चतस्रस्तस्य यो० इत्यादिक्रमनुमन्त्रणं कुर्यादित्यर्थः ॥३॥

न तस्य किञ्चनेति पञ्चमे ॥४॥

पञ्चमे प्रयाजे इष्टे 'पञ्च मम न तस्य किञ्चन यो० द्विष्म' इति मन्त्रं यजमानो ब्रूयात् ॥४॥

त्विषिमान,पचितिमान् , यशस्वी, ब्रह्मवर्चस्य,न्नाद इति च ॥५॥

पञ्चसु प्रयाजेषु एको ममेत्यादिकमेकैकं मन्त्रमुक्त्वा ततः प्रतिमन्त्रं क्रमेण त्विषिमान् इत्यादिभिः पञ्चभिर्मन्त्रैरनुमन्त्रणं कुर्यात्। पञ्चसु मन्त्रेषु भूयासम् इत्यध्याहारः। एतेन प्रतिप्रयाजमनुमन्त्रणद्वयं कार्यम्। अतश्च असंहितात्वप्रयोगः। अनुमन्त्रणस्यारादुपकारकत्वेनादृष्टार्थत्वात् प्रोषितोऽपि यजमानस्तत् कुर्यात् ॥ ५ ॥

[प्रयाजवृद्धौ आगन्तूनां प्रयाजानां पञ्चमधर्मसंबन्धः]

यत्र प्रयाजादौ प्रकृतिसङ्ख्यातोऽधिकसङ्ख्या नवैकादशत्वादिका विकृतौ विहिता, तत्र सर्वेषां प्रयाजानामावृत्तौ प्राप्तायाम् आगन्तूनां प्रयाजानां सर्वप्रयाजधर्मप्राप्तौ इदमुच्यते—

आगन्तूनां चतुर्थपञ्चमाभ्यां, स्थानात् ॥ ६ ॥

आगन्तूनां प्राकृतसङ्ख्यातोऽधिकानां विकृतिमात्रविहितानां प्रयाजानां चतुर्थात् पञ्चमाच्च प्रयाजात् यो धर्मः प्राप्तः अनुमन्त्रणादिरूपः, स धर्मो विज्ञातव्यः। अर्थात् प्रथम-द्वितीय-तृतीयानां प्रयाजानामनुमन्त्रणं प्रकृतिवत्कृत्वा चतुर्थप्रयाजानुमन्त्रणेन चतुर्थप्रभृति सप्तम-प्रयाजपर्यन्तानानुमन्त्र्य शेषान् पञ्चमप्रयाजानुमन्त्रणेनानुमन्त्रयेत्। कुतः? स्थानात्, तत्रैव आगन्तूनां पाठादित्यर्थः ॥ ६ ॥

पक्षान्तरमाह—

प्रथम-चतुर्थाभ्यां वा यथालिङ्गम् ॥ ७ ॥

प्रथमात् चतुर्थाच्च यो धर्मः प्राप्तस्तेन सह इतरेषां प्रयाजानां धर्मसंबन्धः कर्तव्यः। अर्थात् प्रथमस्य बहुदेवत्यत्वात् आगन्तुषु ये बहुदेवत्याः प्रयाजास्तेषां प्रथमप्रयाजधर्मः। चतुर्थप्रयाजस्यैकदेवत्यत्वात् ये एकदेवत्याः प्रयाजास्ते चतुर्थधर्मकाः कार्याः ॥ ७ ॥

सिद्धान्तमाह—

सर्वान्वोत्तमेनोपायित्वात् ॥ ८ ॥

वाशब्दः पक्षं व्यावर्त्तयति। अथवा अन्तिमप्रयाजधर्मेण सह सर्वान् प्रयाजान् संबध्नीयात्। कुतः? उपायित्वात्। तमेव पञ्चमं प्रयाजं प्रति आगन्तूनामागतत्वात्। आगन्तूनामन्तेऽभिनिवेश (पू० मी० ५।२। सू० १८) इति न्यायादिति भावः। अतश्च नवप्रयाजपक्षे एकादशप्रयाजपक्षे च चतुरः प्रयाजान्प्रकृतिवदिष्ट्वा शेषेषु प्रयाजेषु पञ्च ममेत्येवानुमन्त्रणम् ॥ ८ ॥

[प्रयाजान् हुत्वा यागस्थानादेत्य जुह्वा ध्रुवाया आग्नेयादिहविषामुपभृतश्चाभिघारणं जुहूरिक्ततार्थं, न स्थाल्याः]

एत्य जुह्वाऽभिघारणं ध्रुवाया हविष उपभृतश्च ॥ ९ ॥

यजतिस्थानाद्वेदेः पश्चादागत्योपविश्य जुहूस्थेनाज्यशेषेण जुह्वैव ध्रुवायाः, आग्नेयाग्नी-

षोमीययोः पुरोडाशयोः, उपभृतश्च क्रमेणाभिघारणं (१) कुर्यात्। ध्रुवादीनामुपादानं स्थाली-व्युदासार्थम्। तेन स्थाल्याज्यस्य नाभिघारणम्। अभिघारणं च प्रयाजशेषप्रतिपत्तिः। आज्य-भागार्थं जुह्वा रिक्तीकरणरूपदृष्टार्थत्वात्। हविःसंस्कारार्थत्वे अदृष्टार्थत्वात्। अतोऽसन्निहित-पशुपुरोडाशाभिघारणार्थं न प्रयाजशेषः स्थापनीयः ॥ ९ ॥

[प्रयाजानन्तरमाज्यभागानुष्ठानम्]

आज्यभागाभ्यां चरत्याग्नेयेन सौम्येन ॥ १० ॥

आज्यभागसंज्ञकं कर्म करोति। तत्र एकोऽग्निदेवत्यः, अपरः सोमदेवत्यः ॥ १० ॥

[सवषट्कारास्वाहुतिषु चतुरवत्तं होतव्यम्]

चतुरवत्तꣳ सवषट्कारासु ॥ ११ ॥

सवषट्कारास्वाहुतिषु स्रुवेण चतुर्गृहीतमाज्यं जुहुयात् ॥११॥

['आप्यायताम्' इति मन्त्रेण ध्रुवामभिघारयेत्]

अनिधायावदायावदाय ध्रुवामभिघारय''त्याप्यायतां ध्रुवा हविषा घृतेन यज्ञं यज्ञं प्रति देवयद्भ्यः। सूर्यायाऽ ऊधोऽ अदित्याऽ उपस्थ ऽउरुधारा पृथिवी यज्ञे ऽअस्मि''न्निति ॥१२॥

अध्वर्युः जुहूपभृतौ स्वस्थाने अनिधाय वामहस्ते धृत्वैव चतुरवत्तिनश्चतुर्वारं, पञ्चा-वत्तिनः पञ्चवारं ध्रुवातो जुह्वामाज्यं तूष्णीमवदायाऽवदाय तत आज्यस्थाल्यास्तूष्णीं स्रुवेणाज्यं गृहीत्वा आप्यायतामिति मन्त्रेण ध्रुवामभिघारयेत्। वीप्सा प्रतिस्रुवमाप्यायनविधानार्था। अन्यथा चतुरवदानान्ते सकृदाप्यायनं प्राप्नोति। तच्च नोपपद्यते, मूलत्वात्। अत्र याज्ञिकाः चतुर्वारं पञ्चवारं वाऽऽप्याय्य पञ्चमं षष्ठं वा पुनर्ध्रुवायां प्रक्षिपन्ति। तत्र मूलमन्वेष-णीयम् ॥१२॥

अनुब्रूहीत्युक्त्वा नापव्याहरे,द्धोता चाऽऽश्रवणात् ॥१३॥

अनुब्रूहि इति प्रैषानन्तरमध्वर्युर्होता च ओश्रावय इत्याश्रावणपर्यन्तं किमपि नोच्चरेत् ॥१३॥

आश्राविते ऽग्नीदाप्रत्याश्रवणात् ॥१४॥

अध्वर्युणा ओश्रावय इति उक्ते अग्नीत् अस्तु श्रौषट् इति प्रत्याश्रवणात्पूर्वं किमपि न व्याहरेत् ॥१४॥

प्रत्याश्राविते ऽध्वर्युराहोतृप्रैषात् ॥ १५ ॥

अस्तु श्रौषट् इति प्रत्याश्रवणानन्तरमध्वर्युः होतारमुद्दिश्य क्रियमाणात् यज इति प्रैषात्पूर्वं नापव्याहरेत् ॥१५॥

होता ऽऽवषट्कारात् ॥१६॥

---

(१) मुख्यक्रमेण पूर्वमाग्नेयस्य पुरोडाशस्याभिघारणं, तत अग्नीषोमीयस्य। दर्शे तु ऐन्द्राग्नस्य। "ध्रुवाया हविष उपभृतश्च" (का० श्रौ० २।३।९) इति सूत्रे ध्रुवादीनामुपादानं स्थालीव्युदासार्थम्। तेन स्थाल्याज्यस्यानभिघारणम्। अभिघारणं च प्रयाजशेषप्रतिपत्तिः। आज्यभागार्थं जुह्वा रिक्तीकरणरूपदृष्टार्थत्वात्। हविःसंस्कारार्थत्वे अदृष्टार्थत्वप्रसङ्गात्। अदृष्टार्थत्वं च सति दृष्टार्थे न युक्तम्। एवं प्रयाजशेषेणेति तृतीया द्वितीयार्थे, हवींषीति द्वितीया च सप्तम्यर्थे। दृष्टार्थत्वानुरोधात्। ततश्च असन्निहितपशुपुरोडाशाभिघारणार्थं न प्रयाजशेषः स्थापनीयः।

यजेति प्रैषानन्तरं होता वषट्कारात्प्राक् न व्याहरेत् ॥१६॥

सोमे च ग्रहं गृहीत्वोपाकरणात् ॥१७॥

सोमयागे अध्वर्युर्ग्रहं(१) गृहीत्वा स्तोत्रारंभात्पूर्वं नापव्याहरेत्। सोमरसाधारभू पात्रविशेषो ग्रहः। उद्गातृभिः क्रियमाणस्य स्तोत्रस्य प्रारम्भ उपाकरणम् ॥१७॥

उपाकृत उद्गातार आहोतृप्रैषात् ॥१८॥

उद्गातृभिस्तैस्तैः स्तोत्रैः स्तुत्वा अन्तिमायाः स्तोत्रियाया ऋचः प्रस्तावे कृते, प्रस्तो "होतरेषोत्तमा" (ला० श्रौ० २।६।११) इति होतारमुद्दिश्य प्रेष्यति, तावत्पर्यन्तमुद्गातारो व्याहरेयुः ॥१८॥

होता ऽऽवषट्कारात् ॥१९॥

सोमयागे होता ग्रहसंबद्धहोमवषट्कारात्पूर्वं न व्याहरेत् (२) ॥१९॥

आग्नेयमुत्तरपूर्वार्द्धे, दक्षिणपूर्वार्द्धे सौम्यम् ॥२०॥

आहवनीयस्यैशानभागे अग्निदेवताकमाज्यभागं,तस्यैवाग्नेयकोणे सौम्यं जुहुयात् ॥२२॥

पक्षान्तरमाह—

समिद्धतमे वा ॥२१॥

अथवा न स्थानविशेषापेक्षा, यत्र अग्निर्ज्वलति तत्स्थाने जुहुयात् ॥२१॥

हविर्भ्यां च ॥२२॥

आग्नेयाग्नीषोमीयपुरोडाशावपि सामिद्धतमे जुहुयात् ॥२२॥

पुरोडाशावन्तरेणाग्नीषोमा उपांᳫशवाज्यस्य ॥२३॥

आग्नेयाग्नीषोमीयपुरोडाशयागयोर्मध्ये आज्येनोपांशु अग्नीषोमौ पूर्णिमामां यजेत

विष्णुर्वा ऽमावास्यायांᳫ हौत्राम्नानात् ॥२४॥

दर्शेष्टौ आग्नेयैन्द्राग्नपुरोडाशयागयोर्मध्ये अग्नीषोमौ आज्येनोपांशु यजेत। विष्णुमाज्येनोपांशु यजेतेति देवताविकल्पः। व्यवस्थितोऽयं विकल्पः। सान्नाय्यय ऽग्नीषोमयागः। असान्नाय्ययाजिनो विष्णुर्देवता। शाङ्खायनसूत्रे (१।८।८) तथैवं विति वेद्यः ॥२४॥

(१) येन शस्त्रेण शंसनं करोति तच्छस्त्रीयग्रहहोमसंबधिवषट्कारोच्चारणात्पूर्वं होता नापव्य
ऋग्वेदमन्त्रैः होत्रा क्रियमाणं देवतानिष्ठगुणाभिधानं शंसनं शस्त्रं वोच्यते।

(२) अनन्तरोक्तसूत्रत्रयस्यायमाशयः—सोमाभिषवानन्तरं तत्तद्देवताभ्यः सोमरसस्तत्तत्पात्रे
र्युणा गृह्यते। ग्रहणानन्तरमुद्गातॄन्प्रति स्तोत्रोपाकणार्थं प्रेष्यति "ग्रहं वा गृहीत्वा चमसं वोन्नीय।
कुर्यात्" (तै० सं० ३।१।२) इति श्रुतेः। प्रेषिता उद्गातारः तद्ग्रहसंबंधिनीं देवतां तद्देवताकैः
स्तुत्वा स्तोत्रान्तिमाया ऋचः प्रस्तावानन्तरं होतारं प्रति "होतरेषोत्तमा" (ला०श्रौ० २।६।११)
ददति। एवं प्रेषितो होता पूर्वोक्तदेवताकं शस्त्रमारभते। समाप्ते शस्त्रे पूर्वगृहीतं ग्रहं होतुमध्वर्युः प्रारभ
अध्वर्युणा प्रेषितो होता याज्यां पठति। पठित्वा तदन्ते वषट्करोति। वषट्कृते चाध्वर्युर्जुहोति। त
सोमग्रहणानन्तरमुपाकरणात्प्राक् नकिंचिदपि व्याहरेत्। उपाकरणे कृते उद्गातारो होतृप्रैषात्पूर्वं
हरेयुः। होता च ग्रहीयवषट्कारात्पूर्वमिति। सोमलतातो रसनिःसारणमभिषवः।

होत्रकाण्डे "वैष्णवश्चेविदं विष्णु" (का० हौ० प० १४) रिति अनुवादबलेन विकल्पेन वैष्णवयागस्य अनुष्ठेयताप्रतीतेः ॥ २४ ॥

[ध्रुवव्यतिरिक्तानां सर्वेषां हविषामुत्तरादवदायोत्तरतः स्विष्टकृद्धोमः]

यावद्धविरुत्तरार्द्धात्स्विष्टकृतः ॥ २५ ॥

यावन्ति हवींषि भवेयुस्तेषां सर्वेषामुत्तरप्रदेशात्स्विष्टकृद्यागार्थमवद्येत् । तत्र जमदग्नीनां द्वे अवदाने, इतरेषामेकम् । "एकप्रत्ययावयथ्यं स्विष्टकृत" (१।८।६) इत्युक्तत्वात् । अत्र सर्वेषां हविषामुत्तरार्द्धादवदाय सर्वैरेकं प्रदानं कर्त्तव्यम् । "न द्रव्यभेदे गुणयोगादिति वात्स्य" (१।५।१३) इत्युक्तत्वात् । अयं च स्विष्टकृद्यागो द्रव्यांशे प्रतिपत्तिकर्म । यागे उपयुक्तस्य पुरोडाशादेर्हविषः संस्कारकत्वात् । यागांशे च अदृष्टार्थोऽर्थकर्म । अतश्च यावदुक्ते कर्मणि प्रतिपत्ति समादाय प्रवर्त्तत एव ॥ २५ ॥

तत एव होमः ॥ २६ ॥

अग्नेरुत्तरार्द्ध एव स्विष्टकृदवदानानां होमः कार्यः ॥ २६ ॥

[ध्रौवस्याज्यशेषत्वात् न ततः स्विष्टकृदवदानम्]

यावद्धविरित्युक्तत्वात् उपांशुयाजाज्यशेषादपि स्विष्टकृदवदाने प्राप्त आह—

नाज्यादशेषात् ॥ २७ ॥

उपांशुयाजो हि ध्रौवादाज्यात् क्रियते । तस्मिन् कृते सति ततः ध्रौवादाज्यात्स्विष्टकृदर्थं नावद्येत् । कुतः ? अशेषात् । अशेषत्वादित्यर्थः । न ह्येतदुपांशुयाजस्य शेषभूतम् । "सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यम्" (श० ब्रा० ४।३।५।२) इति वाक्येन ध्रौवाज्यस्य सर्वार्थत्वावगमात् ॥ २७ ॥

[अन्याहुतिभिरसंसृष्टां स्विष्टकृदाहुतिं जुहुयात्]

असंसृष्टामाहुतिभिः ॥ २८ ॥

स्विष्टकृदाहुतिं पूर्वकृताभिराहुतिभिरसंबद्धां पूर्वहुतेन द्रव्येण अकृतसम्पर्कामिति यावत् । जुहुयादिति शेषः ॥ २८ ॥

निधाय ॥ २९ ॥

स्रुचौ स्वस्थाने सादयित्वा वक्ष्यमाणं कर्म कुर्यादिति संबन्धः ॥ २९ ॥

इति कातीयश्रौतसूत्रवृत्तौ तृतीयाध्याये तृतीया कण्डिका ॥ ३ ॥

[स्रुचौ निधाय अनुयाजार्थं सञ्चरमभ्युक्ष्य उपस्तीर्य आग्नेयस्य मस्तकादन्यस्माच्च प्राशित्रं द्विर्यवमात्रमवदायाऽभिघारयेत्]

सञ्चरमभ्युदय प्राशित्रमवद्यति यवमात्रं पिप्पलमात्रं वा, ऽन्यतरत आज्यमुभयतो वा ऽऽग्नेयात् ॥ १ ॥

वेदगृहीतैरद्भिः सञ्चरमुदक्संस्थमभ्युदय(१)प्राशित्रहरणपात्रे आज्येनोपस्तीर्णे सति तत्र प्राशित्रं ब्रह्मभागं यवप्रमाणं पिप्पलफलप्रमाणं वा आग्नेयपुरोडाशस्य मस्तकात् अग्नीषोमीयस्य पुरोडाशस्य तु यतःकुतश्चित्प्रदेशाद् द्विरवद्यति। आज्यस्थाल्याज्येन स्रुवेणोपरिष्टादभिघारयेच्च। प्राशित्रस्यान्यतरत आज्यं भवति उपस्तृणाति वा अभिघारयति वेत्यर्थः। उभयतो वा। अथवा प्राशित्रावदाने उपस्तारो ऽभिघारणं चेत्युभयमपि कार्यम्। सञ्चराभ्युक्षणस्यानुयाजार्थत्वात्तदभावेऽभावः ॥ १ ॥

भागांश्च ॥ २ ॥

वक्ष्यमाणान् षडवत्त-ब्रह्म-यजमानभागांश्च आग्नेयाद् गृह्णीयात्। अयं पूर्वपक्षः। सिद्धान्तस्तु प्राशित्रावदानं भागहरणं चोभाभ्यामेव कर्त्तव्यं, नाग्नेयात् इति उभौ वा ऽविशेषादित्यत्र (३. ४. १२) वक्ष्यते ॥ २ ॥

[ब्रह्मणे प्राशित्रं प्रदाय उपस्तीर्य सर्वं हविर्दक्षिणतो मध्याच्च द्विरवदाय द्विरभिघार्येडां पञ्चावत्तां कुर्यात्]

अध्वर्युसञ्चरेण ब्रह्मणे प्रदाय, पूर्वेणैके, ऽपऽ उपस्पृश्येडां पञ्चावत्तां दक्षिणतो मध्याच्च यावद्धविः स्विष्टकृद्वदाज्यम् ॥ ३ ॥

अध्वर्युरवत्तं प्राशित्रमध्वर्युसञ्चरेण = परिधीनामपरेण ब्रह्मणे समर्प्य, आहवनीयस्य पूर्वेण वा समर्प्य, अप उपस्पृश्य इडापात्र्यां घृतेनोपस्तीर्य सर्वेषां हविषां दक्षिणतो मध्याच्च इडामवदाय स्विष्टकृद्वद्विर्द्विरभिघारयेत्। एवमिडां पञ्चावत्तां कुर्यात्। स्विष्टकृद्वदाज्यमित्यनेनैव पञ्चावत्तत्वे सिद्धे पुनः पञ्चावत्तग्रहणं पत्नीसंयाजेडायामपि पञ्चावत्तत्वज्ञापनार्थम् ॥३॥

[आग्नेयाद् ग्राह्यत्वेनोक्तान् आग्नेयादिभागानस्मिन्नवसरे गृह्णीयात्।
तत्र यजमानभागं ध्रुवायाः पुरस्ताद्बर्हिर्निदध्यात्]

यजमानभागं पूर्वार्द्धाद्दीर्घं प्रशीर्य पुरस्ताद् ध्रुवायाः करोति ॥ ४ ॥

अध्वर्युः पुरोडाशयोः पूर्वार्द्धाद्यजमानभागं दीर्घं महान्तं त्रोटयित्वा ध्रुवायाः पूर्वभागे बर्हिष उपरि स्थापयति ॥४॥

---

(१) सञ्चरमभ्युक्ष्येति। पशुयागे च प्रथमतो वपाहोमः, ततः पश्वङ्गभूतः पुरोडाशयागः, ततस्तदङ्गभूतः स्विष्टकृद्यागः, ततो हृदयाद्यङ्गयागः, ततः पाशुकस्विष्टकृद्यागः "त्र्यङ्गैः स्विष्टकृतं यजति" (आप. श्रौ०) ७।२२।६ इति विहितः। तत्र वपाहोमात्पूर्वमेव पश्वङ्गभूताः प्रयाजा इज्यन्ते। पाशुकस्विष्टकृद्यागानन्तरं च अनुयाजा इज्यन्ते। पाशुकैरेव प्रयाजानुयाजैः पुरोडाशयागे मध्ये पुरोडाशयागे कृतेऽपि न तदर्थं प्रयाजा अनुयाजा वा इज्यन्ते। पाशुकैरेव प्रयाजानुयाजैः पुरोडाशयागेऽपि प्रसङ्गादुपकारसिद्धेरिति स्थितिः। अतश्च सञ्चराभ्युक्षणस्य अनुयाजार्थत्वात्, पशुयागे च स्विष्टकृदुत्तरमेव अनुयाजानुष्ठानात् तदानीमेव अभ्युक्षणं कार्यम्, न तु पुरोडाशस्विष्टकृदनन्तरमेव। ज्योतिष्टोमे च "आग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति" इति तृतीयसवने विहितस्य आग्निमारुतशस्त्रस्य अनन्तरमेव अनुयाजविधानात् तदनन्तरमेव सञ्चराभ्युक्षणम्। दक्षिणं दोः, सव्या श्रोणिः गुदस्य तृतीयोऽश इति त्र्यङ्गानि (आप० श्रौ० ७।२२।६)।

[इडां होत्रे प्रदाय तामविसृजन् दक्षिणाऽतिक्रामेत्]

इडा२ँ होत्रे प्रदायाऽविसृजन्दक्षिणाऽतिक्रामति ॥५॥

इडां होत्रे प्रदाय हस्तेनेडामविमुञ्चन् होतारं प्रदक्षिणीकृत्य होतुः पुरस्तादागत्य प्रत्यङ्मुख उपविश्य दक्षिणस्यां स्वस्थाने आगच्छेत् ॥५॥

[इडाग्रेण होतुरङ्गुलिपर्वणी अञ्ज्यात्]

इडां प्रतिगृह्य होतुरङ्गुलिपर्वणी अनक्ति ॥६॥

अध्वर्युर्होत्रा समर्पितामिडां प्रतिगृह्य इडात एव स्रुवेणाज्यमादाय होतुस्तर्जन्या उत्तमं मध्यमं चेति द्वे पर्वणी स्रुवेण अञ्ज्यात् ॥६॥

[होतुः पाणौ पञ्चकृत्यः पुरोडाशरूपेडावदानादवद्येत्]

अवान्तरेडामादधाति पूर्ववत् ॥७॥

अध्वर्युर्होतुर्हस्ते इडापात्रीस्थपुरोडाशावदानादेव पूर्ववत् पञ्चावत्तामवान्तरेडामादधाति । ऐडात्पुरोडाशात्पञ्चावदानानि होतुः पाणौ स्थापयेदित्यर्थः । अत्र पुरोडाशावदानादेव पञ्चावत्तता, नाज्यात् । तस्य संसृष्टरूपत्वेन अवदाने भेदस्य सम्पादयितुमशक्यत्वात् ॥७॥

इडां च ॥८॥

अध्वर्युरिडां च होतुर्हस्ते आदध्यात् ॥८॥

सर्वे ऽन्वारभन्ते ॥९॥

"उपहूतं रथन्तरम्" (का० हौ० प० १।६) इत्यनेन मन्त्रेण इडायामुपहूयमानायां सर्वे ऋत्विग्यजमाना होतारमन्वारभेरन् ॥९॥

[यजमानः आग्नेयं चतुर्धा कृत्वा बर्हिषदं कृत्वा 'इदं ब्रह्मणः' इत्यादिना भागानादिशेत्, न समर्पयेत्]

इडोपहूतेत्युच्यमान आग्नेयं वर्हिषदं करोति "ब्रध्न पिन्वस्वायुर्मे धुक्ष्व प्रजां मे धुक्ष्व पशून्मे धुक्ष्व ब्रह्म मे धुक्ष्व क्षत्रं मे धुक्ष्व विशो मे धुक्ष्व योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तस्य प्रजया पशुभिराप्यायस्वे" ति मं चतुर्द्धा कृत्वा ॥१०॥

उपहूतꣳ रथन्तरमित्यस्य इडोपह्वानमन्त्रस्यान्तिमे भागे "इडोपहूता" (का० हौ० प० १।६) इत्येतस्मिन् होत्रा पठ्यमाने यजमानः आग्नेयं पुरोडाशं चतुर्द्धा कृत्वा ब्रध्न पिन्वस्वेति मन्त्रेण बर्हिषि आग्नेयादिषु चतसृषु विदिक्षु चतुरो भागान् निदध्यात् । अत्र आग्नेयमिति निरपेक्षतद्धितश्रवणात् केवलाग्निदेवताकपुरोडाशस्यैव चतुर्द्धाकरणावगमात् यत्र सापेक्षाग्नेर्दैवतात्वं यथा अग्नीषोमीयैन्द्राग्नादिषु, न तत्र चतुर्धाकरणम् । तेन द्विदेवत्य-बहुदेवतयोश्चतुर्द्धाकरणानामभावः । सत्रेऽपि चतुर्द्धाकरणाभावः ॥१०॥

बर्हिषि ऋत्विग्भ्य आदिशति ॥११॥

बर्हिषि अवस्थितान् पुरोडाशखण्डान् यजमानः इदं ब्रह्मणः, इदं होतुः, इदमध्वर्योः, इदमग्नीध इत्येवमृत्विक्संबन्धेन प्रकाशयेत्स्पृष्ट्वा स्पृष्ट्वा । समर्पणस्याग्रे विधानादत्रादेशः संबन्धप्रकाशनमात्रं वाचनिकम्, न अर्पणम् ॥११॥

[याज्ञिकानां मते चतुर्द्धाकरणं, प्राशित्रावदानम्, आग्नीध्रादिभागहरणं च उभाभ्याम् । कर्कमते तु प्राशित्रावदानं भागहरणं चोभ्याम्, चतुर्द्धाकरणं तु आग्नेयादेवेति]

चतुर्द्धाकरणं केवलमाग्नेयस्यैव उताऽऽग्नेयाग्नीषोमयोरिति संशये आशङ्कते—

उभौ वा, ऽविशेषात् ॥१२॥

उभावेवाग्नेयाग्नीषोमीयौ चतुर्द्धा कर्तव्यौ। कुतः? अविशेषात्। "अथ यत्र प्रतिपद्यते तच्चतुर्द्धा पुरोडाशं कृत्वा बर्हिषदं करोति" (श० ब्रा० १।८।१।४०) इति श्रुत्या पुरोडाशसामान्ये एव चतुर्द्धाकरणश्रवणात्। अथवा 'अविशेषात्' आग्नेयवत् अग्नीषोमीयस्यापि चरितार्थत्वेन प्रतिपत्तिसापेक्षत्वाविशेषादित्यर्थः।

एवं प्राप्ते तदेव सूत्रमावर्त्य सिद्धान्तपरतयाऽपि योजयति। उभौ वाऽविशेषात्। यद्यविशेषः स्यात् तर्हि उभौ चतुर्द्धा कर्त्तव्याविति युक्तं स्यात्। न त्वत्र तदस्ति। "आग्नेयं चतुर्द्धा करोति" (आप० श्रौ० ३।३।२) इति आग्नेये एव चतुर्द्धाकरणश्रवणात्। यद्यपि माध्यन्दिनशाखायां पुरोडाशमात्रे श्रवणमस्ति, तथापि शाखान्तरे "आग्नेयं चतुर्द्धा करोति" इति विशेषस्यैव श्रवणात् सामान्यशास्त्रस्य विशिष्टे उपसंहारस्य अवश्यकर्त्तव्यत्वात्। "सामान्यविधिरस्पृष्टः संह्रियेत विशेषत" (तन्त्रवा० ३।४।४७) इति न्यायेन सामान्यस्य पुरोडाशवाक्यस्य विशेषेणाग्नेयवाक्येन आग्नेयमात्रे सङ्कोचनात् आग्नेयस्यैव चतुर्द्धाकरणं, नाग्नीषोमीयस्येति भावः।

पूर्वमीमांसायाम् (३।२।२) आग्नेयमिति पुरोडाशस्यैव ग्रहणात् न पयस्यादेश्चतुर्द्धाकरणम्। चरोस्तु आग्नेयविकारत्वाद् भवति। पश्वादावपि न भवति, आग्नेयविकारत्वाभावात्।

पूर्वत्र आग्नेयात्, भागांश्च इति सूत्राभ्यामाग्नेयादेव प्राशित्र-भागहरणयोरुक्तत्वात् अवितत्सिद्धान्तार्थमपि इदं सूत्रम्। उभावपि आग्नेयाग्नीषोमीयौ प्राशित्र-भागहरणार्हौ। कुतः? अविशेषात् = हविर्मात्रस्य प्राशित्रावदानश्रवणाद् भागहरणश्रवणाच्च। आग्नेयादिति तु न आग्नेयविधानार्थम्। किन्तु आग्नेयान्मस्तकं विरुज्य इति प्रदेशविधायकविधिमनुसृत्य प्रवृत्तम्। एवं च आग्नेयाद्यत्प्राशित्रावदानं तन्मस्तकप्रादेशादेव कर्त्तव्यम्। अग्नीषोमीयस्य तु यतः कुतश्चित्प्रदेशादिति ध्येयम् ॥१२॥

"अत्र पितर"(१) इति यजमानो जपति ॥१३॥

चतुर्द्धाकृतं पुरोडाशमालभ्य यजमानो जपेत् ॥१३॥

विसृज्या"मीमदन्ते"ति ॥१४॥

चतुर्द्धाकृतं पुरोडाशं विसृज्य यजमानः सस्वरं मन्त्रं(२) जपेत् ॥१४॥

एकैकमाहरति ॥१५॥

चतुर्धा कृत्वा आदिष्टानां भागानां मध्ये एकैकं भागं ब्रह्मादिभ्यो भक्षणार्थं यजमानोऽर्पयेत् ॥१५॥

द्यावापृथिव्योरुपह्वानेऽग्नीधे षडवत्तम् ॥१६॥

"उपहूते द्यावापृथिवी" (का० हौ० प० १९) इति होत्रा पठ्यमाने अग्नीधे षडवत्तम् = अग्नीद्भागं दद्याद्यजमानः। अत्र षडवत्तशब्दो रूढ्याऽग्नीद्भागवचको, न त्ववयववृत्त्याऽवदानषट्कबोधकः। अतश्च द्विः समर्पणम्, द्विरभिघारणम्, द्विरवदानम् इत्येवं रीत्या षडवत्तसम्पादनमत्र केषांचनाभिप्रेतं न समञ्जसम्(३) ॥१६॥

---

(१) ॐ अत्र पितरो मादयध्वं यथा भागमावृषायध्वम् (२।३१)।

(२) ॐ अमीमदन्त पितरो यथाभागमावृषायिषत (२।३१)।

(३) अतश्चोपस्तरणाभिघारणादिकं विनैव अग्नीद्भागं षडवत्तपात्रे कृत्वाऽग्नीद्धस्ते निदध्यादित्यर्थः।

प्राश्ना"त्युपहूता पृथिवी"ति ॥१७॥

अग्नीत् षडवत्तमुपहूतेति (१) प्राश्नीयात् । उपहूतो द्यौरिति (२) द्वितीयं भागं प्राश्नीयादित्यपि बोध्यम् । पूर्वं चतुर्धाकरणभागस्य भक्षणं, ततः षडवत्तभागस्य, (३) तत इडाभागस्येति क्रमः ॥१७॥

आशासने "मयीद"मिति यजमानो जपति ॥१८॥

"होत्रा भूयसि हविष्करणमुपहूत" (का० हौ० प० १६) इति आशीःप्रार्थने क्रियमाणे मयीदमिति(४)यजमानः सस्वरं जपेत् । पत्नीसंयाजेडायामपि यजमानस्यैव जपो यथा स्यादित्येवमर्थं यजमानग्रहणम् ॥१८॥

उपहूतां प्राश्नन्ति युक्ताः ॥१९॥

उपहूतामिडां समवेता ऋत्विजः प्राश्नीयुः । आदौ चतुर्द्धाकरणभागस्य भक्षणं, तत इडाभागस्य ॥१९॥

यजमानश्च ॥२०॥

इडां प्राश्नीयात् । यजमानेन इडाभागस्यैवात्र भक्षणं कार्यम्, यजमानभागस्य च भक्षणमिष्ट्यन्ते विधास्यति सूत्रकारः (३. ८. २६) । प्राशित्रम्, इडा, भागाश्च यावदुक्ते अन्तापच्छिन्ने ऽपि च भवन्ति । द्रव्यसंस्कारत्वात् ॥२०॥

[वेदेः पश्चादुपविष्टा यजमानोऽध्वर्य्वादयश्च पवित्राभ्यां मार्जयन्ते]

पवित्रयोर्मार्जयन्ते ऽपरेण वेदिर्ठ० "सुमित्रिया न" (५) इति ॥२१॥

पवित्रयोरिति सप्तमी तृतीयार्थे । वेदिमपरेणोपविष्टाः ब्रह्मादय ऋत्विजो यजमानश्च पवित्राभ्यामात्मानं शोधयन्ते ॥२१॥

"यजमानस्य प्राणापानौ पात"मिति प्रस्तरे ते करोति ॥२२॥

अध्वर्युः पवित्रे प्रागग्रे प्रस्तरे स्थापयेत् । मार्जनस्येडाभक्षणनिमित्तत्वात्तदभावे ऽभावः । पवित्रप्रतिपत्तिस्तु तत्रापि भवत्येव । प्रतिपत्तिरूपत्वात् । प्रकृतत्वात्पवित्रप्राप्तौ ते इति ग्रहणं शाखापवित्रव्युदासार्थम् । तस्यापि समस्य मार्जनाप्राप्तिरतस्ते इति यत्नः क्रियते । मार्जनं तु समस्यैव भवति । प्रतिपत्तिश्च केवलयोरेवेति भावः ॥२२॥

तूष्णीं वा ॥२३॥

अथवा तूष्णीमेव पवित्रयोः प्रस्तरे निधानं, मन्त्रेण वेति विकल्पः ॥२३॥

अत्र वा ब्रह्मा प्राश्नाति ॥२४॥

अस्मिन्काले वा ब्रह्मा प्राशित्रं प्राश्नीयात् पूर्वत्र वेति भक्षणे कालविकल्पः ॥२४॥

---

(१) ॐ उपहूता पृथिवी मातोप मां पृथिवी माता ह्वयतामग्निराग्नीध्रात् स्वाहा २ । ११ ।

(२) ॐ उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात्स्वाहा १ । १२ ।

(३) षडवत्तभागसहरितो ध्रुवापुष्करभागोपरि स्थापितो ब्रह्मभागस्तु अद्यापि न समर्पित इति न तस्यात्र भक्षणम् । किंतु चतुर्धाकरणभागे—डाभागयोरेव ब्रह्मणाऽत्र भक्षणम् । षडवत्तभागसहचरितयजमानभागस्य च भक्षणं "सं यज्ञपतिराशिषेति भागं प्राश्नाति" (का० श्रौ० ३।८।२६) इति सूत्रेण इष्ट्यन्ते विहितमिति यजमानेन इडाभागस्यैवात्र भक्षणम् । प्राशित्रम्, इडा, षडवत्तादिभागश्च यावदुक्तेऽपि प्रवर्तन्ते, द्रव्यसंस्कारत्वात् ।

(४) ॐ मयीदमिन्द्रऽ इन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम् । अस्माकर्ठ० सन्त्वाशिषः सत्या नः सन्त्वाशिषः २।१०।

(५) ॐ सुमित्रिया न आप ओषधयः सन्तु ६।२२।

[चतुर्धाकरणव्यतिरिक्तभागं ब्रह्मणे आहवनीयस्य पूर्वतः समर्पयेत्]

भागमस्मै परिहरति ॥२५॥

अध्वर्युरस्मै ब्रह्मणे ध्रुवायाश्चञ्चुभागे स्थापितं ब्रह्मभागमाहवनीयं पूर्वेण समर्पयेत्, ब्रह्मा च इष्ट्यन्ते यजमानेन सह तं भक्षयेत्। कालान्तराविधानात् ॥२५॥

[अप्रोषिते यजमानाय च तद्भागं समर्पयेत्]

यजमानभागं चाऽप्रोषिते ॥२६॥

यजमाने अकृतप्रवासे सति अध्वर्युः ध्रुवायाः पुरस्तान्निहितं यजमानभागं गार्हपत्यस्य परेण यजमानाय दद्यात्। यजमानश्च इष्ट्यन्ते तद्भक्षणं कुर्यात्। तत्रैव भक्षणविधानात्। प्रोषिते यजमाने यजमानभागो ध्रुवायामेवावस्थितो भवति। ब्रह्मा च तं भागं प्रतिगृह्य प्राशित्रे निदधाति। भक्षणकाले एव इष्ट्यन्ते यजमानभागो हूयते ॥२६॥

[अन्वाहार्यमभिघार्योत्तरत उद्वास्य ब्रह्मयजमानयोर्मध्यतो हृत्वा वेदिमध्ये स्थापयित्वाऽध्वर्युरालभेत]

अन्वाहार्यमभिघार्योद्वास्यान्तरा ब्रह्मयजमानौ हृत्वा वेद्यां निधाय ऽऽलभते "प्रजापतेर्भागोऽस्यूर्जस्वान् पयस्वान् प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाह्यूर्गस्यूर्जं मयि धेह्यक्षितिरसि मा मे क्षेष्ठा अमुत्रामुष्मिन् लोक ऽइह चे"ति ॥२७॥

अध्वर्युरन्वाहार्यं स्थाल्येनाज्येनाभिघार्य उत्तरत उद्वास्य गार्हपत्यदक्षिणाग्न्यन्तरालेन प्रत्यङ् नीत्वा दक्षिणाग्नेर्दक्षिणेन ब्रह्मयजमानावन्तरालेन आहवनीयस्य पूर्वं प्रणीतोत्करावन्तरेण च हृत्वा वेदिमध्ये निधाय स्वस्थाने वेदेः पश्चादुपविश्य प्रजापतेरिति मन्त्रेणालभेत (१)।

विकृतावूर्गसीत्यस्य स्थाने दक्षिणाद्रव्यवाचिपदप्रयोगः कर्त्तव्यो गौरसीति। गोबहुत्वे गावः स्थेति। गोबहुत्वे प्रजापतेर्भागा स्थोर्जस्वत्यः पयस्वत्यः इति, पात इत्यादि च विपरिणामः। गवादिदक्षिणायां 'ऊर्जं मयि' इत्यत्र ऊर्जमित्यस्य न विपरिणामः। ऊर्गसीति दीयमानान्नसारभूतोर्गपेक्षया प्रार्थ्यमानोर्जो भिन्नत्वात्। प्रार्थ्यमानोर्ज एकत्वेऽप्यदोषात्। अभिघारणं गवादौ न प्रवर्त्तते। अर्थलोपात्। भुज्यमानौदनादिनिष्ठस्वादुतासंपत्तिर्हि अभिघारणप्रयोजनम्। अन्तराहरणं गोदक्षिणाया न भवति, विरोधात्। वस्त्रदक्षिणाया भवत्येवेति ॥ २७ ॥

सा दक्षिणा ॥ २८ ॥

य एषो ऽन्वाहार्य उक्तः सा दर्शपूर्णमासयोर्दक्षिणा भवति ॥ २८ ॥

[अन्वाहार्यस्य हविषां च उदगग्नेरवतारणमिति परिभाष्यते]

उदगुद्वासयति हवींषि ॥ २९ ॥

अन्वाहार्यं पुरोडाशादिकं हविश्च उत्करसमीपे बहिर्निष्कासयेत् ॥ २९ ॥

इति कात्यायश्रौतसूत्रवृत्तौ तृतीयाध्याये चतुर्थी कण्डिका ॥४॥

---

(१) आलम्भस्याध्वर्युकर्तृकत्वेन मन्त्रपाठोऽपि तस्यैव। आशीस्तु यजमानगतैव। "यां वै कां च ऋत्विज आशिषमाशासते यजमानस्यैव सा" (श० ब्रा० १।३।१।२१) इति लिङ्गात्। एवं च मन्त्रे ऽस्मा यजमानाभिधानमाश्रयणीयम्।

समभ्योल्मुके समिधमादायाह "ब्रह्मन्प्रस्थास्यामि, समिधमाधायाग्नि-
मग्नीत्सम्मृड्ढी"ति ॥ १ ॥

अध्वर्युः पूर्वमाहवनीयादुद्धृते उल्मुके आहवनीये एवानुयाजार्थं प्रक्षिप्य अनुयाजार्थमवशेषितां समिधमादाय 'ब्रह्मन् प्रस्थास्यामि' इति ब्रह्माणं पृच्छेत् । समिधमाधायाग्निमग्नीत्सम्मृड्ढि" इति अग्नीधं प्रेष्येत् । अवभृथेष्टौ अपोऽग्नीदिति विपरिणामः । प्रथमप्रैषस्यानुयाजार्थत्वादातिथ्यादौ (का०श्रौ० ८।१।)तदभावे ऽभावः ।वरुणप्रघासे प्रस्थास्याव इत्यूहः ॥१॥

[होता यजमानो वा समिधमनुमन्त्रयेत]

"एषा त" इति होता ऽनुमन्त्रयते ॥ २ ॥

अग्नीधा आहवनीये प्रक्षिप्तां समिधमेषा त (१) इति मन्त्रेण होता ऽनुमन्त्रयेत् । वरुणप्रघासे एते ते अग्ने समिधौ इत्यूहः कर्त्तव्यः ॥ २ ॥

अजानति यजमानः ॥ ३ ॥

अनुमन्त्रणं कर्तुं होतरि अजानति यजमान एषा त इति मन्त्रेणानुमन्त्रयेत ॥ ३ ॥

[अग्नीदनुपरिधि अग्निं सकृत् सकृत् संमृज्यात्]

सम्मार्ष्टि पूर्वदपरिक्रामर्ठ० सकृत्सकृ "त्सस्रुवाᳬस"मिति ॥ ४ ॥

अग्नीदुत्तरपार्श्वे स्थित एव दक्षिण-पश्चिमोत्तरपार्श्वेषु क्रमेणाग्निं सकृत्सकृत् प्रतिदिशं मन्त्रावृत्त्या (२) संमृज्यात् । उपरि च तूष्णीं संमृज्यात् सकृत् । अवभृथे आपो वाजजितो वाजं वः सरिष्यन्तीरित्यूहः ॥ ४ ॥

ब्रह्मानुज्ञातो ऽनुयाजैस्त्रिभिश्चरत्यौपभृतर्ठ० समानीय ॥ ५ ॥

ॐ प्रतिष्ठ इति ब्रह्मणा ऽनुज्ञातोऽध्वर्युरनुयाजार्थमुपभृत्यवशेषितमाज्यमनुयाजाङ्गभूतचतुर्थाहुत्यर्थमुपभृति किंचिदवशेष्य अवशिष्टमौपभृतमाज्यं जुह्वां समानीय त्रीननुयाजान् जुहुयात् ॥ ५ ॥

अतिक्रम्याऽऽश्राव्याह 'देवान्यजे'ति ॥ ६ ॥

अनुयाजानामनुवाक्याभावाद्याज्यार्थमेव "यज" इति होतारमध्वर्युः प्रेष्येत् ॥ ६ ॥

[सर्वत्रानुयाजेषु देवान्यजेत्येव प्रैषः]

यज यजेत्युत्तरौ ॥ ७ ॥

उत्तरौ द्वावनुयाजौ प्रति यज यज इत्येव वक्तव्यम् ॥ ७ ॥

एवं प्राप्ते सिद्धान्तमाह—

देवान्देवानिति वा सर्वत्र, नियमशब्दात् ॥ ८ ॥

वाऽवधारणे । देवान्यज इत्येव त्रिषु अनुयाजेष्वध्वर्युर्ब्रूयात् । कुतः ? "देवान्यजेत्येवाध्वर्युराह" (श० ब्रा० १।८।२।१४) इति नियमप्रतिपादकस्य एवकारस्य श्रवणात् ॥ ८ ॥

हेत्वन्तरमाह—

विकृतिदर्शनाच्च ॥ ९ ॥

विकृतौ पित्र्येष्ट्यां प्रथमानुयाजाभावेऽपि "सोऽपबर्हिषौ द्वावनुयाजौ यजति देवान्य-

(१) ॐ एषा ते अग्ने समित्तया वर्द्धस्व चा च प्यायस्व । वर्द्धिषीमहि च वयमा च प्यासिषीमहि २।१४।

(२) ॐ अग्ने वाजजिद्वाजं त्वा सस्रुवाᳬसं वाजजितर्ठ० सम्मार्ज्मि २।२७ ।

जेति" (श० ब्रा० २।६।१।४४) इति उत्तरयोरनुयाजयोर्देवान्यजेति दर्शनात् प्रकृतावपि त्रिष्वप्यनुयाजेषु देवान्यजेत्येव प्रैषः कार्यः। यत्र वरुणप्रघासेषु "यज यज" (श० ब्रा० २।५।२।४१) इति पुनर्वचनं तत्र विशेषविधानाद्यज यजेत्येव प्रयोग इति कर्कः ॥ ६ ॥

प्रतीचो जुहोति ॥ १० ॥

त्रीननुयाजानध्वर्युः प्रत्यक्संस्थान् जुहुयात् ॥ १० ॥

प्रसङ्गादाह—

उपसत्सु च ॥ ११ ॥

ज्योतिष्टोमे उपसत्संज्ञास्विष्टिषु च (का० श्रौ० ८।२) प्रत्यक्संस्थान् होमान्कुर्यात् ॥११॥

[ध्रुवस्तिष्ठन्ननुयाजान् प्रतीचो जुहुयात्]

ध्रुवः ॥ १२ ॥

अध्वर्युरेकत्र स्थित एव त्रीननुयाजान् प्रत्यक्संस्थान् जुहुयात्, न प्रत्यनुयाजं प्रत्यगपसरेदित्यर्थः ॥ १२ ॥

[अनुयाजाङ्गभूतां चतुर्थीमाहुतिं प्राचीं जुहुयात्]

चतुर्थं समानीय प्राचीम् ॥ १३ ॥

अध्वर्युर्जुहोतिस्थानमागत्योपविश्य औपभृतं जुह्वां समानीय अनुयाजाङ्गभूतां चतुर्थीमाहुतिं प्राक्संस्थां जुहुयात्। अत्र देवेभ्यः स्वाहेति होमः ॥ १३ ॥

अभिचरन्ननुयाजाननुमन्त्रण "मशन्यमुं जहि, ह्रादुन्यमुं जह्यु, स्कुष्यमुं जही" ति ॥ १४ ॥

यजमाने अभिचारकामे सति अध्वर्युः अशन्यमुमित्यादिभिस्त्रिभिर्मन्त्रैः क्रमेण त्रयाणामनुयाजानामनुमन्त्रणं कुर्यात्। समाख्यानादिदमनुमन्त्रणमध्वर्योरेव ॥ १४ ॥

प्रकृतौ अभिचाररूपफलोद्देशेन अनुयाजमाश्रित्य अनुमन्त्रणरूपो गुणो विहितः। विकृतौ च क्वचिदनुयाजप्रवृद्धौ सत्यां तदाश्रित्य अनुमन्त्रणस्यापि वृद्धौ कर्त्तव्यायां केन प्रकारेण वृद्धिरिति संशये पूर्वपक्षयति—

एवं प्रवृद्धौ समं विभजेत् ॥१५॥

अनुयाजानुमन्त्रणप्रवृद्धौ तानि समं विभजेत्। यावन्त्यनुमन्त्रणानि तत्र सर्वेष्वपि प्राकृतानुयाजत्रयानुमन्त्रणधर्माणां समशो विभागः कर्त्तव्यः। अर्थात् नवानुयाजस्थले आदितस्त्रयाणां प्रथमानुयाजधर्माः, ततस्त्रयाणां द्वितीयस्य धर्माः, अवशिष्टानां त्रयाणां तृतीयधर्माः कार्याः। "समं स्यादश्रुतत्वात्" (पू० मी० १०।३।५३) इति न्यायात्। यत्र विभागविशेषे प्रमाणं न श्रुतं, तत्र सममेव विभागः कार्य इति न्यायार्थः ॥१५॥

एवं प्राप्ते सिद्धान्तयति—

स्वस्थानान्त्येन वोपायित्वात् ॥१६॥

विकृतौ पठ्यमानानामनुयाजानुमन्त्रणानां यत्स्वं स्थानं प्रथमान्तर्यादिरूपं, तेनैव सह धर्मसंबन्धः कर्त्तव्यः। कुतः ? उपायित्वात्। तमेव देशं प्रति एतेषां प्राप्तत्वात्। इदमुक्तं भवति। प्रथमे ऽनुयाजे ऽनुष्ठिते द्वितीयस्यानुष्ठाने अकृते तस्यां दशायां तस्यैवापेक्षा भवतीति कृत्वा तस्यैवोपस्थितत्वात्तस्यैवावृत्तिः कार्या, न प्रथम तृतीयानुमन्त्रणमन्त्रयोः। द्वितीयस्य समाप्त्यनन्तरं तृतीयस्य स्थानमिति कृत्वा तृतीयस्यैवाभ्यासः। अतश्च द्वितीयप्रभृति पञ्चम-

पर्यन्तं नराशंस्य द्वितीयस्यानुयाजस्याभ्यासः । षष्ठप्रभृति नवमपर्यन्तं तृतीयस्य स्विष्टकृदनुयाजस्याभ्यासः कार्यः ॥१६॥

एत्य जुहूपभृतौ व्यूह "त्यग्नीषोमयो"रिति जुहूं प्राचीं दक्षिणेनोत्तानेना "ग्नीषोमौ त"मितीतरेणेतरां नीचा प्रतीचीम् ॥ १७ ॥

यजमानो वेदेः पश्चादागत्य जुहूपभृतौ प्रेरयति । तदेव स्पष्टयति । अग्नीषोमयोरिति-(१)मन्त्रेण दक्षिणहस्तेनोत्तानेन जुहूं प्रस्तरात्प्राचीं प्रेरयेत् । अग्नीषोमाविति (२) मन्त्रेण सव्येन पाणिना अधोमुखेन प्राङ्मुखीमेवोपभृतं प्रतीचीं प्रेरयेत् । विकृतौ "शूर्पेण जुहोति" (श० ब्रा० ५।५।२।२३) इत्यादौ जुहूस्थानापन्नानां शूर्पादीनामपि व्यूहनं भवति ॥ १७ ॥

यथादेवतमन्यत् ॥ १८ ॥

[अध्वर्युर्वा मन्त्रोहेन जुहूपभृतौ पूर्ववद् व्यूहेत्]

अध्वर्युर्वा "ऽनूज्जयत्वयं यजमानो व्वाजस्यैन"मिति पूर्वे, "यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टी"त्युत्तरे ॥ १९ ॥

अथवा अध्वर्युः स्रुचौ व्यूहति । तत्र पूर्वे जुह्वा व्यूहनमन्त्रे, उत्तरे च उपभृद्व्यूहनमन्त्रे विशेषः । व्यूहनस्येष्टदेवतासङ्कीर्त्तनार्थत्वादन्तापच्छिन्ने आतिथ्यादावपि प्रयोगः ॥१९॥

[जुहूमभ्युक्ष्य तदाज्येन परिधीन् पश्चिमादिक्रमेणाञ्ज्यात्]

अभ्युदय जुह्वा परिधीननक्ति यथापूर्वम् ॥ २० ॥

अध्वर्युः वेदगृहीतैः प्राणीतोदकैर्जुहूमभ्युदय जुहूस्थेनाज्येन पश्चिम-दक्षिणोत्तरपरिधीन् क्रमेणाञ्ज्यात् ॥ २० ॥

इति कातीयश्रौतसूत्रवृत्तौ तृतीयाध्याये पञ्चमी कण्डिका ॥५॥

"वसुभ्य" इति प्रतिमन्त्रम् ॥ १ ॥

वसुभ्य(३) इति त्रिभिर्मन्त्रैः परिधित्रयमञ्ज्यादिति पूर्वेण सम्बन्धः । अनज्मीत्यस्य त्रिष्वपि मन्त्रेष्वध्याहारः, साकाङ्क्षत्वात् । मध्यमपरिध्यञ्जनस्य रुद्रदेवताकत्वाभावेन नात्रोदकोपस्पर्शनम् ॥१॥

[प्रथमं परिधिं गृहीत्वा सूक्तवाकाय होतारं प्रेष्येत्]

प्रथमं परिधिं गृहीत्वा ऽऽश्राव्या "हेषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूही"ति ॥ २ ॥

अध्यर्युर्मध्यमं परिधिं स्पृष्ट्वा आश्राव्य इषितेति मन्त्रेण होतारं प्रेष्येत् । दर्विहोमेषु प्रैषाभावे परिधेरप्यनालम्भः ॥ २ ॥

---

(१) ॐ अग्नेरग्नीषोमयोरग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि २।१५।

(२) ॐ अग्निरग्नीषोमावग्नीषोमौ तमपनुदन्तु यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टि वाजस्यैनं प्रसवेनापोहामि २।१५।

(३) ॐ वसुभ्यस्त्वा अनज्मि । ॐ रुद्रेभ्यस्त्वा अनज्मि । ॐ आदित्येभ्यस्त्वा अनज्मि ।२।१६।

पशौ प्रेष्येति ॥ ३ ॥

पशुयागे 'ब्रूहि' इति मन्त्रघटकपदस्य स्थाने 'प्रेष्य' इति संयोज्य मैत्रावरुणं प्रेष्येत् ॥ ३ ॥

''सञ्ज्ञानाथा''मिति (१) प्रस्तरादानम् ॥ ४ ॥

अध्वर्युर्हस्तेन प्रस्तरं गृह्णीयात् ॥ ४ ॥

विधृती स्थाने कृत्वा ऽनक्त्येनं ''व्यन्तु व्वय'' इति ॥ ५ ॥

प्रस्तरस्याधारभूते विधृती आहवनीये प्रक्षिप्य प्रस्तरं स्रुक्षु मन्त्रावृत्त्या (२) अञ्ज्यात्। उपभृदाद्यभावे ऽपि प्रस्तरः स्थाल्याज्येनाज्यत एव। संस्कारत्वात् ॥ ५ ॥

कथमित्यपेक्षायामाह—

अग्रं जुह्वा, मुपभृति मध्यं, मूलमितरस्याम् ॥ ६ ॥

अध्वर्युः प्रस्तरस्याग्रं जुह्वामक्त्वा तस्य मध्यमुपभृति अक्त्वा तस्य मूलं ध्रुवायामञ्ज्यात् ॥ ६ ॥

[प्रस्तरात्तृणमादाय सूक्तवाकान्तेऽनुप्रहरेत्]

''मरुता''मिति(३) नीचैर्हृत्वा तृणमादायाऽनुप्रहरति ॥ ७ ॥

प्रस्तरं स्रुचां दक्षिणेनापरेण च प्रादक्षिण्येन भूमिलग्नमिव आहवनीयसमीपे होमार्थमानीय प्रस्तरमध्यादेकं तृणं परिशेष्य प्रस्तरमाहवनीये होतृपठितसूक्तवाकान्ते प्रक्षिपेत् ॥ ७ ॥

हस्तेनाचरति ॥ ८ ॥

अध्वर्युः प्रस्तरं हस्तेनैवाहवनीये प्रक्षिपेत्। हस्तशब्देन काष्ठादीनां व्यावृत्तिः। अत्र प्रस्तरस्याहवनीये प्रक्षेपमात्रमेव, न होमः। अतस्त्यागो न कार्यः ॥ ८ ॥

प्रसङ्गादाह—

यजमानभागं च प्रोषिते ॥ ९ ॥

कृतप्रवासे यजमाने यजमानभागं चाध्वर्युर्हस्तेनैव जुहुयात्, न जुह्वादिना। अयं च यजमानभागप्रक्षेपो यदा तस्य गमनं विहितं व्रतविसर्गकाले, तत्रैव कार्यः ॥ ९ ॥

क्षत्रियवैश्ययोश्च नित्यम् ॥१०॥

क्षत्रियवैश्ययोर्यजमानयोः प्रोषितयोरप्रोषितयोर्वा तयोर्भागं हस्तेनैव जुहुयात्। नहि तयोर्भागप्राशनं विहितमस्ति ॥१०॥

त्रयाणां वर्णानां भागहोमे मन्त्रमाह—

''अहं त्वदस्मि मदसि त्वमेतन्ममस त्वं योनिस्तवयोनिरस्मि। ममैव सन्दिवि देवेष्वधि पुत्रः पित्र्ये लोकक्रृज्जातवेदः स्वाहे''ति ॥११॥

अनेन मन्त्रेण होमः कार्यः ॥११॥

सूक्तवाकान्ते ॥१२॥

यत्पूर्वमुक्तं तृणमादायानुप्रहरतीति तत्सूक्तवाकान्ते कार्यम्।

(१) ॐ सञ्ज्ञानाथां द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्याऽवताम् २।१६।

(२) ॐ व्यन्तु वयोऽक्तं० रिहाणाः ।२।१६।

(३) ॐ मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह ।२।१७।

सूक्तवाक-प्रस्तरप्रहरणयोः कालार्थः संयोगो, (पूर्वमीमांसायां (३।२।५) तु कालार्थतां पूर्वपक्षीकृत्य अङ्गाङ्गिभाव एव सिद्धान्तितः) नाङ्गाङ्गिलक्षणः। प्रस्तरस्य स्रुग्धारणार्थतया सूक्तवाकस्य चेष्टदेवतासङ्कीर्त्तनार्थतया उभयोरपि परार्थत्वेन परस्परमङ्गाङ्गिलक्षणसंबन्धस्या-
सम्भवात्। अतश्च आतिथ्यादौ प्रस्तरप्रहरणाभावेऽपि सूक्तवाकः प्रयुज्यत एव ॥१२॥

अग्नीदाहानुप्रहरेति ॥१३॥

अग्नीत् अध्वर्युम् अनुप्रहर इत्यध्येष्यति ॥१३॥

प्रास्य तृणं, "चक्षुष्पा" इत्यात्मानमालभते ॥१४॥

अग्नीधाऽध्येषितोऽध्वर्युः प्रस्तरात्पृथक्कृतं तृणमाहवनीये तूष्णीं प्रक्षिप्य आत्मानं हृदयदेशे चक्षुष्पा(१) इति स्पृशेत् ॥१४॥

संवदस्वागानग्नीदगञ्छ्रावय श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूहीत्येतेषाᳪं संवदस्वागञ्छ्रौषडित्यग्नीच्छेषमितरो व्यत्यासं ब्रूतः ॥१५॥

संवदस्वेत्यादीनां मध्ये संवदस्व, अगन्, श्रौषट् इत्यग्नीद् ब्रूयात्। अगानग्नीत्, श्रावय, स्वगा दैव्या इत्याद्यध्वर्युर्ब्रूयात्। उभावपि न निरन्तरं ब्रूतः, किन्तु व्यत्यासं ब्रूतः। पूर्वं संवदस्वेत्यग्नीत्। ततोऽध्वर्युः अगानग्नीदिति। ततोऽग्नीदगन्निति, ततोऽध्वर्युः श्रावयेति एवं क्रमेणेत्यर्थः। अस्य च शंयोर्वाकार्थत्वात्तदभावे निवृत्तिः। शंयोर्वाकश्चादृष्टार्थत्वात्-यावदुक्ते निवर्त्तते। तन्निवृत्तौ च संवदस्वेत्यादीनां निवृत्तिः। तेषां तदर्थत्वात् ॥१५॥

[परिधीननुप्रहरेत्]

परिधीननु प्रहरति "यं परिधि"मिति प्रथम, मितरौ च युगप"दग्नेः प्रिय"मिति ॥१६॥

अध्वर्युर्हस्तेनैव परिधीनाहवनीये प्रक्षिपेत्। तत्र प्रथमं यं परिधिमिति(२) मन्त्रेण। इतरौ च युगपत्सहैवप्रक्षिपेदग्नेरिति(३) मन्त्रेण। प्रतिपत्तित्वाद् यावदुक्तान्तापच्छिन्नयोरप्यस्य प्रवृत्तिः। अवभृथे मन्त्रद्वयघटकाग्निपदयोर्विपरिणामः ॥१६॥

[संस्रवहोमः]

स्रुचौ प्रगृह्णाति "सᳪंस्रवभागा"(४) इति सᳪंस्रवाञ्जुहोति ॥१७॥

अध्वर्युर्जुहूपभृतौ तूष्णीमादाय तदुभयसंलग्नमाज्यं ताभ्यामेव जुहुयादुत्तरत उपविश्य। विश्वे देवाश्चात्र देवता। अतश्च यत्र दर्विहोमादौ मन्त्राभावस्तत्र विश्वेभ्यो देवेभ्य इत्याहुतिः(५)। संस्रवहोमस्य प्रतिपत्त्यर्थकर्मत्वादन्तापच्छिन्नेऽपि प्रवृत्तिः ॥ १७ ॥

---

(१) ॐ चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहि ।२।१६।

(२) ॐ यं परिधिं पर्यधत्था अग्ने देव पणिभिर्गुह्यमानः। तं त एतमनु जोषं भराम्येष नेरवदपचेतयातै २।१७।

(३) ॐ अग्नेः प्रियं पाथोऽपीतम् २।१७।

(४) ॐ सᳪंस्रवभागा स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः। इमां वाचमभि विश्वे गृणन्त आसद्यास्मिन्बर्हिषि मादयध्वᳪं स्वाहा वाट् २।१७।

(५) अत्र मन्त्रस्थस्वाहापदोच्चारणकाले एव होमः कार्यः। एवं च स्वाहाकारः सर्वत्र साकाङ्क्षत्वात्" (का० श्रौ० ४।४।१५) इति सूत्रेण सामान्यतो मन्त्रान्ते स्वाहाकारोच्चारणस्य विधानेऽपि यत्र मन्त्रे एव स्वाहाकारस्य पाठः आदौ मध्येऽवसाने वा तत्रैव होमः कार्यो, न पुनः स्वाहाकारस्य मन्त्रान्ते संयोजनम्।

अस्य प्रतिपत्त्यर्थकर्मोभयरूपत्वात् प्रतिपत्त्यंशमादायान्तापच्छिन्नेऽपि प्रवृत्तिरस्त्येव। स्रुक्स्थस्याऽज्यस्य पूर्वमेव निरवशेषितत्वात् संस्रवाणां न यागाङ्गत्वम्। किन्तु पात्रसंलग्नाज्यप्रवृत्त्यर्थतैव। अतश्च यत्र कर्मणि पूर्वकृतहोमसंबन्ध्याज्यं पात्रे संलग्नं भवति तत्र सर्वत्रापि अयं होमो भवत्येव।

[अनसि चेद् हविर्ग्रहणं, तदा धुरि स्रुचौ निदध्यात्]

"घृताची" इति धुरि निदधात्यनसि चेद् ग्रहणम् ॥१८॥

यदि अनस्तो हविः पूर्वं गृहीतं, तदा घृताची(१) इति मन्त्रेणानसो धुरि स्रुचौ स्थापयेत्। द्रव्यसंस्कारत्वात्सर्वत्र प्रवृत्तिः। पशौ स्रुग्बहुत्वे सर्वासां निधानम्। घृताच्य स्थ धुर्यौ पातं स्थाद्यूहश्च कार्यः। गृहमेधीयायां (का० श्रौ० ५।८) जुह्वा एकत्वाद् घृताच्यसि धुर्यौ पाहि इत्याद्यूहः ॥१८॥

[पात्र्यां चेद्धविर्ग्रहणं, स्फ्ये स्रुचोर्निधानम्]

स्फ्ये पात्र्यां चेत् ॥१९॥

यदि इडापात्र्यां हविर्गृहीतं तदा वेद्या उत्तरांसे स्फ्यमुदगग्रं निधाय तत्र प्रागग्रे जुहूपभृतौ आसादयेत् ॥ १९ ॥

"यज्ञ नमश्च त" इति (२) वेदिमालभते ॥२०॥

अध्वर्युः। स चायं वेद्यालम्भो वेदिसंस्कारोऽपि समिष्टयजुःसाधनीभूतद्रव्यनिक्षेपार्थमेव क्रियते। अतो यत्र समिष्टयजुरभावस्तत्र तत्साधनद्रव्यस्याप्यभावात् न तदर्थो वेद्यालम्भोऽपि कर्त्तव्यः ॥२०॥

[वेदं, स्रुक्स्रुवम्, आज्यस्थालीं च होत्रध्वर्य्वग्नीध आदाय गार्हपत्यं गच्छेयुः]

वेदꣳ होता, स्रुक्स्रुवमध्वर्यु, राज्यस्थालीमग्नीदादाय ॥२१॥

होता वेदमादाय, अध्वर्युः जुहूं स्रुवं चादाय, आज्यस्थालीमग्नीदादाय, गार्हपत्यं गच्छन्तीति अग्रेण संबन्धः ॥ २१ ॥

इति कातीयश्रौतसूत्रवृत्तौ तृतीयाध्याये षष्ठी कण्डिका ॥६॥

[अध्वर्युराहवनीयस्य पूर्वतो गार्हपत्यस्य पश्चिमतो वा तत्रापि पत्न्या मध्यतो वा बाह्यतो वा गार्हपत्यस्येशानदेशं गत्वोपविश्य दक्षिणं जानु भूमौ निपात्य जुहुयात्]

पत्नीसंयाजेभ्यो गार्हपत्यं गच्छन्ति ॥१॥

होत्रध्वर्य्वग्नीधः पत्नीसंयाजार्थं गार्हपत्यसमीपे गच्छेयुः ॥ १ ॥

तत्राध्वर्योर्गमनाय मार्गमाह—

अध्वर्युः पूर्वदक्षिणेन गार्हपत्यमेत्य पूर्वेणाऽपरेणाऽन्तरेण पत्नीमेकेषाम् ॥२॥

अध्वर्युः पूर्वदक्षिणेन गार्हपत्यमेत्य = गार्हपत्यदक्षिणाग्न्योरन्तरालेनागत्य, अथवा आहवनीयस्य पूर्वेण वितानस्य दक्षिणेन गार्हपत्यं गच्छेत्। अथवा गार्हपत्यस्य पश्चिमेन गच्छेत्। तत्रापि मार्गद्वयम्। गार्हपत्यदक्षिणाग्न्योर्मध्यतो गत्वा पत्न्या मध्यतो गच्छेत्। अथवा अप्रदक्षिणं गार्हपत्यं गच्छेत्। अस्मिन्पक्षे पत्न्या बाह्यत इत्यर्थात्सिद्ध्यति ॥ २ ॥

उपविश्य दक्षिणं जान्वाच्य ॥३॥

अध्वर्युरुपविश्य दक्षिणं जानु भूमौ पातयित्वा जुहुयात् ॥ ३ ॥

---

(१) ॐ घृताचीस्थो धुर्यौ पातꣳ० सुम्ने स्थः सुम्ने मा धत्तम् २।१८।

(२) ॐ यज्ञ नमश्च त उप च यज्ञस्य शिवे सन्तिष्ठस्व स्विष्टे मे सन्तिष्ठस्व २।१७।

उपविष्टहोम सार्वत्र

[उपविष्टहोमः सर्वत्र दक्षिणजानुनिपातपूर्वकः]

प्रसङ्गादाह—

एवꣳ सर्वत्रोपविष्टहोमेषु ॥४॥

सर्वत्रोपविष्टहोमेषु पूर्वाघार-दक्षिणाग्निहोमादिषु एवमेव उपविश्य दक्षिणं जान्वाच्य होमः कार्यः ॥ ४ ॥

[चरणशब्दोपादाने सर्वं कर्मोपांशु, अन्यत्रोपांशुत्वश्रवणं देवतामात्रगतम्]

उपाꣳशु चरन्ति ॥ ५ ॥

पत्नीसंयाजाख्यं कर्म सर्वमुपांशु कुर्युः ॥ ५ ॥

प्रसङ्गादाह—

चरणशब्दे सर्वं देवताऽन्यत्र ॥६॥

यत्र विधिवाक्ये चरतिशब्दः श्रूयते यथा—"उपाꣳशु चरन्ति" (का० श्रौ० ७।२।२६) इति, तत्र सर्वं कर्म उपांशु कार्यम् । यत्र चरणशब्दोपादानं विनैव उपांशुत्वं विधीयते यथा—"विष्णुरुपांशु यष्टव्य" (शां० श्रौ० १।८।८) इति । तत्र देवतामात्रमुपांशु प्रयोज्यम् । अन्यत्सर्वं मुच्चैरुच्चारणीयम् । विष्णवेऽनुब्रूहि, विष्णुं यज इत्यादौ देवताबोधकविष्णवादिशब्दमुपांशु पठित्वा अनुब्रूहीत्यादिकमुच्चैः पठनीयमित्यर्थः ॥ ६ ॥

[स्थाल्याज्येन सोमादीन्यजेत]

यजति सोमं, त्वष्टारं, देवानां पत्नीः, रग्निं गृहपतिमिति ॥ ७ ॥

स्थाल्याज्येन चतस्रो देवता यजेदध्वर्युः ॥ ७ ॥

[देवपत्न्युद्देश्यके तृतीये पत्नीसंयाजे पुरस्तात् कटादिना ऽन्तर्द्धानम, पत्नीकर्तृकोऽध्वर्योरन्वारम्भश्च ।]

तृतीयेऽन्तर्धानं पुरस्तात् ॥ ८ ॥

तृतीयपत्नीसंयाजानुष्ठानकाले गार्हपत्यस्य पुरतः अन्तर्धानकटाख्येन पात्रेण तिरोधानं कुर्यादध्वर्युः ॥ ८ ॥

पत्न्यन्वारभतेऽध्वर्युम् ॥ ९ ॥

तृतीयपत्नीसंयाजानुष्ठानकाले पत्नी अध्वर्युं कुशैरन्वारभेत । स चायमध्वर्युसंस्कारो द्वितीयानिर्देशात् । अतः पत्न्यभावे ऽपि येन केनचित्कार्यः ॥ ९ ॥

शंय्वन्तं भवतीडान्तं वा ॥ १० ॥

वाशब्दस्य शंय्वन्तपदेन संबन्धः । श्रुतौ (श० ब्रा० १।९।२।१४) तथैव श्रवणात् । तेनायमर्थः । पत्नीसंयाजाख्यं कर्म इडान्तं भवति । तत्र शंयुर्भवति नवेति विकल्पः । पत्नीसंयाजाश्च यावदुक्ते निवर्त्तन्ते, अर्थकर्मत्वात् ॥ १० ॥

शंयुवाककरणपक्षे विशेषमाह—

शंय्वन्ते वेदतृणमादायानक्ति प्रस्तरवत्स्रुचि स्रुवे स्थाल्यां च ॥ ११ ॥

शंयुवाके क्रियमाणे वेदतृणं गृहीत्वा प्रस्तरवत् अग्रं जुह्वां, मध्यं स्रुवे, मूलं स्थाल्यां व्यन्तु वय इति मन्त्रावृत्त्या अञ्ज्यादध्वर्युः ॥ ११ ॥

अग्नीदाहानुप्रहरेति ॥ १२ ॥

अध्वर्युम् ॥ १२ ॥

प्रास्य तृणादि पूर्ववत् ॥ १३ ॥

प्रास्य तृणं चक्षुष्पा इत्यादि शंयोर्ब्रूहीत्यन्तं (का० श्रौ० २।८।१४-१५) पूर्ववत्कर्म भवति ॥ १३ ॥

शंय्वन्ते स्रुक्स्रुवं प्रगृह्णात्यग्ने "ऽदब्धाय"विति ॥१४॥

शंयोर्वाकान्ते कर्मणि कृते अध्वर्युः स्रुक्स्रुवं तूष्णीं प्रगृह्य गार्हपत्ये अग्नेऽदब्धायो(१) इति मन्त्रेण जुहुयात्। अस्य पत्नीसंयाजशेषसाध्यत्वाद्यावदुक्ते गृहमेधीयादौ पत्नीसंयाजाभावे (का० श्रौ० ५।८।१२) अस्याप्यभावः। पशौ पत्नीसंयाजानां जाघनीकरणकत्वात् (का० श्रौ० ६।६।१४) तत्र संस्रवप्रतिपाद्यरूपद्रव्यस्याप्यभावः। यावदुक्तान्तापच्छिन्नयोरपि पत्नीसंयाजानामभावः, अदृष्टार्थत्वादनयोः ॥ १४ ॥

[दक्षिणाग्नौ होमः]

सव्येनावृत्य दक्षिणाग्नौ जुहो"त्यग्नय" इति "सरस्वत्या" इति च ॥ १५ ॥

अध्वर्युर्गार्हपत्यं प्रदक्षिणं परीत्य दक्षिणाग्नौ सकृद्गृहीतमाज्यमग्नय (२) इति, सरस्वत्या (३) इति च जुहुयात्। अर्थकर्मत्वाद्यावदुक्तान्तापच्छिन्नादौ निवृत्तिरस्य। यदि पूर्वदक्षिणेन गार्हपत्यं प्रविष्टस्तदा सव्येनावृत्तिः कार्या। अन्यथा नेति कर्कादयः ॥ १५ ॥

इति कातीयश्रौतसूत्रवृत्तौ तृतीयाध्याये सप्तमी कण्डिका ॥७॥

[पिष्टलेपहोमो दक्षिणाग्नावग्न्युद्देशेन]

"उलूखले मुसले यच्च शूर्पे ऽआशिश्लेष दृषदि यत्कपाले उत्प्रुषो विप्रुषः संजुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहे"ति पिष्टलेपाञ्जुहोति ॥१॥

अध्वर्युः पिष्टलेपान् जुह्वां निधाय दक्षिणाग्नौ जुहुयात्। पिष्टलेपानां प्रतिपाद्यत्वादस्य प्रतिपत्तिकर्मत्वात् इडान्तेऽपि प्रवृत्तिः। अस्य च होमत्वेन देवतापेक्षायां सत्यां पिष्टलेपस्य पुरोडाशसंबन्धित्वात् तदीयदेवतयोः आग्नेयाग्नीषोमयोरुपस्थितावपि एकयैव देवतया कार्याभिनिवृत्तिसिद्धेः प्रथमोपस्थितः अग्निरेव देवतात्वेन संबध्यते। अतश्च अस्मिन् होमे अग्नेर्देवतात्वं प्रकृतौ विकृतौ चेति कर्कसिद्धान्तः ॥१॥

[पत्न्या वेदयोक्त्रविमोकः]

पत्नी वेदं प्रमुञ्चति "वेदो ऽसी"ति, योक्त्रं च "प्र मा मुञ्चामि वरुणस्य पाशाद्येन मा ऽबध्नात्सविता सुशेवः। ऋतस्य योनौ सुकृतस्य लोके ऽरिष्टां मा सह पत्या दधात्वि"ति ॥ २ ॥

पत्नी वेदं वेदोऽसीति (४) मन्त्रं पठित्वा विस्रंसयेत्। प्रमेति मन्त्रेण योक्त्रं च विस्रंसयेत्। प्रतिपत्तिरूपत्वाद्न्तापच्छिन्नेऽपि प्रवृत्तिरस्य ॥ २ ॥

---

(१) ॐ अग्नेऽदब्धायोऽशीतम पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्या अविषन्नः पितुं कृणु सुषदा योनौ स्वाहा वाट् २।१८।

(२) ॐ अग्नये संवेशपतये स्वाहा २।१८।

(३) ॐ सरस्वत्यै यशोभगिन्यै स्वाहा २।२०।

(४) ॐ वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः २।२१।

[वेदं वेदिं यावत् स्तृणाति होता]

स्तृणात्यावेदेः ॥ ३ ॥

होता गार्हपत्यस्योत्तरत आरभ्य वेदेः पूर्वान्तं यावद्वेदं स्तृणीयात्। अभिविधावयमाङ् ॥ ३ ॥

[ध्रौवाज्यस्य जुह्वा वातोद्देशेन उपविश्य होमः]

ध्रौवर्ठ० समिष्टयजुर्जुहोति "देवा गातुविद"(१) इति ॥ ४ ॥

अध्वर्युर्ध्रौवमाज्यं जुह्वां गृहीत्वा वातोद्देशेन जुह्वा समिष्टयजुःसंज्ञकं होममाहवनीये कुर्यात्। अर्थकर्मत्वादस्य अन्तापच्छिन्नादावप्रवृत्तिः। अत्र होमे वातस्य देवतात्वमिति कर्कः। अतो दर्विहोमे वातःय स्वाहेति होमः ॥ ४ ॥

[बर्हिर्होमः]

बर्हिः "सम्बर्हि"(२) रिति ॥ ५ ॥

वेद्यां स्तृतं बर्हिः सर्वं जुह्वां निधायाऽऽहवनीये जुहुयात्। बर्हिषां चरितार्थत्वात्प्रतिपत्तिरूपतया अन्तापच्छिन्नेऽपि बर्हिर्होमः प्रवर्त्तते ॥ ५ ॥

[अध्वर्युराहवनीयं परितो गत्वा प्रणीता अपो वेद्यां निनयेत्]

वेद्यां प्रणीता निनयति परीत्य "कस्त्वे"ति ॥ ६ ॥

अध्वर्युर्वेदिमध्ये दक्षिणसङ्ग्रहसमीपे प्रणीता आसाद्य स्वयमाहवनीयं प्रदक्षिणीकृत्य ब्रह्मयजमानयोरन्तराले उदङ्मुख उपविश्य कस्त्वेति(३)मन्त्रेण प्रणीता अपो भूमौ निनयेत्। अत्र मन्त्रे निनयामीत्यध्याहारः। प्रणीताप्रणयनं प्रतिपत्तिश्चरितार्थत्वात्। अतश्चान्तापच्छिन्नेऽपि भवति। नाशदोषादौ प्रायश्चित्तमात्रं, न पुनरुत्पत्तिः ॥ ६ ॥

पुरोडाशकपालेन कणानपास्यत्यधः कृष्णाजिनर्ठ० "रक्षसा"मिति ॥ ७ ॥

फलीकरणानन्तरं स्थापितान् कणान् प्रथमकपाले निधाय उत्करस्योपरि समीप एव कृष्णाजिनं सव्येन धारयन् कृष्णाजिनस्याधस्तात् उत्करे कपालेनैव रक्षसामिति (४) मन्त्रेण क्षिपेत्। अत्र देवताबोधकचतुर्थ्यादेरभावेन कर्मणो रक्षोदेवताकत्वाभावात् नात्रोदकस्पर्शः। चर्विष्टौ पुरोडाशश्रपणाभावे ऽपि कणापासनार्थं कपालमात्रमुपादेयम्। कणापासने कपालस्य करणत्वश्रवणात् ॥ ७ ॥

पूर्णपात्रं निनयति परीत्य सन्ततं यजमानोऽञ्जलिना प्रतिगृह्णाति "संवर्चसे"ति ॥ ८ ॥

अध्वर्युः पूर्णपात्रमादाय आहवनीयं प्रदक्षिणीकृत्य यजमानसमीपे उदङ्मुख उपविष्टो यजमानस्याञ्जलौ पूर्णपात्रस्थं जलमव्यवच्छिन्नं क्षिपेत्। यजमानस्तदुदकं हस्ताभ्यां संवर्चसेति

---

(१) ॐ देवा गातुविदो गातुं वित्वा गातुमित। मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः २।२१

(२) ॐ संबर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्वसुभिः सं मरुद्भिः। समिन्द्रो विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत् स्वाहा २।२२।

(३) ॐ कस्त्वा विमुञ्चति स त्वा विमुञ्चति कस्मै त्वा विमुञ्चति तस्मै त्वा विमुञ्चति। पोषाय निनयामि २।२३।

(४) ॐ रक्षसां भागोऽसि २।२३।

गा. आ.

५

होता ग

वयमाङ् ॥ ३ ॥

प्रौवर्ह०

अध्वर्युर्ध्रौ

कुर्यात्। अर्थकर्म

कर्कः। अतो दर्वि

वेद्यां स्तृतं

पत्तिरूपतया अन्त

वेद

अध्वर्युर्वेदि

ब्रह्मयजमानयोरन्तर

अत्र मन्त्रे निनयामी

ऽपि भवति। नाशदे

पुरोडाशकपाले

फलीकरण

कृष्णाजिनं स्न्येन

क्षिपेत्। अत्र देवत

बर्हिष्टो पुरोडाशश्रप

स्य करणत्वश्रवणात

पूर्णपात्रं नि

अध्वर्युः पूर

यजमानस्याञ्जलौ पू

(१) ॐ दे

(२) ॐ सं

द्र्यं नभो गच्छतु यत्

(३) ॐ कर

पात्र निनयामि २।२२

(४) ॐ रक्ष

गृह्णीयात्। अञ्जलिप्रक्षेपश्च तथा कार्यो यथा यजमानस्य संवर्चसेति(१) मन्त्रपाठान्ते भवेत्। "आधारे धारायां चादिसंयोग" (आप० श्रौ०२४।२।२) इति सूत्रात्। अत्र ग्रहणं प्रधानं, निनयनं तदर्थम्। तेन प्रोषिते यजमाने यत्र यजमानस्तत्रैव पूर्णपात्रनिनयनं केन चित्करणीयं, यजमानेनाञ्जलिना प्रतिग्रहश्च कार्यः। अस्यार्थकर्मत्वादन्तापच्छिन्नादौ निवृत्तिः। द्वादशाहादौ च यजमानानां बहुत्वेन सर्वयजमानार्थं निनयनं कार्यम्। सर्वैरपि यजमानैर्ग्रहणमपि कर्तव्यम् ॥८॥

मुखं विमृष्टे ॥ ९ ॥

पूर्णपात्रजलेन यजमानस्तूष्णीं मुखं प्रक्षालयेत् ॥ ९ ॥

(विष्णुक्रमान् प्रागुदग्वा क्रामेत्)

विष्णुक्रमान् क्रमते "दिवि विष्णु"रिति प्रतिमन्त्रं "पृथिव्या"मितीत ऽऊर्ध्वो वा ॥ १० ॥

यजमान उत्थाय दक्षिणवेदिश्रोणेरारभ्य आहवनीयादर्वाक् प्राङ्मुखो दिवि विष्णुरिति (२) त्रिभिर्मन्त्रैर्विष्णुक्रमसंज्ञकान् क्रमणान् कुर्यात्। अथवा पृथिव्यामिति प्रथमं क्रामेत्, अन्तरिक्षे इति द्वितीयम्, दिवि विष्णुरिति तृतीयमिति मन्त्रक्रमे विकल्पः। विष्णुक्रमणस्य पदार्थत्वादन्तापच्छिन्ने निवृत्तिः ॥ १० ॥

"अस्मादन्ना"दिति(३) भागमवेक्षते ॥११॥

यजमानः स्वकीयं भागं पश्येत्। यजमान उत्थित एव पश्यतीत्याचारः। स्वस्थाने उपविश्य पश्येदिति देवयाज्ञिकः। एवं भूम्यवेक्षणेऽपि बोध्यम्। अस्मिन्मन्त्रे, अस्यै प्रतिष्ठाया इति मन्त्रे च निर्भक्त इत्याद्यनुषज्यते, साकाङ्क्षत्वात। अनुषङ्गस्य वैदिकत्वात्पूर्वमन्त्रेण सह सन्धिर्भवति। भागसंस्कारत्वादस्यान्तलुप्तेऽपि प्रवृत्तिः ॥११॥

"अस्यै प्रतिष्ठाया" इति(४) भूमिम् ॥१२॥

वेदभूमिं पश्यति यजमानः। भूम्यवेक्षणस्यार्थकर्मत्वादन्तलुप्ते निवृत्तिः। एवं प्राचीक्षणम्, आहवनीयेक्षणं, सूर्यावेक्षणं चान्तलुप्ते निवर्त्तते। अर्थकर्मत्वात् ॥१२॥

"अगन्म स्व"रिति(५) प्राङ् ॥१३॥

प्राचीं दिशं पश्येद्यजमानः ॥१३॥

"सञ्ज्योतिषे"(६) त्याहवनीयम् ॥१४॥

पश्यति यजमानः। वरुणप्रघासेषु वेदिद्वयस्यावेक्षणमग्न्योश्च ॥१४॥

---

(१) ॐ संवर्चसा पयसा सं तनूभिरगन्महि मनसा स१ꣳ शिवेन। त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् २।२३।

(२) ॐ दिवि विष्णुर्व्यक्रꣳस्त जागतेन च्छन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि यं च वयं द्विष्मः। ॐ अन्तरिक्षे विष्णुर्व्यक्रꣳस्त त्रैष्टुभेन च्छन्द० द्विष्मः। ॐ पृथिव्यां विष्णुर्व्यक्रꣳस्त गायत्रेण च्छदसा त० द्विष्मः २।२५।

(३) ॐ अस्मादन्नान्निर्भक्तो योऽस्मा० द्विष्मः २।२५।

(४) ॐ अस्यै प्रतिष्ठायास्ततो निर्भक्तो० द्विष्मः २।२५।

(५) ॐ अगन्म स्वः २।२५।

(६) ॐ संज्योतिषाऽभूम २।२५।

N